Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामवेद

कौथुमशाखीयगानार्चिकपदस्तोभः

ॐ

प्रकाशक

जगद्गुरु शङ्कराचार्य मेमोरियल ट्रस्ट

द्वारका, गुजरात

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ सामवेद ॥

(कौथुमशाखीयगानार्चिकपदस्तोभः)

प्रकाशक
स्वामी सदानन्द सरस्वती
जगद्गुरु शङ्कराचार्य मेमोरियल ट्रस्ट
शारदापीठम्, द्वारका - 361335 जामनगर, गुजरात

सम्पादक
पं. गगनकुमार चट्टोपाध्याय श्रौती
वाराणसी

गुरुपूर्णिमा सं. 2061 वि.
द्वारका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ सामवेद ॥

(कौथुमशाखीयगानार्चिकपदस्तोभः)

प्रकाशक

स्वामी सदानन्द सरस्वती

जगद्गुरु शङ्कराचार्य मेमोरियल ट्रस्ट

शारदापीठम्, द्वारका - 361335 जामनगर, गुजरात

सम्पादक

पं. गगनकुमार चट्टोपाध्याय श्रौती, वाराणसी

सर्वाधिकार प्रकाशकाधीन

प्रथम संस्करण - 1000 प्रतियाँ

गुरुपूर्णिमा सं. 2061 वि.

मूल्य : 400 रूपये मात्र

मुद्रक :

श्रीमाता कम्प्यूसिस प्रा. लि.

बी. 7/193, केदारघाट, वाराणसी दूरभाष : 0542 - 2275274

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

SĀMAVEDA

(KOUŢUMAŠĀKHĪYAGĀNĀRČIKAPADASTOBHAḤ)

Publisher
Swāmi sadānanda Saraswatī
Jagadguru Šaṅkarāčārya Memorial Trust
Šāradāpīţaṁ, Dwārakā - 361335
Jāmanagara, Gujarāta

Editor
Pt. Gaganakumāra Čattopāḍyāya Šroutī
Vārāṇasī

Gurupūrṇimā 2061 Vikramī
Dwārakā

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

SĀMAVEDA

(KOUṬUMAŠĀKHĪYAGĀNĀRČIKAPADASTOBHAḤ)

Publisher

Swāmi sadānanda Saraswatī

Jagadguru Šaṅkarāčārya Memorial Trust

Šāradāpīṭaṁ, Dwārakā - 361335

Jāmanagara, Gujarāta

Editor

Pt. Gaganakumāra čattopāḍyāya Šroutī, Vārāṇasī

@ All Rishts Reserved

First Edition 1000 Copies

Gurupūrṇimā 2061 Vikramī

Prise : Rs. 400.00

Composing & Setting

Šrīmātā Compusys Pvt. Ltd.

B. 7/193, Kedāra Ghāta, Vārāṇasī Ph : 0542 - 2275274

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुभाशीर्वाद

पूज्यपाद ज्योतिष्पीठाधीश्वर एवं द्वारका शारदापीठाधीश्वर जगद्गुरु शङ्कराचार्य

स्वामी श्री स्वरूपानन्द सरस्वती जी महाराज

स्वरूपानन्दान्तर्लसदमलचिज्ज्योतिरुदितः
स्वरूपानन्दाख्यो जयति यतिराजोऽधिभुवनम् ।
त्रिपुण्ड्रोद्यद्भालोन्नतगुरुवपुर्गौरमहसा
महेशानो मूर्तीकृत इव जटोद्भासिवदनः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विविधविरुदावलिविराजमानमानोन्नतानां ज्योतिर्द्वारकोभयशाङ्करपीठाधीश्वराणां श्रीमज्जगद्गुरुशङ्कराचार्यस्वामिश्रीस्वरूपानन्दसरस्वतीमहाराजानां

।। शुभाशंसनम् ।।

।। श्रीमज्ज्योतिरीश्वरचन्द्रमौलीश्वरौ विजयेतेरूपम् ।।

अद्य किल महान्तमानन्दथूत्सवसवं समनुबोभवीति मे स्वान्तं यदमन्दानन्दासन्देहसन्दोहशास्त्रारविन्दस्यन्दमानमकरन्दविन्दुविन्दुवन्द्यपदरविन्दविद्वद्वृन्दसमभिष्टुतस्य वेदानां सामवेदोऽस्मीतिभगवद्गीताविगीतदर्शनदर्शितदशादिशा प्रामाणीचारमीपारमीबोभूष्यमाणस्य सामवेदस्य कौथुमशाखीयगानार्चिकपदस्तोभस्य वैदिकगगनचन्द्रायमाणपण्डितश्रीगगनकुमारचट्टोपाध्यायकृतं सम्पादनमस्मत्कृपास्पदस्वामिश्रीसदानन्दसरस्वतीकृतं तत्प्रकाशनञ्च विद्वन्निकुरम्बवलये सम्प्रति सम्प्रतिभाति, आतश्चाधुना वैदिकोत्तंसानां सिमेषां बुधामुपकारायालमेतत्त्रकाममभिचाकसीत्विति भगवन्तं श्रीमद्भवानीविश्वेश्वरं क्रियासमभिहारं निवेद्य, एतकत्सम्पादकप्रकाशकयोरशेषं साङ्गं मङ्गलं प्रकामं निश्चित्य "स्वाध्यायोऽध्येतव्यः" इत्युक्तदिशा स्ववेदान्तर्गतस्वशाखाध्ययनात्मकवेदबोधितेतिकर्तव्यताकस्वाध्यायधन्याः सङ्ख्यावन्तोऽसङ्ख्यमभीष्टं लभन्तामिति समोदं व्याहृत्य, चिररात्रायातिदुर्लभमदो ग्रन्थरत्नं साम्प्रतं निरायासलभ्यमिति मोमुद्यमानमानसा विरमाम इति शम्।

अशेषनारायणस्मरणात्मिका मङ्गलाशिषः

स्वरूपानन्द सरस्वती

(श्रीस्वरूपानन्दसरस्वतीस्वामिनः)

गौरवी पौर्णमासी २०६१ वि.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समर्पण

श्रीमदादिशङ्कराचार्य भगवत्पाद को

जिनके अवतरण से

वेद-परम्परा संपोषित हुई

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरोवाक्

वेदमाहात्म्यं को हि विज्ञातुं प्रकटयितुं नार्हति । यथोक्तम् ब्रह्मैव वेदः वेद एव ब्रह्म वेदपाठी च शिवःस्वयम् । यथा च वेदः शिवः शिवो वेदः । वेदपाठी सदा शिव तत्रापि सामवेदस्य माहात्म्यं ततोऽतिशायि। स्वयं भगवता गीतायामुक्तम् - 'वेदानां सामवेदोऽस्मि' (श्रीमद्भगवद्गीता 10-42) युगानुरूपं कालक्रमेण सर्वासां विद्यानां ह्रासः संलक्ष्यते । किमुत वेदविद्यायास्तत्रापि च सामवेदस्य । धन्या इमे शङ्कराचार्यपादाः ये विषयेऽस्मिन् करालकाले वेदानां सातत्याय संरक्षणाय च प्राणपणेनापि सन्नद्धाः । एतेषु शङ्कराचार्यपादेषु द्वारकाबदरीनाथपीठद्वयाधीश्वराणाम् अनन्तश्रीविभूषितानां स्वामिस्वरूपानन्दसरस्वतीमहाभागानां वेदसंरक्षणप्रकारः प्रशस्यतमः। एतेषामाशिषा सत्प्रयासेन सत्परामर्शेन च सामवेदविद्याधौरेयः सामवेदस्य अध्येतृषु अध्यापकेषु च कनिष्ठिकामधिश्रितो बङ्गीयो लब्धप्रतिष्ठः सामवेदी विद्वान् श्रीकाञ्चीकामकोटिपीठसंरक्षणे आचार्य-पट्टाभिरामशास्त्रिवेदमीमांसानुसन्धानकेन्द्रस्य वेदविद्यालये प्राचार्यपदमलङ्कुर्वाणः श्रीगगनकुमारचट्टोपाध्यायः श्रौती सामवेदकौथुमशाखीयगानार्चिकपदस्तोभनामकं ग्रन्थं सम्पादयितुं प्रायतत ।

अयं ग्रन्थः सामवेदाध्यायिनां कृते महानुपयोगी परमद्यत्वे सर्वथा दुर्लभोऽयं जातः । बहुदिनपूर्वमस्य सम्पादनमभवत् यस्य केवलं नामैव श्रूयते । आपणादिषु च नोपलभ्यते । स्वामिपादाः श्रीचट्टोपाध्यायाश्चानेन सम्पादनेन वेदजगतो महान्तमुपकारं कृतवन्तः ।

एवमतीव महतीं वृहत्कलेवरां भूमिकां सन्निविष्टां इमां दृष्ट्वा सामवेदविषये बहुविषयकं ज्ञानं जायते संवर्द्धते च ।

अनेन सम्पादकमहोदयस्य वैदिकवाङ्मयज्ञानराशिरनुमातुं शक्यते । वेदापौरुषेयत्व-वेदप्रामाण्यादिविचारस्तु प्रस्तुत एव किन्तु अद्यावधि अलब्धप्रसराणां सामवेदसम्बन्धिनां प्रकाशिताप्रकाशितशताधिकग्रन्थानां सूची अत्र उपनिबद्धा वर्तते । सामवेदे प्रवेशमलभमानानां ज्ञानसौकर्याय गानभागगानविषय-सामवेदस्वरूपक विमर्शं गानस्वरभेदादीनां बहूनां सामवेदज्ञानोपयोगिनां विषयाणां सन्निवेशः कृतो वर्तते । ममायं विचारो यदनेन एकेनैव ग्रन्थविशेषेण सामवेदसम्बन्धिनीनामनेकासां जिज्ञासानां समाधानं भवितुमर्हति । एतादृशस्य ग्रन्थविशेषस्य सम्पादने प्रकाशने च सविशेषरुचिमादधानानां सर्वविद्यार्थिकादिसौविद्ध्यसमुपस्थापकानां द्वारकाज्योतिष्पीठद्वयाधीश्वराणां स्वामिवर्याणां सुमनःसङ्कल्पः सर्वेषां सामवेदाध्यायिनां सामवेदानुरागिणां च कृते महते प्रमोदाय भविष्यति । विद्वद्वरेण्येन सामवेदप्रवराचार्येण श्रीमता गगनकुमारचट्टोपाध्यायमहोदयस्य च कृतोऽत्रातीव कीर्तनीयः श्रमः । श्रीमते वेदभगवते प्रसादाय तथा सामवेदाध्येतृणां च कृते महते कल्याणाय भविष्यतीति मे द्रढीयान् विश्वासः ।

अन्ते च सर्वविद्यास्वरूपयोरन्नपूर्णाविश्वनाथयोश्चरणयोः स्वीयान् प्रणामान् समर्प्य अयं ग्रन्थः सामवेदप्रणयिनां कृते सर्वविधं सौख्यं प्रदद्यादिति सम्प्रार्थये ।

विदुषामाश्रवः

२०६१ वै. सं. अक्षयतृतीयायां गुरौ ।
'२२/४/२००४'

प्रो. मुरलीधर पाण्डेयः
व्याकरणशङ्करवेदान्तरामानन्दवेदान्तसांख्ययोगसाहित्याचार्यः (एम.ए.)
वाचस्पति (डी.लिट्), राष्ट्रपतिसम्मानितः
वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिका

प्रत्यक्षानुमानाभ्यामप्रमितान् ऐहिकामुष्मिकसुखसाधनीभूतान् सर्वान् धर्मान् यो वेदयते तं वेदं प्रचक्षते तद्विदः । अत्र हि अभियुक्तानामुक्तिः -

''प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ।।''

(कृ०य०भा०भू०)

महासमुद्रायमाणमतिगभीरं वेदम् अल्पमतिभिः अध्ययनावगमायोग्यं मत्वा भगवान् वेदव्यासः चतुर्धा व्यभजत । भगवान् जैमिनिः वेदार्थं निर्णेतुं सहस्रसंख्याकन्यायोपेतानि द्वादशाध्यायपरिमितानि सूत्राणि जग्रन्थ । यास्क-पाणिन्यादयो महर्षयः वेदार्थावगमसाधनानि निरुक्तव्याकरणादीनि षडङ्गानि प्राणैषुः । एकैकस्य वेदस्य बह्व्यः शाखाः वर्तन्ते । तत्र ऋग्वेदस्य एकविंशतिः शाखाः, यजुर्वेदस्य एकशतम्, सामवेदस्य सहस्रं शाखाः, अथर्ववेदस्य नव इति च विज्ञायते पातञ्जलमहाभाष्यात् । इमे च वेदा नैकशाखोपबृंहिताः धर्मानुष्ठानार्थमेव प्रवृत्ताः । तथा च लगध्यः स्मरति - ''वेदा हि यज्ञार्थमभिप्रवृत्ताः'' (ल.ज्यो.७,६) इति । वेदार्थस्य दुर्बोधत्वेन धर्मानुष्ठानस्याशक्यत्वात् तदवगमार्थं दयालवो महर्षयः नैकान् ग्रन्थान् प्रणीय अस्मान् अन्वग्रहीषुः । इतिहासपुराणादयः वेदान् उपबृंहयन्तः धर्मतत्त्वमेव बोधयन्ति । तत्र भगवन्मुखारविन्दान्निःसृता गीता प्राधान्यमावहति ।

गीतायां भगवान् श्रीकृष्णः स्वविभूतिवर्णनावसरे ''वेदानां सामवेदोऽस्मि'' (भ.गी.१०/२२) इति कथयति । भगवन्निःश्वासभूतेषु चतुर्षु वेदेषु समप्राधान्येषु सत्सु सामवेदस्यैव स्वस्वरूपत्वं वर्णयतः भगवतः आशयः कीदृश इति जिज्ञासा उदेति इयं वेदविद्या गुरुशिष्यपारम्पर्येण प्रवृत्ता वर्तते -

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ।।
चातुर्वर्ण्यं त्रयो लोकाः चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति ।।

(मनु. स्मृ. १२/९४-९७)

सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ।।

(म. स्मृ. १२/१००)

इति पद्येन वेदशास्त्रवित् सर्वत्र अधिकारमर्हतीति च मुक्तकण्ठमुद्घोषयति मनुः । वेदः मन्त्र-ब्राह्मणोभयात्मकः । तत्र ब्राह्मणभागः कर्माणि विदधाति, मंत्रभागः प्रयोगसमवेतानर्थान् स्मारयति। एकैकस्या वेदशाखायाः विभिन्नानि ब्राह्मणानि, विभिन्नाश्च मन्त्रा वर्तन्ते । मन्त्रसमुदायं संहितेत्याचक्षते। सर्वत्र ब्राह्मणभागः मन्त्रभागश्च पार्थक्येनोपलब्धुं शक्यते ऋते कृष्णयजुर्वेदात् । तत्र मन्त्रस्त्रिविधः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

- पादबद्धरूपः, निगदरूपः, गीतिरूपश्चेति । पादबद्धरूपोव्यरूपो मंत्रः ऋक्शब्द-वाच्यः, निगदरूपः यजुशब्दवाच्यः, गीतिरुपश्च सामशब्दवाच्यः इति पूर्वतंत्रस्य द्वितीयप्रथमे स्पष्टम् । एते मन्त्राः यस्मिन् ग्रन्थे बाहुल्येन आम्नायन्ते स ऋग्वेदादिपदैर्व्यपदिश्यते । यथा - यत्र ऋचां बाहुल्यं स ऋग्वेदः, यत्र यजुषां स यजुर्वेद इत्यादि । ''ऋग्वेदेन होता, करोति यजुर्वेदेनाध्वर्युः, सामवेदेनोद्गाता, सर्वैर्ब्रह्मा'' (आ.प.सू. १८/२१) इति आपस्तम्बवचनेन ऋग्वेदः हौत्रे, यजुर्वेदः, अथर्ववेदः, सामवेदः औद्गात्रे, त्रयी च ब्रह्मत्वे उपयुज्यते ।

यज्ञः इष्टि-पशु-सोमभेदेन त्रिविधो भवति । ''अयज्ञो वा एष योऽसामा'' (तै.सं. २/५/८) इति तैत्तिरीयश्रुतिः सामरहितस्य अयज्ञत्वं स्पष्टं प्रतिपादयति । तस्माद् यज्ञे सामवेदस्य प्राधान्यमवगम्यते।

सर्वेभ्यः कामेभ्यो विहितं बहुविधं यज्ञं ये अनुष्ठातुं न शक्नुवन्ति तेषामपि तत्तत्फलप्राप्तये यज्ञप्रत्याम्नायभूतानुपायान् विधत्ते छन्दोगसम्बन्धि सामविधानाख्यं ब्राह्मणम् । तथाहि- ''ते देवाः प्रजापतिमुपाधावन् तेऽब्रुवन् कथं नु वयं स्वर्गं लोकमियामेति तेभ्य एतान् यज्ञक्रतून् प्रायच्छदेतैर्लोकमेष्यथेति तैः स्वर्गं लोकमायन्, तेषामहीयन्ताजाः पृश्नयो वैखानसा वसुरोचिषो ये चापूता ये च कामेप्सवः तेऽब्रुवन् कथं नु वयं स्वर्गं लोकमियामेति तेभ्य एतत् स्वाध्यायाध्ययनं प्रायच्छत् तपश्च एताभ्यां स्वर्गं लोकमेष्यथेति ताभ्यां स्वर्गं लोकमायन्'' (सा.ब्रा.१/१/१५/१७) इति । अत्र स्वाध्यायाध्ययनशब्देन तत्तत्फलावाप्तये विधीयमानः साम्नां प्रयोगोऽभिधीयते । तत्र हि आयुष्य-पशु-पुत्र धनादिमोक्षान्तानां फलानां प्राप्तये सुलभाः प्रयोगाः प्रदर्शिताः । ते च प्रायशः सामजपात्मकाः । क्वचिदल्पकाल-द्रव्यसाध्याः होमात्मका अपि प्रयोगाः विहिताः।

(२) ''वेदापौरुषेयत्वविचारः''

नियतस्वर - वर्ण - क्रम - स्थान - प्रयत्न - कालविशिष्टाः शब्दराशयः वेदा भवन्ति । ते च शब्दराशयः छन्दोबद्धाः, गीतिनिबद्धाः, प्रश्लिष्टपठिताश्च उपलभ्यन्ते । तत्र गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पंक्तिः, त्रिष्टुप् , जगतीति सप्त वैदिकच्छन्दांसि कथ्यन्ते । एतैश्चछन्दोभिः निबद्धाः शब्दराशयः पादबद्धा ऋग्वेदे समुपलभ्यन्ते । इमे शब्दराशयः ऋचः कथ्यन्ते । अत्र उदात्तानुदात्तस्वरितस्वराः वर्णानां क्रमाश्च नियताः । पदानां वर्णानां स्वराणाञ्च परिवर्तनं केनापि कर्तुं न शक्यते । आसेतुहिमाचलपर्यन्ते देशे वेदाध्येतॄणामस्मिन् विषये एकता अनुभूयते । अर्थात् नियताक्रमविशिष्टा या आनुपूर्वी तत्सदृशानुपूर्वीसापेक्षता वेदाध्ययने भवति । अर्थात् गुरूच्चारितानुपूर्वीसदृशानुपूर्वी शिष्येणोच्चारणीया । इदमेव गुरूच्चारणानूच्चारणम् अध्ययनं कथ्यते । पठनस्य अध्ययनस्य चेयान् भेदः । पुस्तकगतानुपूर्वीपठनेन अध्ययनं न भवति, किन्तु तत् केवलम् पठनं निगद्यते । रामायणादीनामेवं पठनं सम्भवति न तु वेदस्य । वेदस्य पठनेन ''छात्रो वेदम् अधीते'' इति व्यवहारं सङ्गतं न मन्यन्ते वैदिका वेदाध्येतारः । यदा गुरुमुखोच्चारणानूच्चारणविधया अधीयन्ते छात्राः तदैव अध्ययनशब्दः प्रयुज्यते । अधिपूर्वक-इङ् धातुः अध्ययनं वर्तते । केवलं पुस्तकवाचनावसरे पठन्तीत्येव व्यवहारः । यो गुरुरध्यापयति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेदम् , सोऽपि स्वगुरूच्चारणानूच्चारणविधयैव अधीत्य अध्यापयति । एवं गुर्वध्ययनपूर्वकत्वमेव वेदाध्ययने उपलभ्यते । एवं च यत्र यत्र वेदाध्ययनं तत्र सर्वत्र गुर्वध्ययनपूर्वकत्वमेव उपलभामहेऽधुनापि। चिरन्तनकालादेवाध्ययननियतरूपेण पूर्वोक्तविशेषणविशिष्टानुपूर्वीघटित-वेदग्रन्थस्य प्रणेतारमयेध्येतारो नाम्ना न कीर्तयन्ति-- अमुकनामा इमं ग्रन्थं प्रणिनायेति । रघुवंश-रामायण-महाभारतादिग्रन्थानामध्ययनपरम्परायां विद्यमानानां विंशतितमे शतके विद्यमानो बालकः कुमारो युवा वा नाम्ना प्रणेतारं कामं न स्मरेयुः, किन्तु कोऽपि न स्मरति इति साधनं दुष्करम् । वेदः पौरुषेयः, वाक्यत्वात् "भारतरामायणादिवाक्यवत्" इत्यनुमानेनापि वेदस्य प्रणेता न साधयितुं शक्यते । यतः वाक्यत्वहेतुः स्मर्यमाणकर्तृकत्वोपाधिविशिष्टः । वेदवाक्येषु नियतस्वर-वर्ण - क्रमवैशिष्ट्यं परिवर्तनानर्हं विलोकयामः । लौकिकवाक्येषु तादृशं वैशिष्ट्यं न पश्यामः । यथा -

स-राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ।।(रघुवंशे ४-१)

इत्यस्मिन् पद्ये "हुताशनः" इति पदं निष्कास्य विभावसुपदं वा धनञ्जयपदं वा प्रक्षिप्य पठनेऽर्थावबोधे छन्दसि वा न किञ्चिद्वैकल्यं प्रायश्चित्तं वा । तथा "बध्नेनेवधनञ्जयः" इति विपरिवर्त्य पठनेन अर्थावबोधे न कश्चन प्रत्यूहः । परं तु वैदिकवाक्येषु मात्रयापि परिवर्तनं प्रायश्चित्ताय कल्पते । अयं लौकिकवैदिकवाक्ययोर्भेदः । सापेक्षत्वनिरपेक्षत्वप्रयुक्तो भेदः लौकिक-वैदिकवाक्ययोर्भेदः । अतएव भगवान् जैमिनिः लोकवेदाधिकरणे लौकिकवैदिकपदपदार्थयोरेवानन्यत्वं प्रसाधयामास, न तु लौकिकवैदिकवाक्यवाक्यार्थयोः । वाक्यत्वहेतोः पौरुषेयत्वेन येषु ग्रन्थेषु भारतरामायणादिषु व्याप्तिर्गृह्यते तत्र सर्वत्र कर्तुः स्मरणमस्ति । वेदे तु कोऽपि कर्तारं न स्मरति । ईश्वरकर्तृकत्वमन्ततो यदि साध्यते सोऽपीश्वरः सर्वशक्तिमान् गतकल्पीयं वेदसंदर्भं स्मृत्वैव ऋषिभ्य उपदिशति इत्यङ्गीकार एवोचितः । उपदेशकर्तृत्वमात्रेण रचितत्वं न कल्पयितुं शक्यम् । वयमप्यधुना माणवकेभ्य उपदेष्टारः स्म । उपनयने माणवकेभ्यो गायत्रीमंत्रमुपदिशामः, न तावता वयं मन्त्रस्य प्रणेतारो भवामः ।

वेदप्रामाण्यविचारः

अथेदानीं वेदस्य प्रामाण्यं कीदृशमिति विचारयामः । प्रामाण्यमप्रामाण्यञ्च उभयं स्वत इति सांख्याः । उभयं परत इति तार्किकाः । प्रामाण्यं स्वतः अप्रामाण्यं परत इति मीमांसका वेदान्तिनश्च । प्रामाण्यं परतः अप्रामाण्यं स्वत इति बौद्धाः । तत्र स्वतः प्रामाण्यं परतश्चाप्रामाण्यमिति मीमांसकनयः । तथाहि - प्रमाणं नाम प्रमाकरणम् । प्रमा च यथार्थज्ञानम् । येन येन प्रमीयते तत्तत् प्रमाणम् । शब्देनापि प्रमीयते, अतश्शब्दोऽपि प्रमाणम् । शब्दप्रमाणमनङ्गीकुर्वाणा अपि दार्शनिका विद्यन्ते । वेदस्य स्वतः प्रामाण्यं साधयितुं शब्दं प्रमाणं स्वीकृत्य विचारः क्रियते । शब्दः प्रमाणं न वा इति विचारोऽन्यः । शब्देन जनिते ज्ञाने प्रामाण्यं कीदृशमिति विचारः । शब्दस्य ज्ञानजनकत्वप्रकारः कीदृश इति पर्यालोच्यमाने गृहीतपदपदार्थसंगतिकस्यैव शब्दो ज्ञानं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनयतीत्येष्टव्यम् । यश्चागृहीतपदपदार्थसङ्गतिकः स शब्दं श्रुत्वापि न किमपि प्रतिपद्यते इति अन्वयव्यतिरेकाभ्यां पदपदार्थशक्तिग्रहस्य कारणता शाब्दबोधं प्रति स्वीकर्तव्या । शक्तिग्रहं प्रति "व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च" इत्युपायाः परिगणिताः । इमे चोपायाः शब्दं तदर्थं तत्सम्बन्धं च कृत्वा महर्षिभिः मनीषिभिश्च प्रवर्तिता इति साधनं दुष्करम् । नहि शब्दः केनापि कर्तुं शक्यते, नाप्यर्थेन सह सम्बन्धः । पुरुषस्य शब्दोच्चारणे सामर्थ्यम्, न तु तन्निर्माणे । सन्ति संख्यातीताः शब्दाः । किमिमे एकेन पुरुषेण निर्मिताः उतानेकैः ? इति प्रश्नो दुस्समाधेयः । किमुद्दिश्य शब्दं निर्मातुं पुरुषः प्रवर्तते? अर्थावबोधायेत्येव समाधानं वक्तव्यम् । तत्रार्थः पूर्वमवर्तत, तद्बोधायायं शब्दो निर्मित इति आश्रयणीयम् । तत्रार्थं संसृज्य तदनन्तरं शब्दनिमार्णमिति क्रमः ? उत शब्दं निर्माय तदनन्तरमर्थनिर्माणमिति वा क्रमः ? इति प्रश्नो दुरुत्तरः । न खलु कम्बुग्रीवादिमत्वं संज्ञिनं निर्माय तदनन्तरं तस्य "घट" इति संज्ञां चकार, अथवा संज्ञां कृत्वा तदनन्तरं संज्ञिनं निर्मांति इति सरणिस्सम्भवति । एतेन शब्दार्थतत्सम्बन्धादीनां निर्माणे पुरुषानुप्रवेशो दुर्घट इति साधितं भवति । यदि शब्द-तदर्थ तत्सम्बन्धनिर्माणि बलात्पुरुषानुप्रवेश आश्रीयेत तदा "घट" इत्येव आनुपूर्वी कुतः स्यात् ? "टघः" इति कुतो न कृतः ? एतदर्थं व्याकरण - कोश - वृद्धव्यहारादीनां नियामकत्वं स्वीकर्तव्यम् । व्याकरणं कोशाश्च वृद्धव्यवहाराधीनाः । शब्दनिर्मातृभिः शब्दैरेव करणैः शब्दा निर्मातव्याः, न तन्तुमृदादिभिः करणैः । "अयं शब्दः अमुमर्थं बोधयतु" इति करणभूताश्शब्दाः कुतस्समायाताः ? तेषां निर्माता कः? सोऽपि करणभूतशब्दनिर्माणाय अन्यान् करणभूतशब्दान् आश्रयत इति वक्तव्यम् । एतादृशी रीतिः क्व सन्तिष्ठते ? इति दुरुपपादम् । अतएव मीमांसाभाष्यकृतश्शबरस्वामिनः" "अथ गौरित्यत्र कः शब्दः"? इति प्रश्नमुपस्थाप्य "गकारौकारविसर्जनीया इति भगवानुपवर्षः" इति समाहितवन्तः । अत्र वृद्धव्यवहारमेव भाष्यकाराः प्रमाणयन्ति । उपवर्षोऽप्याचार्यो वृद्धव्यवहारमादायैव व्यवहरति इत्यङ्गीकर्तव्यम् । एवं च शब्द - तदर्थ - तत्सम्बन्धेषु पुरुषानुप्रवेशे सत्येव पुरुषाणां भ्रमप्रमादादिदोषसम्भवात् समादाय वेदानामप्रामाण्यं साधनीयम् । पुरुषानुप्रवेशाभावाच्च प्राप्तं स्वतःप्रामाण्यमनपोदितं साधनीयं भवति मिथ्यात्वग्राहकप्रमाणेनैव अप्रामाण्यं साधनीयं भवति । तदस्य वेदे न सम्भव इति स्वतःप्रामाण्यं सिद्ध्यति ।

(३)मीमांसाभाष्यकृदभिमतं स्वतः प्रामाण्यवर्णनम्

ज्ञानसामान्ये प्रामाण्यं स्वतो वा परतो वेति विचारविषयः । तत्र भाष्यकारवचनेन वृत्तिकारमते श्रीवार्तिकारपादाः सुस्पष्टं प्रतिपादयन्ति - "तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाण्यता तदन्यथात्वहेतुत्थदोषज्ञानादयोद्यते" इति ॥ "यस्य च दुष्टं करणं, यत्र च मित्थेति प्रत्ययः स एवासमीचीनः प्रत्ययः" इति न्यायः सत्प्रत्यक्षम्, असत्प्रत्यक्षम्, सदनुमानम्, असदनुमानम् इत्यादयो भवन्ति यद् व्यवहाराः तत्र यद्विषयकं ज्ञानं तेन विषयेण इन्द्रियसंयोगे यज्ज्ञानं जायेत तत् सत्प्रत्यक्षं कथ्यते । एवं यस्य हेतोः साध्येन साहचर्यं नियतं तेन हेतुना साध्यस्यानुमाने सति सदनुमानं भवति, अत्र व्यभिवारेऽसदनुमानम् । शब्दोऽपि यदि साधुः तदा स तथाभूतार्थप्रतिपादक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एव । अतथाभूतार्थप्रतिपादकत्वञ्च तस्य प्रतारकपुरुषसम्बन्धेनैव वक्तव्यं भवति । अस्तीत्युक्ते सत्तावगम्यते, नास्तीत्युक्ते सत्ताभावः । "नद्यास्तीरे पञ्च फलानि धार्मिकः कश्चन ददाति" इति वञ्चकोच्चरितिः वितथाभूतार्थप्रतिपादकोऽनुभूयते, किन्तु स्वाभाविकार्थप्रतिपादकत्वं तस्य न हीयते शब्दस्य । एवं च प्रत्यक्षमनुमानं शब्दो वा विपरीतार्थ- प्रतिपादने एव कारणं भवतीति सिद्ध्यति। तत्र लोके च शब्दानां पुरुषोच्चारणसम्बन्धो दृश्यत इति तत्राप्रामाण्य-ग्रहस्सम्भाव्यते। वेदे तु पुरुषसम्बन्धाभावात् अप्रामाण्यग्राहकप्रमाणत्वेन स्वतः प्राप्तं प्रामाण्यम् अनपोदितं भवति ।

(४) वेदशब्दव्युत्पत्तिः

वेदशब्दस्य नैकविधा व्युत्पत्तयः सम्भवन्ति । यथा - (क) १. ज्ञानार्थकाद् आदादिकविद्धातोः घञि वेदः, ज्ञानमिति ।

२. विद्यते ज्ञायते इति वेदः, ज्ञानविषयः । सर्वत्र घञ्प्रत्ययः ।

३. वेत्ति जानाति अनेनेति वेदः, ज्ञानसाधनम् ।

(ख) सत्तार्थकाद् दैवादिकविद्धातोः विद्यते नित्यरूपेण वर्तते इति वेदः, अर्थात् वेद एव नित्यः ।

(ग) "विद्लृ लाभे" इति तौदादिकाद् विद्धातोः विन्दति प्राप्नोति धर्मादिपुरुषार्थान् अनेनेति वेदः ।

(घ) रौधादिकाद् विद् विचारणे इति धातोः विन्ते विचारयति धर्मादिकमिति वेदः ।

(ङ) तथा "विदचेतनाख्यानिवासेषु" इति चौरादिकाद् धातोः वेदयते आख्याति सर्वमिति वेदः।

(५) वेदलक्षणम्

१. प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुद्ध्यते ।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ।।

(सायणाचार्य भा०भू०)

अत एव इष्टप्रात्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । (सायणाचार्यः)
अपौरुषेयं वाक्यं वेदः । (ऋ०वे०भा०भू०)
अपौरुषेयशब्दसन्दर्भो वेदः - (मीमांसकमते)
मन्त्रब्राह्मणयोर्वेदनामधेयम् - (आपस्तम्बः)
प्रत्यक्षानुमानागमेषु अन्तिमो वेद इति च केचित् ।

(६) वेदशाखाविमर्शः

तत्र एकैकस्यापि वेदस्य नैकविधाः शाखाः प्रवक्तृवर्यैर्महर्षिभिः प्रवर्तिताः परिदृश्यन्ते । प्रत्येकं वेदस्य शाखानां परिगणनमकारि महाभाष्यकृता भगवता पतञ्जलिमहर्षिणा - "एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽथर्वणो वेदः"

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(म०भा०६२पृ०) इति । ऋग्वेदीयसर्वानुक्रमणीव्याख्यात्रा षड्गुरुशिष्येणाप्युदलेखि -

''एकविंशत्यध्वयुक्तमृग्वेदमृषयो विदुः ।
सहस्राध्वा सामवेदो यजुरेकशताध्वकम् ।
नवध्वाथर्वणोऽन्ये तु प्राहुः पञ्चदशाध्वकम्'' ।।

इति पद्येनानेन पञ्चदशशाखाभेदवत्त्वमप्याथर्वणस्येति केषाञ्चिन्मतं दृश्यते । यजुर्वेदस्यापि शाखापरिगणने मतभेदो लक्ष्यते ।

(७) सम्प्रत्युपलभ्यमानाः शाखाः

तत्र ऋग्वेदीयासु एकविंशतिसंख्याकासु शाखासु साम्प्रतमेकैव शाखा शाकलाभिधा अध्ययनपरम्परायां समुपलभ्यते । अन्याः शाखाः तदध्येतॄणामभावात् विलुप्ताः । तथा यजुर्वेदे चतस्रः शाखाः अध्ययनपरम्परायां विद्यन्ते । तथाहि - यजुर्वेदस्तावत् - शुक्ल-कृष्णभेदेन द्विधा विभक्तः । अस्य चैतिहासिकमाख्यानं विष्णुपुराण-भागवतादिषु प्रपञ्चितम् । तत्र शुक्लयजुर्वेदे काण्व, माध्यन्दिनी इति द्वे; कृष्णयजुर्वेदे तैत्तिरीया, मैत्रायणी इति च द्वे । आहत्य चतस्रः शाखाः सम्प्रदाये प्रचलन्ति । एवमेव सामवेदीयासु सहस्रसंख्याकासु शाखासु इदानीं तिस्र एव शाखा उपलभ्यन्ते । ताश्च कौथुमी, राणायनी, जैमिनीया इति नामभिः प्रसिद्धा विराजन्ते । अथर्ववेदेऽपि शौनकीया, पैप्पलादशाखेति शाखाद्वयमुपलभ्यते ।

(८) सामप्रशंसा

एवंविधस्य महतः सामवेदस्य प्रशंसा अनेकेषु ग्रन्थेषु बहुधा गीता अस्ति। सामैव सर्वेषां जीवातुभूतम्; सामैव प्राणाः, साम स्वर्गस्य लोकस्योत्पादकम्, साम्नां सप्तभिः स्वरैरेव आब्रह्मस्तम्बपर्यन्तं जगतां तृप्तिः, यः साम जानाति स सर्वं जानाति इत्यर्थाः प्रशंसापराः श्रुतयः स्मृतयश्च असंख्येयाः । मुख्यतः स्वस्य सामवेदस्य च ऐक्यप्रतिपादनं **''वेदानां सामवेदोऽस्मि''** इति भगवतः श्रीकृष्णस्य वचनम् । एवं सामप्रशंसापराणि वाक्यानि नक्षत्राणीव व्योम्नि असंख्येयानि सन्ति । तथापि यथाशक्ति तत्र तत्र विद्यमानानि वाक्यानि संगृह्यन्ते । वाक्यानाम् अर्थास्तु विदुषां बुद्धिगोचरा इति नात्र लिख्यन्ते ।

(९) तत्तच्छाखाप्रचारस्थानविवरणम्

पूर्वोक्तासु शाखासु माध्यन्दिनी, पैप्पलाद इति द्वे शाखे विहाय अन्यासां सर्वासामपि शाखानामध्ययनपरम्परा दक्षिणभारते प्रचलति । माध्यन्दिनीशाखायाः उत्तरभारते एव प्रचारः । तथा पैप्पलादशाखाया अध्ययनं जगन्नाथक्षेत्रे प्रचलति । तथैव दक्षिणभारतादन्यत्र राणायनी-जैमिनीयशाखयोः प्रचारो न दृश्यते । अन्यासां सर्वासां शाखानां सम्प्रदायः तत्र तत्र विप्रकीर्णतया उपलब्धुं शक्यते । एवं चतुस्सागरपर्यन्तं विस्तृते अस्माकं देशे चतुर्वेदस्य महावृक्षाः नैकविधशाखोपबृंहिताः विराजन्ते ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१०) ऋगादिलक्षणम्

तत्र छन्दोवद्धमन्त्रा ऋच उच्यन्ते । छन्दोहीना गद्यात्मकाः अर्थावशेन विभज्यमानामन्त्रा यजुष्पदवाच्याः । ऋक्षु गीयमानो गानविशेषः सामपदाभिधेयः । छन्दोबद्धा ऋग्विशेषा एव अथर्वांगिरस इत्युच्यन्ते । अत्रैवं जैमिनिना लक्षणमकारि । "तेषामृग्यत्रार्थवशेन पादव्यवस्था, गीतिषु सामाख्या, शेषे यजुश्शब्दः" एते मंत्रा यस्मिन् ग्रन्थसमुदाये बाहुल्येन आम्नायन्ते स ऋग्वेदादिपदैर्व्यपदिश्यते । यथा - यत्र ऋचां बाहुल्यं स ऋग्वेदः, यत्र यजुषां स यजुर्वेदः इत्यादि ।

(११) सामशब्दविचारः

इदानीं सामशब्दो विचार्यते । मन्त्राणां मध्ये यो गीतिरूपः स सामशब्दवाच्य इति जैमिनिस्मृतिः पूर्वं प्रदर्शिता । श्रुतौ चैवं सामशब्दो निरुक्तः - "सा चामश्चेति तत्साम्नः सामत्वम्" (शत. ब्रा. १४/४/२४) इति । "सैव नाम ऋगासीत् अमोनाम साम" (ऐ. ३/२३) इति च । तथा च ऋग्गानयोः ऐक्यमेव सामशब्देनोच्यते । यास्केनाप्येवमेव निरवाचि - "साम संमितमृचा" (नि. ७/३/६/४) इति । एवं सामविधानब्राह्मणेऽपि साम्नो निर्वचनं कृतम् । तद्यथा - "स यदा गायत्रं वृहत्यां गायति बार्हतं जगत्यां जागतं त्रिष्टुभि समतां चापद्यते, तस्मादेतत्सामेत्याह, समा उह वा अस्मिंश्छन्दांसि साम्यादिति तत्साम्नः सामत्वम्" (सा.ब्रा.१/१/१३) इति । अस्य भाष्यं तु समत्वात् सामेति संग्रेणार्थः बहूनां छन्दसां समत्वात् साधारणत्वात् समानायामृचि - बहूनां साम्नां गीयमानत्वाद्वा सामेति । समा समानि छन्दांसि उ ह वै इति त्रयो वाक्यालङ्काराः । अस्मिन् साम्नि इति जातावेकवचनम् । कथं छन्दसां साम्नि समत्वमित्यत्राह - साम्यादिति । बहूनां साम्नामेकं छन्दः समाम्नायते । बहुसामानि छन्दांसि हि । साम्नां समानत्वे छन्दो बहूनां साम्नः गीयमानत्वाच्च सामशब्दप्रवृत्तिरिति ।

किञ्च "षोऽअन्रकर्मणि" इति धातोः" (पा. सू. ३/२/७५) अन्येभ्योऽपि दृश्यन्ते इति मनिन्प्रत्यये "आदेच उपदेशेऽशिति" (पा. सू. ६/१/४५) इति सूत्रेण ओकारस्यात्वे सामेति भवति । स्यति नाशयति पापमिति । उपलक्षणमिदं पुण्यस्यापि । पापपुण्ययोः अभावे नलिनस्थितनीरमिव शुद्धस्सन् अर्थात् संसारे अलिप्तः सन् मुक्तो भवतीति । इममेवार्थं महर्षिर्याज्ञवल्क्योऽपि स्पष्टीं चकार -

यथाविधानेन पठन् सामगायमविच्युतम् ।
सावधानस्तदभ्यासात् परं ब्रह्माधिगच्छति ।।

(या. स्मृ. ३/११२)

तथा सामयति सुखयति इति साम इत्येवमपि सामशब्दो निर्वचनार्हः ।।

(१२) सामवेदगता ग्रन्थाः

सम्प्रति सामवेदस्य ग्रन्था निर्दिश्यन्ते । वेदान्तरेष्विव अत्रापि संहितापाठः, पदपाठः,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मणपाठः, कल्पाः, प्रातिशाख्यानि च सन्ति । क्रमपाठः, जटापाठः घनपाठः इति यथा ऋग्वेदयजुर्वेदयोः पठ्यते तद्वत् सामवेदे नास्ति । अत्रेदमनुसन्धेयं पद्यम् -

''ऋग्वेदस्तु घनान्तः स्याद् यजुर्वेदो जटान्तकः ।
सामवेदः पदान्तः स्यात् संहितान्तस्त्वथर्वणः ।।

(सूर्यकान्तः ऋक्तंत्रे भूमिकायाम्)

अस्मिंश्च वेदान्तरापेक्षया ग्रन्थानां बाहुल्यमस्ति । ब्राह्मणानि च अष्टौ विद्यन्ते, सूत्राणि दश, अनेके लक्षणग्रन्थाः प्रातिशाख्यानि च सन्ति । ग्रन्थाश्च उत्तरत्र नामनिर्देशपूर्वकं प्रदर्श्यन्ते । एतेन नैव मन्तव्यम् यद् एकस्यां शाखायाम् एकमेव ब्राह्मणम्, एकमेव सूत्रम्, एक एव लक्षणग्रन्थो भवितुमर्हति । अतः अन्ये ग्रन्थाः अन्यान्यशाखानां भवेयुरिति ।

अत्र सामवेदीयग्रन्थगणनावसरे द्विधा गणना समवलोक्यते । यथा - चिन्तामणिभट्टाचार्य-सम्पादिते सभाष्यगोभिलगृह्यसूत्रे एवमुल्लिखितम् - **''द्विपञ्चाशदिमे ग्रन्थाः शाखायाः कौथुमेरिह''** इत्युपक्रम्य पद्यरूपेण ग्रन्था नामतो निर्दिष्टाः । तत्र क्वचित् ग्रन्थानां नाम नान्वेतीत्यतः इयत्तया संख्या नावबुध्यते । प्रायशः सप्तसप्ततिप्रभृत्यशीतिपर्यन्तं द्व्यशीतिपर्यन्तं वा ग्रन्थाः सन्तीति ज्ञायते । परम् अस्माकं गणनायाम् एतद्द्वयापेक्षया अधिका ग्रन्था विद्यन्ते । ते च यथा -

१. पूर्वार्चिकम् २. उत्तरार्चिकम् ३. ग्रामे गेयम् ४. अरण्ये गेयम् ५.ऊहगानम् ६. रहस्यगानम् ७. पूर्वार्चिकपदपाठः ८. उत्तरऋक्पदपाठः ९. स्तोभपदपाठः १०. ताण्ड्यब्राह्मणम् ११. षड्विंशब्राह्मणम् १२. सामविधानब्राह्मणम् १३. आर्षेयब्राह्मणम् १४. देवताध्यायब्राह्मणम् १५. छान्दोग्योपनिषद् ब्राह्मणम् १६. संहितोपनिषद् ब्राह्मणम् १७. वंशब्राह्मणम् १८. द्राह्यापाण श्रौत सूत्रम् १९. अनुपदसूत्रम् २०. निदानसूत्रम् २१. आर्षेयकल्पसूत्रम् २२. उपग्रन्थसूत्रम् २३.क्षुद्रकल्पसूत्रम् २४. तन्दालक्षणम् २५.पञ्चविधसूत्रम् २६.कल्यानुपदसूत्रम् २७. अनुस्तोत्रसूत्रम् २८. ऋक्तंत्रम् २९. सामतंत्रम् ३०. अक्षरतंत्रम् ३१. पुष्पसूत्रम् ३२. नारदीया शिक्षा ३३. लोमशी शिक्षा ३४. गौतमीया शिक्षा ३५. गायत्रविधानम् ३६. स्तोभानुसंहारः ३७. मात्रालक्षणम् ३८. उपनिदानम् ३४. लघुऋक्तन्त्रसंग्रहः ४०. आर्षेयप्रदीपः ४१. नैगम् ४२. सप्त लक्षणम् ४३. अवग्रहसूत्रम् ४४. पूर्वऋक्पदहितवाक्यम् ४५. उत्तरऋक्पदहितवाक्यम् ४६. आर्चिकलक्षणम् ४७. पूर्वार्चिकच्छलाक्षरम् ४८.उत्तरार्चिकच्छलाक्षरम् ४९.पूर्वऋकपदच्छलाक्षरम् ५०. उत्तरऋक्पदच्छलाक्षरम् ५१. प्रकृतिसामच्छलाक्षरम् ५२. ऊहरहस्यच्छलाक्षरम् ५३. छलप्रक्रिया ५४. छलाक्षरकारिका ५५. सामप्रकाशनम् ५६. गीतिकल्पपरिशिष्टम् ५७. ऊहरहस्यसामप्राकाशिका ५८. धारिलक्षणम् ५९. वर्णक्रमलक्षणम् ६०. खादिरगृह्यसूम् ६१. पितृमेधसूत्रम् ६२. गौतमधर्मसूत्रम् ६३. गौतमसूत्रपरिशिष्टम् ६४. गृह्यपरिशिष्टम् ६५. कर्मप्रदीपः ६६. शाट्यायनकारिका ६७. वामनकारिका ६८. पितृमेधकारिका ६९. गृह्यसंग्रहः ७०. प्रयोगमणिदर्पणम् ७१.पुरुषोत्तमः भट्टीयम् ७२. छन्दोगप्रयोगदीपिका ७३. श्रीनिवासदीक्षितीयम् ७४. शय्यारप्रयोगः ७५. क्रतुप्रायश्चित्तकारिका ७६. श्रौतकारिका ७७. क्रतुसंग्रहकारिका ७८. ग्रन्थसारशिक्षा ७९. सामवेदसर्वानुक्रमणी ८०. गौतमस्मृतिः ८१. रावणभेट ८२. अग्न आयानुदात्तम् ८३. औकियक्यम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८४. छन्दोगऋक्स्वरलक्षणम् ८५. क्रतुमाला ८६. उत्तरऋग्लक्षणम् ८७. उद्गीथसूत्रम् ८८. ऊहभाष्यम् ८९. ऊहसामपरिगणनम् ९०. पादविधानम् ९१. पूर्वऋक्कारिका ९२. पूर्वऋक्पदलक्षणम् ९३. पूर्वोत्तरऋङ्निघातकारिका ९६. पूर्वोत्तरोभयदीर्घी ९५. सामसंग्रहः ९६. सामस्वरनिर्णयः ९७. सायणीयसामसम्बन्धिश्लोकसंग्रहः । इति सामसम्बन्धिग्रन्थाः । इतोऽपि ग्रन्थाः वर्तितव्या इति विश्वसिमः । तथा सर्ववेदसाधारणग्रन्थाः षट् । चैवम्पाणिनीया शिक्षा, अष्टाध्यायीसूत्रपाठः, पिंगलच्छन्दसूत्रम्, निरुक्तम्, लगधज्योतिषम्, चरणव्यूहम् इति । एवं अत्र ग्रन्था नामतो निर्दिष्टाः। एषु केचन उपलभ्यन्ते अपरे केचन नोपलभ्यन्ते । उपलब्धेष्वपि केचन मुद्रिताः अमुद्रिताश्च बहवः सन्ति । मुद्रितेष्वपि अलभ्याः बहवो वर्तन्ते अमुद्रितेषु च दिने-दिने शैथिल्यं प्राप्नुवन्तः अपि केचित् ।

एवं राणायनीयशाखाया ग्रन्था उक्ताः । कौथुमशाखाया अपि पूर्वोक्ता एव गन्थाः । परं तत्र ग्रन्थद्वयमऽस्ति विशेषः । श्रौतसूत्रे लाट्यायन श्रौतसूत्रम् , गृह्ये च गोभिलगृह्यसूत्रमिति च विशेषः कौथुमानाम् इति । ''द्विपञ्चाशदिमे ग्रन्थाः'' इति यत् पूर्वमभिहितम् ततोऽवगम्यते । परन्तु दक्षिणदेशीयाः कौथुमाः द्राह्यायणश्रौतसूत्रं खादिरगृह्यसूत्रं च अधीयते । उत्तरदेशीयास्तु कौथुमाः लाट्यायनं गोभिलगृह्यं च अधीयते । कथमेतत् विपरिणतमिति न ज्ञायते । बहोः कालत एव एवमेवाध्ययनं प्रचलति । कतरस्साधीयानिति प्रामाणिका वैदिका एव जानीयुः ।

(१३) सामवेदस्वरूपविमर्शः

अथेदानीं सामवेदमधिकृत्य विचार्यते । सोऽयं सामवेदः परब्रह्मणः सर्वेश्वरस्य निःश्वासभूतेष्वन्यतमः, ''साम हि सत्याशीः'' (ता. ब्रा. १५/५/१२) इति अवितथफलप्रदत्वेन प्रसिद्धश्च । यं च भगवान् सर्वेश्वरः श्रीकृष्णः श्रीमद्भगवद्गीतायां ''वेदानां सामवेदोऽस्मि'' इति स्वविभूतित्वेन परिगणयामास । यश्च श्रुतिषु स्मृतिषु तथा अन्येषु च ग्रन्थेषु परां प्रशंसाकोटिमारुढो विराजते । सोऽयं सामवेदः सहस्रशाखात्मक इति अभिहितम् । तथा वर्तमानानां शाखानां विचारः, कुत्र का शाखा प्राचुर्येणाध्ययनपरम्परायामस्तीत्यपि विचारितम् । तदत्र किञ्चिद् विशदतया निबध्यते । यदाह भगवान् पतञ्जलिः ''सहस्रवर्त्मा सामवेद'' इति तत्र सहस्रशाखानां नामान्यपि क्वचिदपि ग्रन्थेषु नोपलभ्यन्ते । पूर्वम् अनध्यायेष्वपि वेदाध्ययनं कुर्वन्त आसन् वैदिकाः । तेषामेतादृशं धर्मविरुद्धं कर्म दृष्ट्वा क्रुद्ध इन्द्रः तान् जघानेति स्पष्टीकृतं चरणव्यूहस्य तृतीयकाण्डे । तत्र च अवशिष्टा ये शाखाभेदाः तानशेषान् प्रवक्ष्यामि इत्युपक्रम्य पर्यगणयन्महर्षिः शौनकः । तेषु तिस्र एव शाखाः सम्प्रति अध्ययनपरम्परायामुपलभ्यन्ते । चरणव्यूहरचनाकाले यथा कालक्रमेण तत्तच्छाखाध्येतॄणां नाशः समजनि, तथा चरणव्यूहरचनाकालतः एतावत्कालपर्यन्तं कालक्रमेण चरणव्यूहरचनाकाले समुपलब्धानां शाखानामध्येतॄणां नाशः समजनि । तत्र केवलं तिसृणां शाखानामध्येतारः सम्प्रति सन्ति । ताश्च शाखाः कौथुमी, राणायनीया, जैमिनीया इति । सम्प्रति एतासामपि शाखानामध्येतारो विरलाः । तत्र राणायनीय- जैमिनीयापेक्षया कौथुमशाखाध्यायिनः किञ्चिदेवाधिकाः । तत्र गुर्जरदेशे कौथुमशाखायाः प्रचारः महाराष्ट्रे राणायनीयशाखायाः तथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्णाटके जैमिनीयशाखायाश्च प्रचार इति चरणव्यूहव्याख्यायां कात्यायनश्रौतसूत्रभूमिकायां च प्रपञ्चितम् । इदानीं तमिलनाडुप्रदेशे प्राचुर्येण काश्यां किञ्चित् अन्यत्र च क्वचित् कौथुमशाखाया अध्ययनं, कर्णाटके आन्ध्रे च क्वचित् राणायनीयशाखायाः, केरले तथा तमिलनाडुप्रदेशान्तर्गत-श्रीरंगसमीपे च जैमिनीयशाखायाश्च अध्ययनं प्रचलति । तिसृणामपि शाखानां महान् भेदो वर्तते । तत्र कौथुम-राणायनीययोः किञ्चिदिव न्यूनो भेदः । कौथुमशाखायामेव तमिलनाडुप्रदेशगतानां काशीस्थानां च गानशैली भिद्यत एव । तथा राणायनीयजैमिनीयशाखयोरपि देशभेदेन गानशैली भिद्यते ।

(१४) गान-भागः

अथ गानभागः प्रस्तूयते । तत्र गाने ग्रामगेयम् अरण्यगेयम् इति गानद्वयं गानसंहितेत्यभिधीयते। सेयं संहिता सप्तगानात्मिका । सप्तगानानि यथा–

गायत्रं प्रथमं गानम् आग्नेयं तु द्वितीयकम् ।
तृतीयमैन्द्रगानं स्यात् पावमानं चतुर्थकम् ।।
अर्क द्वन्द्व वतं चेति त्रीणि पर्वाणि पंचमम्।
षष्ठं च शुक्रियं गानं महानाम्नीति सप्तमम्।
एतानि सप्त गानानि प्रकृतेः कथितानि वै ।

(सा०स० २-४श्लोक)

एकसामात्मकं प्रथमं गानं गायत्रम् । द्वितीये गाने अग्निदेवतात्मकमंत्रबाहुल्यात् तस्य आग्नेयमितिव्यवहारः । तृतीयमैन्द्रं गानम् । तत्रैव बहुसामि , एकसामि, बृहती, त्रिष्टुप्, अनुष्टुप्, इन्द्र पुच्छम् इति साम्प्रदायिको विभागः । चतुर्थं गानं पवमानदेवतात्मकम् अर्थात् सोम देवतात्मकम् । अतस्तस्य पावमानमिति नाम । एतानि चत्वारि गानानि ग्रामे गेयानि । तथा अर्क -द्वन्द्व -व्रताख्यानि त्रीणि पर्वाणि पञ्चमं गानं न भाञ्जि भवन्ति । प्रथमे पर्वणि साम्नाम् अर्क इति प्रायशो नाम भवति । यथा स्वाशिरामर्कः, दीर्घतमसोर्कः इत्यादि । तस्मात् अर्कपर्वेति व्यवह्यते । द्वितीये पर्वणि सर्वाण्यपि सामानि प्रायेण द्वन्द्वरूपाणि, यथा - भर्गयशसि द्वे यामे द्वे इत्यादीनि । अतो द्वन्द्वमिति व्यपदिष्यते । तृतीये व्रतशब्देन साम्नां निर्देशात् तृतीये वाचो व्रते द्वे सोमव्रतम् इत्येवं व्रतशब्देन साम्नां निर्देशात् व्रतपर्वेत्यभिधीयते । तथा सूर्यदेवतास्तुत्यात्मकं शुक्रियं पर्व षष्ठं गानम् । शुक्र शब्दस्य तेजोवाचकत्वात् सूर्यस्य च तेजोराशिरूपत्वात्, तत् स्तुतिपूर्णं पर्व शुक्रियं । सप्तमं च गानं महानाम्नी नामकम् । अस्य पर्वणः नामान्तराण्यपि सन्ति। तानि आर्षेयताण्डय ब्राह्मण यानिर्दृष्टानि । एतानि पञ्चमषष्ठसप्तमगानानि अरण्ये गेयानि । ग्रामगेयगाने सप्तदश प्रपाठकाः सन्ति । तत्र सप्तनवत्युरशताधिकैसहस्रं सामानि गीयन्ते । अरण्ये गेयगाने षठ् प्रपाठकाः विद्यन्ते । नवत्युत्तरद्विशतं सामानि च गीयन्ते । महानाम्न्यां च पंच सामानि सन्ति । भारूण्डाख्यं साम परिशिष्टरूपेण वर्तते ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१५) गानविषयः

एवं बृहदाकारकस्य सामवेदस्य गानं पुरस्कृत्यैव सर्वे ग्रन्था वर्तन्ते । एवं खलु महर्षिः जैमिनिः स्मरति- 'गीतिषु सामाख्येति ।' मंत्राणां मध्ये यः गीतिरूपः स सामशब्दवाच्यः इत्यर्थः । साम्नां च क्रुष्टादयः सप्त स्वराः मुख्याः । अभिगीतादयो विशेषस्वराश्च वर्तन्ते । ऋषिच्छन्दोदैवतान्यपि सन्ति । तत्र ऋषीणां परिज्ञानार्थं आर्षेयाभिधमेकं ब्राह्मणमस्ति । छन्दोदैवतानि तु यच्छन्दस्यायामृचि गीयते तदस्य छन्दः, ''यद्देवत्यायां सास्य देवता'' इति निदानवचनात् ऋचो यच्छन्दः या च देवता सैव साम्नोऽपि भवति । साम्नां देवताप्रकाशनार्थं देवताध्यायाभिधं ब्राह्मणमस्ति । तत्र निधनभेदेन साम्नां देवताभेदः प्रतिपादितः । परं तदनुसारमध्ययनपरम्परायां देवताः न स्मर्यन्ते । पूर्वोक्तनिदानवचनानुसारेणैव देवतानां स्मरणं विधीयते । स्वरानधिकृत्य स्वरविमर्शे प्रपञ्चयिष्यते।

गानं च त्रिविधम्, सामान्यतः ''ऋच्यध्यूढ साम गीयते'' इति ऋक्ष्वेव सामगानं भवति । क्वचित् ऋग्व्यतिरिक्तेष्वपि वर्णसमूहेषु साम गीयते । तादृशा ऋग्व्यतिरिक्ता अधिका वर्णाः स्तोभा इत्युच्यन्ते । लोके स्तोभ इत्यस्य अनर्थक इत्यर्थो दृश्यते । न तथात्र मन्तव्यम् । इमे च स्तोभाः अर्थवन्तः । स्तोभश्च त्रिविधः - अक्षरस्तोभः, पदस्तोभः, वाक्यस्तोभश्च इति । तत्र - ''औ'' ''हो'' ''वा'' ''हा'', इत्यादयः अक्षरस्तोभाः । ''अश्वाः'', ''गावः'' इत्यादयः पदस्तोभाः । ''अति विश्वानि दुरितातरेम'' इत्यादयः वाक्यस्तोभाः । तत्र गानं च केवलम् ऋक्षु अर्थात् स्तोभं विनैव गानमिति, ऋग्विहीनकेवलस्तोभेषु, स्तोभसहितर्क्षु चेति त्रिविधं गीयते । तत्राद्यस्य आविर्गानमिति, द्वितीयस्य छन्नगानमिति, तृतीयस्य लेशगानमिति च व्यवहारः छन्दोगसम्प्रदाये । तथाचात्र श्लोकः-

ऋग्विहीनं छन्नगानं लेशं स्तोभमृचा सह ।
आविर्गानं स्तोभहीनम् एवं गानत्रयं विदुः ।।

(सा.तं.पो.। पृ.)

तत्र आविर्गानस्य उदाहरणम् - **आवोराज्ञा** - (सा.११३)
छन्नगानस्य - **हुवेवाचाम्** - (आ.१६७ सा)
लेशगानस्य - **ओग्नाई** - (सा. १) इत्यादि ।

एवं साम्नां पञ्च वा सप्त वा भक्तयः सन्ति । भक्तिरिति साम्नोऽवयवस्य संज्ञा - ताश्च भक्तयः प्रस्तावउद्गीथप्रतिहारउपद्रवनिधनाख्याः पञ्च । एतासु पञ्चसु भक्तिष्वेव स्वाध्यायोऽधीयते । यज्ञे तु हिंकारौंकाराभ्यां साप्तविध्यं सम्पद्यते । तत्र प्रस्तावात् पूर्वं हिंकारः, उद्गीथात् पूर्वम् ओंकार इति च नियमः । यज्ञे एताः सप्त भक्तीः प्रस्तोतृ- उद्गातृप्रतिहर्तृनामकाः त्रय ऋत्विजः पृथक्-पृथक् गायेयुः । तत्रादौ हिंकारः सर्वेगेयः । ततः प्रस्तोता प्रस्तावभक्तिं गायते । उद्गाता च ओंकारपूर्वकमुद्गीथभक्तिं गायेत्। प्रतिहर्ता प्रतिहारभक्तिं गायेत् । पुनरुद्गातैव उपद्रवभक्तिं गायेत् । अन्ते सर्वैः मिलित्वा निधनं गेयम् ।

किञ्च सामसु द्विमात्रिकस्याक्षरस्य दीर्घमिति, त्रिमात्रिकस्याक्षरस्य वृद्धमिति प्लुतमिति वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यवहारः । यदक्षरं "र" इत्यक्षरेण शून्यचिह्नेन वा अङ्कितं तत् द्विमात्रिकमिति ज्ञेयम् । एतच्चिह्नद्वयरहितं दीर्घाक्षरं त्रिमात्रिकमिति ज्ञेयम् अर्थात् वृद्धमिति ज्ञेयम् । तथा सामसु वैदिकाः यत्र विरम्य पठन्ति तत् पर्व इत्यभिधीयते । एवं पर्वमध्यस्थितोऽच् पर्वान्ते विद्यमानोऽच् व्यञ्जनं विसर्गश्च, पर्वमध्ये विद्यमानं स्थितसन्धिसंज्ञकं व्यञ्जनं च विवृत्तिरित्यभिधीयते । विवृत्तेः मात्रा इति संज्ञान्तरमप्यस्ति। प्रत्येकसाम्नः अन्ते तत्साम्नि कति दीर्घाणि कति पर्वाणि कति विवृत्तयः इति गणयित्वा गूढमक्षरं निर्दिश्यते । गूढाक्षरेण तेन दीर्घपर्वविवृत्तीनां संख्याबोधकरुपोऽर्थः ज्ञायते । तादृशगूढाक्षरप्रकाशको ग्रन्थः छलाक्षरनामकः प्राक्ग्रन्थपरिगणनावसरे प्रदर्शितः । एवं गानविषयेण साकं सामवेदस्वरूपं विमृष्टम् ।

(१६) सामवेदस्वरविमर्शः

सम्प्रति स्वरानधिकृत्य विचार्यते - स्वरशब्दश्च स्वयं राजते इति व्युत्पत्या अचां वाचकः । तन्मात्रवृत्तित्वादुदात्वादीनां, षड्जत्वादीनां, क्रुष्टत्वादीनां च धर्माणां, तेऽपि उपचारात् स्वरशब्देन व्यवह्रियन्ते । ते च स्वराः ध्वनिगताः सन्तः वर्णेष्ववभासन्ते ।

अत्रेदं विचार्यते, — प्रायेण शब्दो द्विविधः वर्णात्मको ध्वन्यात्मकश्चेति । स च सर्वेषां "श्रृणोमि" इति प्रतीतिसाक्षिकः श्रोत्रजन्यप्रत्यक्षविषयः । तत्र वर्णात्मकः अकार-ककारादिरूपः मीमांसकमते नित्यः, विभुः आकाशवत् सर्वव्यापकः । स च ध्वनिना अभिव्यज्यमानोऽस्माकं श्रवणगोचरो भवति, नान्यथा । ध्वनिश्चवर्णव्यतिरिक्तः "आत्मा बुद्धा समेत्यार्थान्" इत्यादिशिक्षोक्तदिशा कण्ठताल्वभिघातजन्यः, । स च वेणुवीणादिवादनस्थले वर्णभावेऽपि स्पष्टं प्रतिभासते इति तद्भिन्नः । कुत्रचित्, वेदवाक्यानुकारिवीणादिवादनस्थलेऽपि वर्णोत्पत्तिकारणत्वेन शिक्षोक्तस्थानकरण-प्रयत्नाद्यभावात् तत्र वर्णत्वं न स्वीक्रियते । स च ध्वनिः उच्चारणजन्यः क्षणिकः । स च तत्तत्स्थानकरणप्रयत्नविशेषेण उदात्तत्वम्, अनुदात्तत्वम्, मन्द्रत्वं, मध्यत्वं, तारत्वं, मृदुत्वम्, अनुनासिकत्वम् इत्यादिधर्मविशिष्ट एवोत्पद्यते । ध्वनिगताश्च ते ते धर्माः तदभिव्यंग्यवर्णेष्वपि भान्ति ।

तत्र वर्णात्मकोऽपि शब्दः स्वरव्यञ्जनभेदेन द्विविधः । अकारादयः स्वराः, अन्यानि व्यञ्जनानि । अकारादीनां स्वरत्वं स्वयं राजन्ते इति स्वराः इति व्युत्पत्त्या व्यञ्जनं विनापि प्रतीयमानत्वात् । व्यञ्जनं तु स्वरं विना न क्वापि प्रतीयते । एवं सति स्वरशब्दोऽयम् - उदात्तादयः स्वराः, षड्जादयः स्वराः, क्रुष्टादयः स्वराः, अचः स्वराः, कण्ठस्वरः इत्येवं बहुधा व्यवह्रियते । तत्र "अन्याय्यमनेकार्थत्वम्" इति न्यायात् न विभिन्नप्रवृत्तिनिमित्तकोऽयम्, किन्तु एकत्र शक्त्या, इतरत्र लक्षणादिनेति युक्तम् । तत्र स्वयं राजन्त इति व्युत्पत्त्या व्यञ्जनोच्चारणानपेक्षोच्चारण-कत्वरूपप्रवृत्तिनिमित्तेन अचसंज्ञकवर्णेषु मुख्यः । उदात्तादयस्तु ध्वनिधर्मोऽपि पूर्वोक्तस्वरमात्रवृत्तितया प्रतीयमानत्वात् स्वरशब्दभाजो भवन्ति । न हि उदात्तत्वादिकं व्यञ्जनेषु प्रतीयत इति । यद्वा स्वरशब्दः स्वृधातोः निष्पन्नः उदात्तादिषु मुख्यः । तद्वत्वेन प्रतीयमानेषु वर्णेषु गौणः । सर्वथापि स्वरशब्दस्य न यौगिकत्वं स्वीकर्त्तव्यम् किन्तु योगरूढत्वम् । तेन सर्वातिप्रसङ्गवारणम् । अत्रायं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्लोकोऽप्यनुसन्धेयो वर्तते -

''श्रुत्यनन्तरभावी यः शब्दोऽनुरणनात्मकः ।
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ।। इति ।।

(सं.र.१/३/२४)

(१७) गानस्वरभेदाः

प्रकृतमनुसरामः । तत्र उदात्तः, अनुदात्तः, स्वरितश्चेति त्रयः स्वराः सार्ववैदिकाः । अत्रैव विशेषस्वरा अपि तत्तद्वेदीयप्रातिशाख्यादिषु अभिहिताः । षड्ज-ऋषभ-गान्धार-मध्यम-पंचम-धैवत-निषादाख्याः सप्त स्वराः संगीतशास्त्रे प्रसिद्धाः । सामवेदे तु क्रुष्ट -प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्र-अतिस्वार्याख्याः सप्त स्वरा भवन्ति । तथा च सामविधाने श्रूयते - (सा.ब्रा.१/१/१४) ''क्रुष्ट प्राजापत्यो ब्रह्मो वा वैश्वदेवो वा आदित्यानां प्रथमः साध्यानां द्वितीयोऽग्नेस्तृतीयो वायोश्चतुर्थः सौमो मन्द्रो मित्रावरुणयोरतिस्वार्यः'' इति । एवं स्वरप्रदर्शनेन सह तेषां देवता अपि उक्ताः । तथा वृहद्देवताकारः शौनकोऽपि -

''वैश्वदेवः स्वरः क्रुष्टो नित्यं यो मूर्ध्नि तिष्ठति ।
तालव्यः प्रथमः साम्नां स्वर आदित्यदैवतः ।।
स्वरो द्वितीयस्साध्यानां भ्रुवोर्देशं समाश्रितः ।
आश्विनस्तु तृतीयोऽत्र स्वरः कर्णो समाश्रितः ।।
चतुर्थस्त्वत्र वायव्यो नासिक्यः स्वर उच्यते ।
पञ्चमास्तु स्वरः प्रोक्तः चाक्षुषः सूर्यदैवतः ।।
यस्तु सामस्वरः षष्ठः स सौम्यो मन्द्र उच्यते ।
विकर्षेण तु मन्द्रस्य युक्तोऽतिस्वार्य उच्यते ।।
स मैत्रावरुणो ज्ञेयो मन्द्रस्थानसमाहितः ।
सामस्वराणां सप्तानामेते देवा इहोदिताः ।।

(बृ.दे. ८/११६-१२१)

इति ब्रवीति । अत्रेदं विवेचनीयम् ''पञ्चमस्तु स्वरः प्रोक्तः इति बृवता शौनकेन क्रुष्टं विहाय प्रथमात् यः पंचमः स्वरः तस्य सूर्यो देवता इत्युक्तम् । क्रुष्टं विहाय प्रथमात् पञ्चमस्वरस्यैव ''मन्द्रः'' इत्यपि नामान्तरम् । एवं तर्हि ''यस्तु सामस्वरः षष्ठः'' इति वदन् शौनकः मंद्रस्य सोमदेवताकत्वमित्यपि स्मरति । ब्राह्मणशौनकवचनयोः यदन्तरं विद्यते तत् प्रामाणिका आलोकयन्तु ।

किञ्च षड्जादीनां स्वराणां यौगिकत्वं यथा शार्ङ्गदेवेन प्रदर्शितम् न तथा क्रुष्टादीनां यौगिकत्वं दृश्यते । अपि च रूढत्वमेव । रूढत्वेऽपि ''तद्योऽसौ क्रुष्टतम इव साम्नः स्वरः तं देवा उपजीवन्ति'' (सा.ब्रा. १/१/८) इत्यादि श्रुतिरेव प्रमाणम् । षड्जादीनां यौगिकत्वं यथा -

षण्णां स्वराणां जनकः षड्भिर्वा जन्यते स्वरैः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षड्भ्यो वा जायतेऽङ्गेभ्यः षड्ज इत्यभिधीयते ।।
प्राप्नोति हृदयं शीघ्रमन्यस्मादृषभः स्मृतः ।
स्त्रीगवीषु यथा तिष्ठन् विभाति ऋषभो महान् ।।
स्वरग्रामे समुत्पन्नः स्वरोऽयमृषभस्तथा ।
वाचं गानात्मिकां धत्त इति गान्धारसंज्ञकः ।।
स्वराणां मध्यमत्वाच्च मध्यमः स्वर उच्यते ।
स्वरान्तराणां विस्तारं यो मिमीते स पञ्चमः ।।
पाठक्रमेण गणने संख्यया पञ्चमोऽथवा ।
धीरस्यास्तीति धीवांस्तत्सम्बन्धी धैवतः स्मृतः ।।
यद्वा -
षष्ठस्थाने च्युतो यस्मात्ततोऽसौ धैवतो मतः ।
निषीदन्ति स्वरास्सर्वे निषादस्तेन कथ्यते ।।

इति शार्ङ्गदेवेन स्वीये संगीतरत्नाकरे स्पष्टीकृतम् । तथा सामवेदीयशिक्षाकारो नारदोऽपि एवं निर्वक्ति -

नासाकण्ठमुरस्तालुं जिह्वां दन्तांश्च संश्रितः ।
षड्भिस्सञ्जायते यस्मात् तस्मात् षड्ज इति स्मृतः ।।
वायुस्समुत्थितो नाभौ कण्ठशीर्षसमाहतः ।
नर्दत्यृषभवद्ध्यस्मात् तस्मादृषभ उच्यते ।।
वायुस्समुस्थितो नाभौ कण्ठशीर्षसमाहतः ।
नासागन्धावहः पुण्यो गान्धारस्तेन हेतुना ।।
वायुस्समुत्थितो नाभौ रुरोहृत्कण्ठ - शिरोहतः ।
नाभिं प्राप्तो महानादो मध्यमत्वं समश्नुते ।।
पञ्चस्थानस्थितस्यास्य पञ्चमत्वं विधीयते ।।
अति सन्धीयते यस्मादेतान्पूर्वोत्थितान्स्वरान् ।
तस्मादस्य स्वरस्यापि धैवत्वं विधीयते ।।
निषीदन्ति स्वरा यस्मान्निषादस्तेन हेतुना ।
सर्वांश्चाभिभवत्येष यदादित्योऽस्य दैवतम् ।।

(ना.शि. १/५/७/११-१९-२०)

एवमेतेषां षड्जादीनां स्वराणां सामवेदस्वरप्रभवत्वं संगीतरत्नाकरेण स्पष्टीकृतम् । अत्र क्रुष्टादीनां सप्तस्वराणां षड्जादीनां च सप्तस्वराणां विन्यासं स्वीयशिक्षायां प्रदर्शयति नारदः -

"यस्सामगानां प्रथमः स वेणोर्मध्यमः स्वरः ।
यो द्वितीयस्स गान्धारः तृतीयस्त्वृषभः स्मृतः ।।
चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः'' ।।इति।।

(ना.शि. १/५/१-२)

अस्य पट्टिका एवं:- वैदिकलौकिकगानयोः सामान्यतः स्वरक्रमस्त्वेवम् : -

वैदिकगाने - ..	**लौकिकगाने**	**साम्नि क्रमः** ...	**संगीते क्रमः**
प्रथमः	मध्यमः	क्रुष्टः.............	षड्जः
द्वितीयः..........	गान्धारः	प्रथमः	ऋषभः
तृतीयः...........	ऋषभः	द्वितीयः..........	गान्धारः
चतुर्थः	षड्जः	तृतीयः...........	मध्यमः
पञ्चमः	धैवतः	चतुर्थः	पञ्चमः
षष्ठः.............	निषादः	मन्द्रः	धैवतः
सप्तमः(क्रुष्टः) ...	पञ्चमः	अतिस्वार्यः.......	निषादः

तत्र सामवेदे अत्युच्चः क्रुष्टस्वरः, अति नीचश्च अतिस्वार्थस्वरः । अन्ये प्रथमादिमन्द्रान्ताः स्वराः उत्तरोत्तरं नीचाः, पूर्वपूर्वमुच्चाश्च भवन्ति । एवं संगीतशास्त्रे स्वराणाम् उच्चनीचविधौ नियामकत्वं न दृश्यते । साम्नि यः क्रुष्टस्वरः कथितः तस्योच्चारणं तु प्रथमस्वरसमानमेव परिदृश्यते । प्रथमस्वरादुच्चतया उच्चारणीयः क्रुष्टस्वरः । परं साम गायताम् उच्चारणे उच्चत्वं न ज्ञायते । अथवा उच्चत्वेनोच्चार्यमाण एव सन् क्रुष्टस्वरः सौक्ष्म्यात् श्रोतृभिर्वा न बुध्यते । किञ्च क्रुष्टातिस्वार्याभ्यां स्वराभ्यां सामारम्भो नास्ति एवमेव अतिस्वार्येण स्वरेण पर्वारम्भोऽपि नास्ति । क्रुष्टात् तु पर्वारम्भो भवति त्रिषु स्थलेषु । छन्दोगाः यत्र विरम्य पठन्ति तत् पर्वेत्यभिधीयते । तथा क्रुष्टातिस्वार्यान्तेषु सप्तसु स्वरेषु गीयमानं सामद्वयस्य द्वयोः स्थानयोरुपलभ्यते । यथा - **मो षु त्वा वा घतश्चनाऽ ६ऍ** । (वे. गा. ४९२) **होँउ होँउ होँउ । हाऽ २इ । ऊऽ २** ।(आ.गा.२३९सा.) इति । तदपि कौथुमशाखायामेवेति वररुचिः सामप्रातिशाख्ये पुष्पसूत्राभिधे ''सप्तसु द्वे तु कौथुमाः'' इति पद्येनाह । (पु.सू.९.२.२) ।

अत्रापरो विशेषः प्रस्तूयते । राणायनीयशाखायां क्रुष्टस्वरस्य व्यवहारो नावलोक्यते । तस्यामतिस्वारस्वरादान्तरं परिस्वार इति स्वरः सप्तमत्वेन व्यवह्रियते । अत्र च ''क्रुष्टप्रथमयोरेकत्वेन परिस्वार्यान्ताः सप्त स्वरा वेदितव्याः'' इति सामतन्त्रसंग्रहकारवचनं प्रमाणम् । अत एव परिभाषाकारः क्रुष्टस्वरस्य पृथक्तया परिभाषाक्षरं न न्यबध्नात् । अपि तु प्रथमस्वरस्य ''क'' इति यत् परिभाषाक्षरं तदेव क्रुष्टस्य स्थानेऽपि निरदर्शयत् । परिभाषापाठो नाम कायैर्व्यजनैरेव यत्र स्वरप्रदर्शनं भवति स परिभाषापाठ इति । सोऽयं परिभाषापाठः राणायनीयशाखीय इत्यत्र बहूनि प्रमाणानि सन्ति । कौथुमशाखायास्तु उपरि अङ्कप्रदर्शनरूपः पाठः, जैमिनीयशाखाया अपि उपरि अक्षरप्रदर्शनरूपः एव पाठः । परं राणायनीयशाखातोऽत्यन्तं भिन्न एव क्रमः । कौथुमशाखायाम् उपरि स्वराङ्कः एवं विन्यस्यते ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वरः	स्वरचिह्नम्	उदाहरणम्
क्रुष्टः	*११	*११ ॐ
प्रथमः	१	१ तयाइ
द्वितीयः	२	२ इन्द्रंविश्वाः
तृतीयः	३	३ र समी
चतुर्थः	४	४ हिताः
मन्द्रः (पञ्चमः)	५	५ र अग्निंदूताम्
अतिस्वार्यः	६	४र ५ ओवा ऽ६

अन्यश्च क्रुष्टस्वरस्य सर्वापेक्षयोच्चत्वात् क्रुष्टस्वरेण सामान्तो नास्ति, पर्वान्तस्तु भवति । यथा - *११ ॐ । हो । इत्यनयोः स्थलयोः "आद्यन्तवदेकस्मिन्" इति न्यायात् पर्वान्तत्वं सिध्यति । एवमतिस्वार्थस्वरस्य सर्वापेक्षया नीचत्वात् तेन स्वरेण पर्वारम्भो नास्ति, सामारम्भस्तु नास्तीति प्रागेवाऽभिहितम् । अतिस्वार्येण समाप्तानि बहूनि पर्वाणि सामानि चोपलभ्यन्ते, अतिस्वार्यमध्यस्थान्यपि पर्वाणि बहूनि । एषां सप्तानां स्वराणां स्वतन्त्राणां परस्परं मिलितानां चोच्यावचं स्वरूपमुपलभ्यते । प्रथमादिमन्द्रान्तैः स्वरैरारभ्यमाणानां साम्नां पट्टिका प्रदर्शयिष्यते ।

वेयारण्येगेयगानयोः		उहरहस्यगानयोः
प्रथमस्वरेण	१५९	२८२
द्वितीयस्वरेण	३३१	५४०
तृतीयस्वरेण	१५३	११५
चतुर्थस्वरेण	३२३	०५५
मन्द्रस्वरेण	५२७	१४९
आहत्यसंख्या	१४९३	११४१

एतेषां क्रुष्टादीनां स्वराणां स्थानानि नारदीयशिक्षायां बृहद्देवतायां च प्रदर्शितानि सन्ति ।

नारदमते		शौवकमते
क्रुष्टस्य	मूर्धा	+ "क" " एवं चिह्नसमानवोधकम्
प्रथमस्य	ललाटम्	तालु
द्वितीयस्य	भ्रुवोर्मध्यम्	+
तृतीयस्य	कर्णौ	+
चतुर्थस्य	कण्ठः	नासिका
मन्द्रस्य	रसना	चक्षुः (उरः)

अतिस्वार्यस्य हृदयम् खा '+' एवं चिह्नम् अभावबोधकम् अर्थात्तत्रानुक्तमिति-यावत् ॥

षड्जादीनां स्थानानि नारदीयशिक्षायां प्रदर्शितानि । यथा -

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षड्जस्य कण्ठ:, मध्यमस्य--------- उर:
ऋषभस्य शिर:, पञ्चमस्य--------- उरश्शिर: कण्ठा:
गान्धारस्य नासिका, धैवतस्य--------- ललाटम्
निषादस्य सर्वसन्धय:

स्वराणां देवताश्च प्राक् प्रपिदिता: । एवं स्वराणां देवतास्थानादीनि प्रतिपत्त्यैवोच्चारणीयम्, स्वराश्च अङ्गुलीभि: तत्तत्स्वरोच्चारणसमये शिक्षाद्युपदिष्टपथेन प्रदर्शनीया: । यथोक्तं नारदीयशिक्षायाम् : -

''अङ्गुष्ठस्योत्तमे क्रुष्टो ह्यङ्गुष्ठे प्रथमः स्वरः ।
प्रदेशिन्यान्तु गान्धार ऋषभस्तदनन्तरम् ।।
अनामिकायां षड्जस्तु कनिष्ठायान्तु धैवतम् ।
तस्याधस्ताच्च योऽन्यस्तु निषादं तत्र निर्दिशेत्''।।

।। इति ।। (ना.शि. १/७/३-४)

अत्र गान्धार: ऋषभ इत्यादि सङ्गीतस्वराणां निर्देशनं ''यस्सामगानां प्रथम'' इत्यादि स्वरविन्यासोक्तप्रकारेण तत्तत्सजातीयवैदिकस्वराणां ग्रहणार्थमिति ध्येयम् । स्वराणां विन्यसनञ्च अङ्गुलीनां मध्यरेखायां कार्यम् । एवं खलु प्रदिशन्ति शिक्षाकारा: -''अङ्गुष्ठाग्रेण ता नित्यं मध्यमे पर्वणि स्पृशेत्'' इति अत्रैवं निष्कर्ष: । क्रुष्टस्वरोच्चारणसमये अङ्गुष्ठं प्रथमस्वरस्याङ्गुष्ठावस्थानात् ईषदूर्ध्वं निक्षिपेत् । प्रथमस्वरस्योच्चारणे अङ्गुष्ठं तर्जनीयत: यवप्रमाणोर्ध्वम् आकाशे निक्षिपेत् । द्वितीयस्वरोच्चारणे प्रदेशिनीमध्यरेखायाम् अंगुष्ठस्यावस्थानम्; तृतीयस्वरस्य मध्यमामध्यरेखायां, चतुर्थस्य अनामिकामध्यरेखायां, मन्द्रस्वरस्य कनिष्ठिकामध्यरेखायाम्, अतिस्वार्यस्य च कनिष्ठिकामूलभागे अङ्गुष्ठावस्थानं कार्यम् । ननु ''अङ्गुष्ठाग्रेण तानित्यम्'' इत्यत: पूर्वं विरला नाङ्गुली: कुर्यान्मूले चैना न संस्पृशेदिति शिक्षाकारै: अङ्गुलिमूले स्वरविन्यसनस्य निषिद्धत्वात् कथम् अतिस्वार्यस्य कनिष्ठिकामूले अवस्थानं इति चेत् सत्यम् । सामान्यत: प्रतिषिद्धस्य विशेषतो विधानान्न दोष: । -

तथा अभिगीतविनतादीन् विशेषस्वरानङ्गुल्यग्रेण निर्दिशेयु: । अभिगीतादय: स्वरा उत्तरत्र स्फुटीक्रियन्ते । अभिगीतं तर्जन्यग्राङ्गुष्ठाग्रसंयोगेन विनतं तर्जन्यग्राङ्गुष्ठमध्यसंयोगेन, स्वारं मध्यमानामिकाकनिष्ठिकाग्रेषु अंगुष्ठाग्रसंयोगेन च निर्दिशेत् । स्वरस्य सम्प्रसारणमित्यपि अभिधानान्तरम् । नमनस्वरोच्चारणकाले अङ्गुष्ठेन तर्जनीं नमयित्वा मध्यमामध्यरेखायामङ्गुष्ठ: पातनीय: ।

अत्र अङ्गुलिस्वरविन्यसने वररुचिप्रदर्शितोऽप्येको मार्गोऽस्तीति विद्वद्वरेण्यपूज्यश्रीरामनाथदीक्षितै: आत्मना परिष्कृत्य सम्पादिते ऊहरहस्यगानपुस्तके भूमिकायां सुविमृष्टम् । वाररुचोऽङ्गुलिस्वर-विन्यासस्त्वेवम्, अङ्गुष्ठादिकनिष्ठान्तानि सप्तस्वराणां स्थानानि, अङ्गुष्ठमध्यमाकनिष्ठिका-नामग्रमध्यमूलानि क्रुष्टतृतीयातिस्वार्याणां स्थानानि तर्जन्यनामिकयोर्द्वे द्वे प्रथम-द्वितीय-चतुर्थ-मन्द्राणां स्थानानि । अङ्गुष्ठाग्र: क्रुष्टस्य । (तर्जन्या मूलमध्यरेखा मध्यमूलरेखा?) अत्र दीक्षितवर्याणां भूमिकानुसारं मूलमध्यरेखो एव दत्तम् । परम् अग्रमध्यरेखो भाव्यमिति तर्कयाम: यतो हि ''द्वे द्वे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति सामान्येनोक्तमत्वात्, "अङ्गुष्ठमध्यमे" त्यत्र अग्रमध्यमूलानीति आनुपूर्वीबलात् प्रथमे ये द्वे ते एव ग्राह्ये इति सम्प्रदायमपि शाखान्तरीयं संवीक्ष्य विवेचनीयम् प्रथमद्वितीययोः। मध्यमामध्यरेखा तृतीयस्य। अनामिका मध्यमूलरेखे चतुर्थमन्द्रयोः। कनिष्ठिकामूलरेखातिस्वार्यस्य। एवमुस्थानानि सप्तस्वराणां प्रोक्तानि वररुचिना। वैदिकाः नारदशिक्षोक्तदिशैवाधीयते अध्यापयन्ति च न वररुच्युक्तदिशा। वररुचिस्वरनिर्देशप्रकारः शाखान्तरेषु स्यादिति सम्भावयामः।

एवं हस्तेन स्वरनिर्देशपूर्वकमधीतो वेदः अध्यापकाध्येतारौ स्वाभीष्टेन फलेन संयोजयति। विपक्षे च महान्तं प्रत्यवायं जनयेदिति शिक्षावाक्यानि बोधयन्ति -

हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुस्सामभिर्दग्धो वियोनिमधिगच्छति॥

(पा.शि. १०/४/५)

फलमाहुः -

हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्।
ऋग्यजुस्सामभिः पूतो ब्रह्मलोके महीयते॥

अन्यच्च मन्त्रोच्चारणे प्रथमादिस्वरोच्चारणसमकालं पूर्वोक्तदिशा अङ्गुलीषु अङ्गुष्ठयोजनं कार्यम्। नादौ पश्चाद्वा। एवमेव द्रुतादिकया वृत्त्या पाठो यथा प्रारब्धः तथा मन्त्रस्समापनीयः। नत्वेकस्मिन्नेव मन्त्रे वृत्तिद्वययोजना कार्या। स्वरान्तरगमने स्वरादीनां भेदपरिज्ञानाभावेऽपि यत्र यत्र स्वरादिषु यावत्कालं वर्णाः प्रयुज्यन्ते तत्स्वरोच्चारणसदृशं तत्रैव हस्तन्यासादिकं कार्यं न ततो न्यूनमधिकं वा। नारद आह :-

निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन्।
सममुच्चारयेद्वर्णान् हस्तेन च मुखेन च।
यथैवोच्चारयेद्वर्णांस्तथैवैतान्समापयेत्॥

(१/६/१३/१४)

अन्यत्र च

स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ।
यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति॥

(या. शि. ४७-४८)

एवं वेदस्य यथावदुच्चारणं महतेऽभ्युदयाय भवति। मात्रयापि स्वरभेदकरणं वर्णानामर्थोच्चारणं वाऽनर्थाय कल्पते। स्वरभेदादर्थभेदो भवन्न समीहितं फलं प्रयच्छति। तद्यथा - अस्ति "अन्तः" इति पदमन्तोदात्तं, आद्युदात्त्वं च, "अ॒न्तः", "अन्तः॑" इति तत्र अन्तोदात्तं पदं मध्यम्, आद्युदात्तं पदम् अवसानं चाभिधति। यत्र मध्यं प्रतिपादनीयं तत्राद्युदात्तता अन्तशब्दस्य यदि क्रियते तदा वाक्यस्य पदानामनन्वयः अननुभावकत्वं वा स्यात्। ततश्च यथावदुच्चारणमेव साधु एवमादीनि बहूनि पदानि वेदे समुपलभ्यन्ते। एवं स्वरापराधेन मन्त्रप्रयोगोऽभिमतविघातहेतुर्भवति। अत्रैकं पुरावृत्तमप्यस्ति। पुरा विश्वरूपनामानं त्वष्टुः पुत्रमिन्द्रः जघान। स च हतपुत्रस्त्वष्टा कोपादिन्द्ररहितं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोमयागं कर्तुमुद्यतः । तस्मिन्यागे मामाह्वयेतीन्द्रेणोक्तः त्वष्टा तमिन्द्रं नोपाह्वयत् । स चेन्द्रो यज्ञस्य विघातं कृत्वा बलात्कारेण सोमं पीतवान् ।

तस्येन्द्रेण बलात्पीतस्य सोमस्य सम्बन्धिरसरूपं यदल्पमत्यशिष्यत तद् गृहीत्वा त्वष्टा आभिचारं कर्तुमाह्वनीयमुपेत्य होमेनाग्निं वैर्युत्पादनाय प्रवृत्तमकरोत् । तस्मिन् होमे मन्त्रमिममुच्चारितवान् "स्वाहेन्द्रशत्रुर्वर्धस्व" इति । तस्याऽयमर्थः । हे अग्ने ! तुभ्यमिदं स्वाहुतं, त्वं पुनरिन्द्रस्य शातयिता कश्चित् पुरुषो भूत्वा वर्धस्वेति । सोऽग्निर्यावता कालेनोर्ध्वज्वालारूपो भूत्वा पराभूतमिन्द्रं कर्तुमुद्यतो भवति तावति काले वह्निः स्वयमेव विरतोऽभवत् । ज्वाला शान्तेत्यर्थः। तत्र मन्त्रगतस्वरापराधो निमित्तम् । तथाहि, इन्द्रस्य शातयितेन्द्रशत्रुरितिविवक्षायां तत्पुरुषसमासस्यान्तोदात्तत्वेन भवितव्यम् । आद्युदात्तस्त्वयं शब्दः प्रयुक्तः । स च बहुव्रीहितां द्योतयति । (पा.सू.६.२.१) "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति पूर्वपदाद्युदात्तत्वविधानात् । सति बहुव्रीहाविन्द्रः शातयितायस्येत्यर्थो भवति । सोऽयं मन्त्रगतः स्वरापधोऽभिमतविघातहेतुरासीत् । तस्माद्यथावदुच्चारणमेव साधु ।

क्रुष्टादिसप्तस्वरापेक्षया विशेषस्वरा अपि सन्तीति यत् प्रागभिहितं तत् प्रस्तूयते । प्रत्युत्क्रमः, अतिक्रमः, कर्षणं, स्वारः इति एते विस्वराः विशेषस्वराः । एतेषां विस्वराणाम् प्रत्येकं स्वरे मात्रात्रयं भवतीति मात्रालक्षणे "विस्वरमक्षरं स्वरे स्वरे त्रिमात्रं भवति" इति (मा. ल. १/१६) सूत्रेण उक्तम् । तत्र प्रत्युत्क्रमोऽष्टविधो भवति ।

(१) अतिस्वारो मन्द्रं प्रत्युत्क्रामति परिस्वारे परे ।

अतिस्वारः मन्द्रं प्रति गत्वा पुनः यदा स्वस्थानं स्पृशति तदा तस्य परिस्वार" इति संज्ञा ।

उदाहरणं यथा - **कयाऽ३ स्थाऽ५ इराऽ६५६न्** । इति ।

(२) मन्द्रः चतुर्थं प्रत्युत्क्रामति ।

उदाहरणं यथा - **श्रायन्तइवसूऽ४ रायाम्** । इति ।

(३) चतुर्थः तृतीयं प्रत्युत्क्रामति ।

उदाहरणं यथा - **दूताऽ३०वोऽ३ विश्ववेदसाम्** । इति

(४) तृतीयो द्वितीयं प्रत्युत्क्रामति ।

उदाहरणं यथा - **हीऽ२३४षी** । इति

(५) द्वितीयः प्रथमं प्रत्युत्क्रामति । उदाहरणं यथा - **औहोऽ१इ** ।

(६) मन्द्रः चतुर्थमतिक्रम्य तृतीयं प्रत्युत्क्रमति सन्धिविषये । उदाहरणम् यथा - **सु नो त सो म पा । आ व्रा ओऽ२३४वा** । इत्यत्र यदि सन्धिः क्रियते तदा मन्द्रः चतुर्थं विहाय तृतीयं प्रत्युत्क्रामति । तदा एवं स्वरो भवेत् - **सु नो त सो म पा ऽ३व्रो ओऽ२३४ वा;** इति । सन्धिपाठः शाखान्तरे स्यादिति तर्कयामः ।

(७) मन्द्रः चतुर्थतृतीयस्वरावतिक्रम्य द्वितीयं प्रत्युत्क्रामति । उदाहरणं यथा - **बि भाऽ३ उ । अ भि प्रि या ऽ२** इत्यादिषु ।

(८) तृतीयो द्वितीयमतिक्रम्य प्रथमं प्रत्युत्क्रामति । उदाहरणम् यथा - **पुनाऽ३१**

एवं अतिक्रमः चतुर्विधो भवति । अतिक्रमो नाम अवरोहणगीतौ स्वरः क्रमेणोपनतं स्वरान्तरं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विहाय ततः पराचीनं स्वरं स्वरः प्राप्नोतीत्यर्थः । तथाहि **'ओऽ२३४५इ'** इत्यत्र प्रथमस्वर ओकारः क्रमेण द्वितीयादीन् स्वरान्प्राप्नोति । यदा क्रमागतं स्वरमतिक्रम्य स्वरान्तरं प्राप्नोति तदातिक्रमः । स चतुर्विधो भवति । यथा -

(अ) क्रुष्टः प्रथमस्वरमतिक्रामति । उदाहरणम् - **ऊँ ऽ२ । न आ गो ऽ२३४५ हो ।**

(ब) प्रथमो द्वितीयमतिक्रामति । वैदिकाः इमं नमनम् इति शब्देन व्यवहरन्ति । उदाहरणम् - **आ रो ऽ३हान् ।**

(स) तृतीयः चतुर्थमतिक्रामति । उदाहरणम् - **य ज्ञा ऽ५य ।**

(द) प्रथमस्वरः द्वितीयतृतीयचतुर्थान् त्रीन् स्वरानतिक्रामति । उदाहरणम् - **ई ऽ ५ ही ही ही ही ही ।**

कर्षणं पञ्चविधं भवति । तद्यथा -

(क) आद्वितीयकर्षणम् **त्साऽ २इ । तोयाऽ २इ ।** याइ इत्यत्रोपरि यद्रेखाचिह्नमस्ति तत् प्रङ्खशब्देन व्यवहरन्ति वैदिकाः । तस्य स्वरविन्यासस्त्वेवम् - अङ्गुष्ठाग्रं प्रथमस्वरे निधाय तत एवाऽकाशमार्गेण भ्रमणं कृत्वा कनिष्ठिकामध्यमागत्य पुनस्तथैवोपरि आगत्य द्वितीयस्वरे अवस्थानम् ।

(ख) आतृतीयकर्षणम् = **ना इ हो ता सा ऽ२३ । ओ ऽ२ ३ इ न्द्रा म् ।**

(ग) आचतुर्थकर्षणम् =**ता ऽ२३४म् ।**

(घ) आमन्द्रकर्षणम् =**ओऽ २३४५ई ।**

(ङ) मन्द्रश्च अतिस्वार्यत् कृष्यते = **त्वेन्त्वाऽ६मै** । स्वारः त्रिविधो भवति । स्वारस्य सम्प्रसारणमित्यपि संज्ञान्तरम् ।

(अ) प्रथमादिः = **हरीऽ३ श्रीऽ२३४५६** । नवमात्रः

(आ) द्वितीयादिः = **रयाऽ३४५ इम्** । षण्मात्रः- **ओ ऽ३४५ ।**

(इ) तृतीयादिः = **ई ऽ २ ३ ४ ५** ।। अष्टमात्रः

एषु स्वारेषु तृतीयचतुर्थमन्द्रस्वराणामुपरि निर्दिष्टः प्रथमोऽङ्कः एकमात्रिकस्य वोधकः । एतदपेक्षया अन्येऽपि विशेषस्वराः मात्रालक्षणादिषु प्रदर्शिताः । तेषां स्वरूपं प्रदर्श्यते । प्रथमादिद्वितीयान्तं विनतम् = **मर्योऽ २गि । यं यं याऽ २याम्** । द्वितीयादिस्तृतीयान्तं प्रणतम् = **आया हि ऽ३ वोइ - । रम्यन्येऽ३** - । एते द्वे अपि विणतप्रणते ह्रस्वकर्षणदीर्घकर्षणशब्देन व्यवहृयेते । यत्र ह्रस्वाक्षरे विनतप्रणतस्वरौ भवतः तत्र ह्रस्वकर्षणं, यत्र दीर्घाक्षरे पूर्वोक्तस्वरौ तत्र दीर्घकर्षणमिति च विवेकः । चतुर्थादिः मन्द्रान्तमुत्स्वरितम् = **मनुष्येऽ५भिरग्निः** । द्वितीयादिः प्रथमान्तमभिगीतम् = **रे ओ इ य यू ऽ२ः** ।।

प्रथमादिमन्द्रान्तेषु पञ्चसु स्वरेषु धार्यं भवति । यस्मिन्नचि उपरि स्वराङ्कनिर्देशो न भवति सोऽच् धार्यशब्देन धारीशब्देन वाऽभिधीयते । सोऽयं स्वरनिर्देशरहितोऽच् पूर्वस्याचः य: स्वरः तत्स्वरभाग् भवति । उदाहरणानि = प्रथमस्वरे = **तयाइ** । द्वितीय स्वरे = **दृशेऽ१** । तृतीयस्वरे = **''समी''** । चतुर्थस्वरे =**''हिताः''** मन्द्र=**''अभि''** । अत्र प्रथमादिमन्द्रान्तेषु स्वरेषु ''या'' - ''शे'' ''मी'' ''ता'' - भिइत्येते क्रमेण धार्याः इति विशेषस्वरा निरूपिताः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा गानकाले स्वराणां प्रयोगे मात्रायाः परिज्ञानम् अतीव आवश्यकम् । ह्रस्वस्य एका मात्रा दीर्घस्य द्वे मात्रे प्लुतस्य तिस्रो मात्राः भवन्ति । अस्यैव प्लुतस्य वृद्धम् इति सामवेदे व्यवहारः । यदि ह्रस्वाक्षरस्य द्विमात्रसंयोगः तदा तस्य प्लुतमिति, यदा च दीर्घाक्षरस्य एकमात्रा संयोगः तदा तस्य वृद्धमिति च व्यपदेशः छन्दोगग्रन्थेषु । अत्र च मात्रालक्षणीयं पद्यमनुसन्धेयम् -

ह्रस्वं द्विमात्रसंयुक्तं प्लुतमाहुर्मनीषिणः ।
दीर्घं तु मात्रासंयोगाद् वृद्धमित्यभिधीयते

(मा.ल.१/४)

मात्रायाश्चतुर्थोऽशोऽणुमात्रा । द्वे अणुमात्रे अर्धिकात्रिकं भवति । द्वे अर्धमात्रे एकमात्रा सम्पद्यते । अर्थाम् एका च मात्रा अध्यर्धा उच्यते । द्वे मात्रे अर्धं च अर्धतिस्रः । तिस्रो मात्रा अर्धं च अर्धचतस्रः । प्रणवे अर्धचतस्रो मात्रा भवन्ति ।

छन्दोगा यत्र विरम्य पठन्ति तत् पर्वेत्यभिधीयते । इति प्रागभिहितम् । तच्च पर्व द्विविधम् - "एकस्वरमनेकस्वरं चेति" । यस्मिन्पर्वण्येक एव स्वरो वर्तते तदेकस्वरं पर्व । तत् षड्विधं भवति । यथा - **ॐ । तद्विविड्वाइ । इन्द्रंविश्वाः । समी । ओग्नाइ । अग्निन्दूताम् ।** इति । अनेकस्वरं पर्व त्रिविधम् - अनुलोमगीतं प्रतिलोमगीतमुभयविधगीतं चेति । तत्रावरोहक्रमेण गानमनुलोमगीतं भवति । अर्थादुच्चादि नीचान्तम् । यथा - **ओन्यांः, तेनयिं; हंऽ४, जारों,** इति द्वयोः स्वरयोः । **अग्नायेऽ ३, त्वांऽ ३ ४म् , प्रत्यग्ने,** इति त्रयाणां स्वराणाम् । **तांऽ २ ३ ४म्, उ तं एं कां म्,** इति चतुर्णाम् । **ओऽ २ ३ ४ ५ इ,** इति पञ्चानां स्वराणाम् । यत्र प्रथमात् द्वितीयो भवति तस्यैव संज्ञान्तरं निघात इति । तदुक्तं सामवेदसर्वानुक्रमणीकारेण - तर्जन्याधः तपन्युच्चात्सन्निघात इतीरितः । (स.स.पृ.६) तर्जन्याधः - (१) पतन्यु (२) च्चात्सन्निघात इतिरितिः । इति ।

एवं विपरीतगीतं प्रतिलोमगीतं भवति । आरोहक्रमेण नीचादुच्चान्तं गानम् । यथा - **नेन्दांइ, एंहियां, हांऽ ३, पुंरु,** इति द्वयोः स्वरयोः । **नुषेजना** इति त्रयाणां स्वराणाम् । **सहोवानन्तां** इति चतुर्णाम् । अत्रापि द्वितीयादिप्रथमान्तस्योद्घात इति संज्ञान्तरम् ।

"तर्जनीतः समुत्क्षिप्त उद्वातः परिकीर्तितः" इति (सा.स.६पृ) उभयविधगीतं द्विविधम् - उच्चाद्युच्चान्तं नीचादिनीचान्तं चेति । तत्रोच्चाद्युच्चान्तं यथा - **वाइश्पताइ, हंसियां, अस्तिसोमों अय सुतः, प्रेष्ठवाः, उपत्वा जामाऽ ६ योगिराः, चाऽ २ दक्षसाइ** । नीचादिनीचान्तं यथा - **ग्नेमहोभिः, नमध्व, भद्रंभाद्राम्** । एवं पर्वविषयेणानेन साकं सामगानस्वरविषयाः प्रायशः प्रतिपादिताः ।

(१८) आर्चिकस्वरभेदाः

अथेदानीम् आर्चिकस्वराः प्रतिपाद्यन्ते । तत्र उदात्तः, अनुदात्तः, स्वरितः इति सामान्येन त्रयः स्वराः । एतेषामुच्चारणं, स्वरूपम् इत्यादीनि वेदान्तरसदृशानि । स्वरिते त्वस्ति कश्चिद् विशेषः ! यत्र उदात्तात् प्रचयः, ततः परः स्वरितः, तस्य आहननं क्रियते । यत्रोदात्तादनन्तरः स्वरितः स मृदुतयोच्चारणीयः । यथा च शिक्षाकारो नारदः शिक्षयति -

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रचयो यत्र दृश्येत तत्राहन्यात्स्वरं बुधः ।
स्वरितः केवलो यत्र मृदु तत्र निपातयेत् ।।इति।।

(ना.शि. २/७/९)

अस्यार्थः - यत्रोदात्तात् अनन्तरं स्वरचिह्नरहितेभ्योऽक्षरेभ्यः परः स्वरितः तस्याऽहननं विना मृदुतयोच्चारणमिति । अत्रैवं कश्चन मन्वीत - यत्रोदात्तात् स्वरचिह्नरहितेभ्योऽक्षरेभ्यः परः स्वरितः तस्याहननमिति शिरोवेष्टनप्राणायामवत् अर्थवर्णनापेक्षया प्रचये परतः स्वरितस्याऽहननमिति अर्थो वक्तुं शक्य इति -

मैवं मन्तव्यम् । एवमर्थवर्णनेऽस्ति काचिद्विप्रतिपत्तिः । तथाहि "आयाहि" इत्यादिषु सत्यपि प्रचयपरकत्वे, स्वरितस्य आहननं न क्रियते सम्प्रदायविद्भिः । अत एतादृशस्थलेषु अतिव्याप्तिः स्यात् । किञ्च "एह्यूषु ब्रवाणि तेऽग्न इत्येतरा गिरः" इत्यादिषु असत्यपि प्रचयपरकत्वे स्वस्तिस्याऽहननं क्रियते । तथाचात्र अव्याप्तिः स्यात् । तस्मात् आद्यार्थवर्णनमेव समीचीनं निर्बाधं च । ननु एवं चेत् "प्रचयो यत्र दृश्येत" इति शिक्षाश्लोकस्य प्रचयशब्दस्य कथमर्थो वर्ण्यते ? स्वरितात्परा या एकश्रुतिः तस्या एवापतः । तर्ह्यत्र प्रचयशब्दस्य का गतिरिति चेत् ? सत्यम् । अत्रत्यप्रचयशब्दस्य धारीपदवाच्यार्थबोधकत्वम् । अन्यथा सम्प्रदायविरोधः स्यात् । लक्ष्यानुसारि हि लक्षणम् । अतो लक्ष्यानुसारी अर्थो वर्णनीयः । धारीनाम साम्नि आर्चिके च यानि स्वरचिह्नरहितान्यक्षराणि तानि धारी इति धार्यमिति वा व्यवह्रियन्ते । धार्याक्षराणां स्वरास्तु ततः पूर्वतनाक्षरस्वरसदृशा एव भवन्ति ।

एवमेव शिवकोदात्तः, सप्तस्वराः कम्पः इति आर्चिके विशेषस्वरा भवन्ति । तत्र सप्तस्वराः एवं -

जात्यः क्षैप्रोऽभिनिहितस्तैरव्यञ्जन एव च ।
तिरो विरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः ।।इति ।।

(ना. शि. १/८/१०)

ह्रस्वदीर्घभेदेन कम्पो द्विधा भवति । शिवकोदात्तस्य लक्षणन्त्वेवम् -

मध्येऽनुदात्तयोः स्यातामुदात्तौ प्रथमं तयोः ।
उत्कलाः केशमित्याहुरुदात्तत्वं सम्प्रदायिनः ।।

(इत्यार्चिकलक्षणे - आ. ल. ८ श्लोकः)

अनेकानामुदात्तानामनुदात्तः परो यदि ।
शिवकं तं विजानीयादुदात्तप्रयत्नो यदि ।।

(ना. शि. २/२/४)

अनुदात्तस्वरयोर्मध्ये उदात्तस्वरौ द्वौ वर्णौ स्यातां तयोः प्रथमं वर्णं उत्कलाः कोशमिति वदन्ति; अस्मत्सम्प्रदायिनस्तु शिवकोदात्तः इति व्यवहरन्ति । एतसंज्ञा छलाक्षरेषु परिगणनाय, अन्यस्मात् वैलक्षण्य द्योतनाय च अस्य निर्देशः मध्यमाङ्गुलिं सङ्कोच्य अङ्गुष्ठेन उदात्तस्वरे तर्जनीमध्यरेखां स्पृशेत् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(क) तर्जन्यङ्गुष्ठसंयुक्तोयोः मध्यमाङ्गुलिर्यदाह पृष्ठे वर्तते द्वित्वयोगात् शिव इवाङ्गुलि-सन्निवेशः शिवक इत्यध्येतृप्रसिद्ध इति । (भट्टशोभाकार) उदाहरणन्तु - स नः पवस्य शङ्गवे इति । अत्र शं-ग-इत्येतौ वर्णौ उदात्तौ, पूर्वं स्व-इति उत्तरत्र वे-इति च अनुदात्तौ, तयोरुदात्तयोः प्रथममक्षरं शं, तत् शिवकोदात्तमिति विज्ञेयम् । अस्य स्वरचिह्नं तु "उ" इति वर्णेन "U" एवं चन्द्ररेखया वा क्रियते । "अनुदात्तयोर्मध्ये" इत्यत्र उत्तरत्रानुदात्तत्वमेव विवक्षितम्, पूर्वत्र क्वचित् सम्भवमात्राभिप्रायेण । न तु आवश्यकम् । अन्यथा - "उद्वेदभि" "आदित्रत्नस्य" - इत्यादौ शिवकोदात्तत्वं न स्यात् । उत्तरत्रापि विवक्षाभावे "मन्युमन्तश्चितागोः"-पाजांसि कृणु नदीष्वा" इत्यादावपि शिवकोदात्तत्वं स्यात् । अतः उत्तरत्रानुदात्तत्वमावश्यकम् । स्वाराणां लक्षणानि -

(उ.आ.१.१.३) (पू. आ. २.४.१०) (पू. आ. १. २. १०) (पू. आ. ५. ८. २) (पू. आ. ६. ७. ५)

(१९) जात्यः

सयकारं सवं वाप्यक्षरं स्वरितं भवेत् ।
न चोदात्तं पुरस्तस्य जात्यः स्वारस्स उच्यते ।।

(ना. शि. २/१./१)

जात्यादिसप्तविधस्वरितमध्ये जात्यस्य लक्षणमाह - यकारेण वकारेण वा सहितमनन्तरमुदात्तरहितं यत् स्वरितम् अक्षरं तत् जात्यस्वार इत्युच्यते । यकारस्वरितस्योदाहरणम् - "सजात्येन मरुतः सबन्धवः" (पू. आ.५.२.६) अया वर्द्धस्व तन्वा गिरा मम (पू. आ. १.५.८) इति वकारः स्वरितस्योदाहरणम् ।

(२०) क्षैप्रः

इ-उ वर्णौ यदोदात्तावपद्येते यवौ क्वचित् ।
अनुदात्तप्रत्यये नित्यं विद्यात् क्षैप्रस्य लक्षणम् ।।

(ना. शि. २/१/२)

इकारः उकारो वा उदात्तः पदादिना अकारेण अनुदात्तेन संहितायां यकारं वकारं वाऽपद्यते स स्वरितो भवति । सः क्षैप्र इत्युच्यते । यकारस्योदाहरणम् - "श्रुष्टयग्नेनवस्य मे । (पू. आ. ४.८.३) । वकारस्य - "पुरमिद्धृष्णवर्चत" (पू.आ. ४/८/३) ।

(२१) अभिनिहितः

ए - ओ आभ्यामुदात्ताभ्यामकारो निहितश्चयः ।
अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः ।।

(ना. शि. २/१/३)

एकारादोकाराद्वा उदात्तादुत्तरो योऽकारः निहितः अनुदात्तः, तं यत्र लुम्पन्ति एकारे ओकारे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा अनुप्रवेशयन्ति संहितायां तदा तमभिनिहित: इति वदन्ति । एकारस्योदाहरणम् - ''तेऽमन्वतप्रथमम्'' ओकारस्योदाहरणम् - ''सतोऽरुणप्सुरशिश्वितत्'' (पू. आ. ७/३/५)(पू. आ. ३/३/६) ।

(२२) तैरव्यञ्जनः

उदात्तपूर्वं यत्किञ्चिच्छान्दसि स्वरितं भवेत् ।
एष सर्वबहुस्वारः तैरव्यञ्जन उच्यते ।।

(ना. शि. २/१/४)

उदात्तात् परं स्वरितम् इत्येतत् बहुत्र भवति, अत: बहुस्वार:, सर्वत्र ऋग्वेदे यजुर्वेदे च भावात् सर्वबहुस्वार: । तिरोद्यागमनेन तिरोधावगमने वा व्यञ्जन इति तैरव्यञ्जन: स्वरितो भवति। अस्योदाहरणम् सुलभं वीतये, उतये इत्यादि ।

(२३) तिरोविरामः

अवग्रहात्परं यत्र स्वरितं (तः) स्यादनन्तरम् ।
तिरोविरामं तं विद्यादुदात्तो यद्यवग्रहः ।।

(ना. शि. २/१/५)

उपसर्गा अवगृह्यन्ते । तत्परत: तिङन्तस्य कृदन्तस्य वा पदस्य अन्तर: पृथक् क्रियते इत्यवग्रह: । तादृशादवग्रहात् उदात्तात् पर: स्वरित: तिरोविराम इत्यभिधीयते । तिरोविरामं प्राप्त: अवग्रहस्वार: भवति इति यावत् । ''विष्कभिते-वि-स्कभिते इति । इत्युदाहरणम् । अत्र ''वि'' इत्युपसर्ग: स्कभिते इति पदादवगृह्यते पृथक् क्रियते । तदा उपसर्गादुदात्तात् पर: स्वरित: तिरोधाय विरमतीत्यत: तिरोविराम इत्युच्यते ।

(२४) प्रश्लिष्टः

इकारं यत्र पश्येयुरिकारेणैव संयुतम् ।
उदात्तमनुदात्तेन प्रश्लिष्टं तं निबोधत ।।

(ना. शि. २/१/६)

उदात्त: इकार: अनुदात्तेन इकारेण यदा संयुक्तो भवति तं स्वरितं प्रश्लिष्टस्वार इति निबोधत जानीत । उदाहरणम् ''अधाहीन्द्रगिर्वण:'' । (पू. आ. ५/२/८) अत्र उदात्तानुदात्तेकारद्वययोग: ।

(२५) पादवृत्तः

स्वरे चेत्स्वरितं यत्र विवृत्ता यत्र संहिता ।
एतत्पादान्तवृत्तस्य लक्षणं शास्त्रचोदितम् ।।

(ना. शि. २/१/७)

स्वरेऽक्षरे अकारादौ यत्र यत्र मन्त्रे स्वरित: सहितानुपूर्वेण पदेन सह यदा विवृत्तो विभक्तो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति तदा सः पादवृत्तः इति व्यवह्रियते । उदाहरणम् - "कइं वेद सुते सचा" (पू. आ. ४/१/५) स्वरान्तराणां यथा विशेषचिह्नं दीयते तद्वद् अस्य पादवृत्तस्य, तिरोविरामस्य च स्वारस्य विशेषचिह्नं न दीयते । तैरव्यञ्जनस्य तु मृदुस्वरितत्वात् तस्यापि विशेषेण चिह्नं नास्ति एतेषां त्रयाणां चिह्नाभावेन आहननमपि नास्ति । एवं सप्त स्वाराः सोदाहरणं निरूपिताः । अत्र ध्येयौ श्लोकौ -

जात्यस्वारस्सजात्येन श्रुष्टय्ग्ने क्षैप्र उच्यते ।
तेऽमन्वताभिनिहितः तैरव्यञ्जन उतये ।।

तिरोविरामो विष्कभिते प्रश्लिष्टो हीन्द्र गिर्वणः ।
पादवृत्तः कइं वेद स्वारास्सप्तैवमादयः ।।

स्वरितसामान्यस्य लक्षणमेवम् -

उच्चादेकाक्षरात्पूर्वात् स्वर्यते यहिहाक्षरम् ।
स्वाराणां जात्यवर्जानामेषा प्रकृतिरुच्यते ।।

(ना. शि. २/१/८-१०)

जात्यादिवर्जम् इतरत्र एकाक्षरादुदात्तात् पूर्वस्थितात् परं यदि अक्षरं स्वर्यते तदा तत् स्वरितस्य प्रकृतिर्भवति अर्थात् स्वरितसामान्यस्य एतत् लक्षणं भवतीत्यर्थः ।

(२६) कम्पलक्षणम्

चत्वारस्त्वादितः स्वाराः कम्पं पुष्यन्ति शास्त्रतः ।
उदात्तै चैकनीचे वा जुह्वोऽग्निस्तत्र दर्शनम् ।।

(ना. शि. २/१/११)

चत्वारः जात्यः क्षैप्रः अभिनिहितः प्रश्लिष्टः इति चत्वारः स्वाराः उदात्ते एकनीचे वा परे आदितः आदिभागे कम्पं पुष्यन्ति । उदाहरणानि -

जात्यकम्पः =उपत्वा जुह्वो मम ।
क्षैप्राकम्पः =पाह्यु त द्वितीयया ।
अभिनिहितकम्पः = वृधे स्मान् ।
एकनीचः = अभ्यंर्षानपच्युतः ।
प्रश्लिष्टकम्पस्योदाहरणं शाखान्तरे मृग्यम् ।

(२७) पदपाठस्वराः

यदुदात्तमुदात्तं तत्, यत्स्वरितं तत्पदे भवति नीचम् ।
यन्नीचं नीचमेव तत् , यत्प्रचयस्थन्तदपि नीचम् ।।

(ना. शि. २/३/१)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संहितायां यदुदात्तमक्षरं तत् पदकालेऽपि उदात्तमेव भवति । यत् संहितायां स्वरितं, तत् पदकाले नीचम् अनुदात्तं भवति । "स्व:" इत्यादीनां प्रकृत्यैव स्वरितानां तु पदपाठेऽपि स्वरितत्वमेव । यत् नीचं अनुदात्तं तत् पदे अनुदात्तमेव भवति । प्रचयस्वरसयमप्यक्षरं पदे नीचं भवति । पदानि अष्टप्रकाराणि भवन्ति । यथा -

"अष्टप्रकारं विज्ञेयं पदानां स्वरलक्षणम् ।
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तन्नीचस्वरितम् ।।

(ना. शि. २/७/५)

अन्तोदात्तम् = "अग्नि:" । आद्युदात्तम् "सोम:"=। उदात्तम् = "प्र" । अनुदात्तम् ="व:"। नीचस्वरितम् ="वीर्यम्" मध्योदात्तम् = "हविषा" । स्वरितम् = "स्व:" । द्वयमुदात्तम् = "वनस्पति:" । पाणिनीयशिक्षायान्तु एतैरष्टभि: प्रकारै: साकं नवम: त्रयुदात्तप्रकारोऽपि परिगणित: । तस्योदाहरणन्तु शाखान्तरे - "इन्द्राबृहस्पती" इति । एवं सामिका: आर्चिका: पदपाठीयाश्च स्वरा: यथामति सुविमृष्टा: । सुपरिशीलेऽपि स्वरमण्डले सामसु स्वराणां सौक्ष्म्यात् तेषां बोधनं पूर्णतया न जायते । अमुमेवाऽर्थं देवर्षिनारद: शिक्षायां स्पष्टीचकार -

"तुम्बुरूनारदवशिष्ठविश्वावस्वादयश्च गन्धर्वा: ।
सामसु निभृतं करणं स्वरसौक्ष्म्यात्तेपि हि न कुर्यु: ।।

(ना. शि. २/७/१२)

साम्नां स्वरैरेव समस्तमपि प्रपन्वजातं जीवति । अत एव सर्वाणि खलु भूतानि धार्यन्ते सामिकै: स्वरै: (ना. शि. १/७/८) इति ब्रवीति नारद: । श्रुतिस्मृतिपुराणादिषु च "सामैव सर्वस्यान्नम्" "सामह्येषामुपजीवनं प्रायच्छत्" इत्येवमादि साम्न: प्रशंसा कृतास्ति । अत एव भगवान् श्रीकृष्ण: "वेदानां सामवेदोऽस्मि" इत्यवोचत् ॥

पूर्वाचार्याणां विचारान् मतानि च अनुसृत्य भूमिकेयं जिज्ञासूनाम् जिज्ञसानिवृत्तये समुपस्थापित इति ।

उपसंहार:

भगवत: साम्बसदाशिवस्य कृपाशीर्वादात् अहं बङ्गप्रदेशे अहर्निशं गुरुं शुश्रूषयन् गुरुशिष्यपरम्परया सामवेदस्य आद्योपान्तमध्ययनं कृतवान् । मम गुरुवर्या: वेदतपोमूर्तिमहामनीषिणो सामवेदस्य तलस्पर्शि-विद्वांस: सामवेदिन: "सलक्षणश्रौतविद्वान् वेदतीर्थ: भाष्यमणि:" इत्याद्युपाधिविभूषिता: प्रातस्मरणीया: पण्डितप्रवरा: **श्रीमन्त: रा. शङ्करनारायण श्रौती** महाभागा: आसन् । तेषां कृपयैव देवनागर्यां कौथुमशाखाया गानसंपर्कितं नैकमपि ग्रन्थमिदानीं समुपलभ्यमानमपश्यन्, तेन च छात्राणाम् प्रतिपलं अधीतस्य वेदस्य अभ्यासाय अर्थात् धारणाध्ययने महत् काठिन्यम् अनुभवता तन्निराकरणाय ममायं सामगानात्मकस्य ग्रन्थस्य मुद्रापनाय प्रयास: स्वीकृत: ।

ग्रन्थेऽस्मिन् ग्रामगेयगानस्य, अरण्यगेयगानस्य, पूर्वार्चिकस्य, पूर्वार्चिक पदपाठस्य, तथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिसामं सामतन्त्रसूत्राणाम् प्रमाणतया समुपन्यासो कृतः, सामविधानब्राह्मणदिशा कतिपय प्रयुक्ताः सामप्रयोगाः तथा अकाराद्यनुसारेण साम-मन्त्र-सूच्यादयोऽपि सन्निविष्टाः सन्ति ।।

यद्यपि अस्मद्गुरुवर्यसम्पादितौ सामवेदस्य ग्रामगेयारण्यगेयगानस्य द्वौ भागौ श्रीकाञ्चीकामकोटि-पीठाधिपतीनां श्रीमच्चन्द्रशेखरेन्द्र-सरस्वतीस्वामिनां षष्ट्यब्दपूर्ति ट्रस्टेन १९७६ ईसवीये प्रकाशितावास्ताम् । परन्तु तत्र गानमात्रमासीत् । अतः अस्मिन् ग्रन्थे प्रकृति ग्रामगेयगानारण्यगेयगान पूर्वार्चिक-पूर्वार्चिकपदपाठ-स्तोभपाठ-सामविधान-ब्राह्मणानुसारिस्वल्पकाम्यप्रयोगाः प्रतिसाममन्त्रसामतन्त्रसूत्राणि समाविष्य ग्रन्थस्य बहूपयोगित्वं मया चिन्तितमस्ति । अनेन सामवेदस्य अध्ययनाध्यापनयोः महत् सौकर्यं भविष्यतीति विश्वसिमि ।

अस्मिन् महतेपुण्यकर्मणि ये खलु वैदिकविद्वांसोऽनुगृहीतवान्तस्तेषु राष्ट्रपतिपुरस्कारेण विभूषिताः विश्वभारतीसम्मानेन च सम्मानिताः पण्डितराज डॉ. मुरलीधर पाण्डेयाः; वर्द्धमान विश्वविद्यालये संस्कृत विभागाध्यक्षाः गुरुवर्याः प्रो. गोपालनाथ भट्टाचार्याः महोदयाः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य वेदविभागाध्यक्षाः पूर्वउपकुलपतयो, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सचिवचराः डॉ. युगल किशोर मिश्रमहोदयाः श्रीपट्टाभिरामशास्त्रिवेदमीमांसानुसन्धानकेन्द्रस्य सचिवाः एवं च काशीहिन्दूविश्वविद्यालयस्य संस्कृतकलासङ्काये वरिष्ठ प्रो. श्रीकिशोर मिश्रमहाभागाः इमे सर्वेऽपरेऽपि बहवः वैदिकविद्वांसो मह्यं प्रतिपलं नानाप्रकारैः सहयोगं सुमार्गं च विदधतो हृदयपदवीमधिरोहन्ति । अहं तान् महानुभावान् प्रति आत्मनः कृतज्ञतां विभर्मि प्रकटयामि च । अस्मिन् महनीये कर्मणि अवन्तिकापुरीस्थस्य महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्यापि अवदानं अविस्मरणीयमस्ति ।

परन्तु मदीयः प्रयास एवं च ममात्मीयजनानां सहयोगः कदाचिदपि सफलः नाभविष्यत् यदि पूज्यपादैर्विविधविरुदावलिभिर्विराजमानमानोन्नतैरादिशङ्कराचार्यभगवत्पादवर्यैः प्रतिष्ठापित-चतुराम्नायपीठेषु उत्तराम्नायज्योतिष्पीठस्य पश्चिमाम्नायद्वारकाशारदापीठस्य च जगद्गुरुशङ्कराचार्य-स्वामिस्वरूपानन्दसरस्वतीमहाराजानां कृपासम्बलं मह्यं प्राप्तं नाभविष्यदिति । सामवेदीयपश्चिमाम्नाय-द्वारकाशारदापीठाधिपतिरूपेणाचार्यपादैः मामकीनं निवेदनमवधार्यैव प्रसन्नचेतसा अस्य प्रकाशनाय स्वीयान् शिष्यान् द्वारकाशारदापीठस्य मन्त्रिवर्यान् स्वामिसदानन्दसरस्वती वाराणसेय-श्रीविद्यामठकार्यनिर्वाहकान् स्वामि-अविमुक्तेश्वरानन्दसरस्वती जगद्गुरुवर्याणामन्तरंगसचिवान् ब्रह्मचारिसुबुद्धानन्दवर्यांश्चादेशप्रदाने स्वल्पमपि विलम्बः न कृतः । गुरुशुश्रूषापरायणैरेतैः शिष्यैरपि गुर्वाज्ञापरिपालनं समयसीमायां कुर्वन्तः सं. २०६१ गुरुपूर्णिमायां एनं प्रकाशितं कृत्वा गुरुकरकमलयोः अस्थापयन्तः ।

स्वयमहं पूज्यपादशङ्कराचार्यमहाराजानां सदाशयतां एवं च सनातनधर्मः मूलवैदिकधर्मस्तथा वैदिकसाहित्यस्य संरक्षणस्यास्य तत्परतायाः तेषां शिष्याणां गुर्वाज्ञापालनप्रवणतया चात्यन्तं प्रभावितोऽस्मि । मयेदं विश्वष्यते यत् पूज्यपादैः महाराजश्रीभिः क्षित्यामस्यां विराजमाने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सति वैदिकधर्मः कदाचिदपि ग्लानिं न प्राप्तं भवितुं शक्यते । पूज्यपादशङ्कराचार्यमहाराजश्रीचरणेषु आत्मसमर्पणमेव तेभ्यः आभारप्रदर्शनं भविष्यति ।

अन्ते समस्तान् पूज्यवैदिकान् विविधविद्याविशारदान् विदुषश्च अभ्यर्थये यदत्र यत् किञ्चित् सौष्ठवं तत् सर्वं मम पूज्यगुरुपादानां ये चात्र दोषास्त्रुटयश्च सन्ति ते सर्वे मदीयाः सन्ति । अवसरे भगवद्विश्वनाथकृपया अस्य विकृत्यात्मकं द्वितीयभागम् ऊह-ऊह्यम् (रहस्यम्) अपि विदुषां पुरस्तादुपस्थापयिष्यामि इति कामये ।

अनेन जगत्पिता श्रीविश्वनाथः माताचान्नपूर्णा तथा वेदभगवान् प्रसीदन्तु ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

ॐ शान्तिः शान्तिः शान्तिः - शिवार्पणमस्तु ।

सम्पादकः
गगनकुमारः चट्टोपाध्यायः श्रौती (सामवेदाचार्यः)
प्रधानाचार्यः - श्रीपट्टाभिरामशास्त्री वेदमीमांसानुसंधान केन्द्र,
बी.४/७ए हनुमानघट्टः, वाराणसी (काशी । उत्तर-प्रदेशः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषयानुक्रमणिका

क्र.	पर्व (विषय)	पृ. सं.
१.	आग्नेयं काण्डम्	१
२.	ऐन्द्रं काण्डम्	३९
३.	पावमानं काण्डम्	१६५
४.	आरण्यकं गानम्	२४०
५.	पूर्वार्चिकः	३२९
६.	पूर्वार्चिकः पदपाठः	३९०
७.	स्तोभपाठः	४५३
८.	केचन साममंत्राः तथा प्रयोगाः	४६४
९.	कर्मकाण्डे युज्यमानसाममंत्राः	४६७
१०.	मंत्रानुक्रमणिका	४७८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीसामवेदाय नमः

नीलोत्पलदलाभासः सामवेदो हयाननः ।
अक्षमालान्वितो दक्षे वामे कम्बुधरः स्मृतः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। सामवेदाय नमः ।।

। अथ प्रकृतिगानम् ।

(वेयगाने, ग्रामेगेयगानम् ।)

तत्र प्रथममाग्नेयं पर्व ।

।। विश्वामित्रो, गायत्री, सविता ।।

ओम् । भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।।

। गानम् ।

।। गायत्रम् ।।

।। गायत्रम् ।। परमेष्ठी प्रजापतिः, गायत्री, सविता ।।

ओऽ३म् । तत्सवितुर्वरेणियोम् ।। भार्गोदेवस्य धीमाहीऽ२।
धियोयोनःप्रचोऽ१२१२ ।। हिम्(स्थि)आऽ२ ।। दायो ।। आऽ३४५।।*×

(दीर्घाः६। पर्वाणि६। मात्रा३)।।(कि।।)

(इति प्रकृतिसप्तगानान्तर्भूतं गायत्राख्यं प्रथमं गानं सम्पूर्णम्)

।। पर्कः । गोतमो, गायत्री अग्निः ।।

(१-१) ओऽ३म् । ओग्नाइ ।। आयाहिऽ३वोइतोयाऽ२इ । तोयाऽ२इ । गृणानोह ।
व्यदातोयाऽ२इ । तोयाऽ२इ ।। नाइहोतासाऽ२३ ।। त्साऽ२इबाऽ२३४औहोवा ।।
हीऽ२३४षी ।।

(दी.७ । प.९। मा.९) १ (झो । १)

---

१. गायत्रस्य पुष्करसो (पुष्कलो वा) गायत्री सविता १×'हुं' इति वा 'हिं' इत्यस्य स्थाने पाठः ।

१. गायत्रस्य पुष्करसो (पुष्कलो वा) गायत्री सविता १×'हुं' इति वा 'हिं' इत्यस्य स्थाने पाठः ।

*२. एतस्य साम्न ऋगेवास्थीनि, स्वरो मांसानि, स्तोभा लोमानि । (सा० वि. ब्रा० १।१।१)

पाठभेदाः- (१) "ओग्नायि । ...वोयितोयाऽरयि । तोयाऽरयि" (एवं सर्वत्र सामगानेषु 'इ' कारस्थाने 'यि' इति केषुचिद्ग्रन्थेषु पाठो दृश्यते ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१-२) (२)× बर्हिष्यम् । (कश्यपो, गायत्री, अग्निः।)

अग्नआयाहिवी ॥ तयाइ। गृणानोहव्यदाताऽ२३याइ ॥ निहोतासत्सिबर्हाऽ२३इषी ॥

बर्हाऽ२इषाऽ२३४औहोवा ॥ बर्हीऽ३षीऽ२३४५ ॥+

(दी.९। प.६ । मा.६)२(तू।२)

(१-३) (३) पर्कः ॥ (गोतमो, गायत्री, अग्निः।)

अग्नआयाहि । वाऽ५इतयाइ ॥ गृणानोहव्यदाऽ१ताऽ३यै ॥ निहोताऽ२३४सा ॥

त्साऽ२३इबाऽ३ । हाऽ२३४इषोऽ६हाइ ।

(दी.४ । प.६। मा.६)३(तू।३)

(२-१) ॥ सौपर्णं सुपर्णो; (वैश्वमनसम् । विश्वमना, गायत्री, अग्निः।) ॥

त्वमग्नेयज्ञानाम् । त्वमग्नाइ ॥ यज्ञानाꣳहोता । विश्वेषाꣳहाऽ२३इताः ॥

देवेभाऽ२३इर्मा ॥ नुषेजना । औऽ३होवा । होऽ५इ ॥ डा ॥

(दी.१२।प.९। मा.६)४(झू।४)

(३-१) ॥बृहद्भारद्वाजम् (बृहद्वाग्नेयं,बृहद्वा सौरम् ।) (भरद्वाजो, गायत्री, अग्निः ।)॥

अग्निन्दूताम् ॥ वृणीमहाइ । होताराऽ२३०वी । श्ववेदसाम् ॥ अस्ययाऽ२३ज्ञा ।

आ । औऽ३होवा ॥ स्यासुक्रतुम् । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.६। प.११। मा.५)५(कु।५)

(४-१) ॥ (श्रौतर्षाणि त्रीणि) श्रौतर्षम् ॥ त्रयाणां श्रुतर्षिः, गायत्री, अग्निः ॥

अग्निर्वृत्रा॥ णाऽ२इजाऽ२३४औहोवा। घाऽ२३४नात्। द्रविणस्युर्विपन्ययाऽ२॥

ओइसमिद्धाऽ२३श्शू॥ क्रायाहुतः। इडाऽ२३भाऽ३४३ ॥ ओऽ२३४५इ ॥ डा ॥

(दी.४। प.९। मा.६)६(धू।६)

× गोतमस्य पर्काविभितः कश्यपस्य बर्हिष्यम् । आ. ब्रा. २।१। * 'ऽ' एतत्तानचिन्हं केषुचित्पुस्तकेषु नास्ति।
+ निधने प्रणतं भवति सर्वत्र भगायेत्यादि निदर्शनमतो दीर्घ एव भवति "वर्हीऽ३षीऽ२३४५" इत्येवम्।
(साम-तन्त्र-सूत्राणि) (१) तयु प्रथमि रे १.१०.१३; असप्तिनः ७.१.६; वृद्धादुञु १०.१.७; सन्ध्यम् १०.७.९; ग्रि तुडाद्येषु १२.२.६; णिषु तृचम् २.२.१; वचु विश्वाचेत् २.६.४; उदुह्ये ४.४.३; औरे प्रथमः ४.९.८; दोरादे र्विंत्राम् १२.२.७; तयु १२.२.८; ग्रि प्रथमिनः ५.५.६; (२) ग्रे गिनः १.९.५; ऋक्स्वरवत् १.११.१; आदेरवैधस्य ३.७.४; त प्रथमोरोहः १२.९.८; गेस्त्रि १०.८.९; (३) विश्वायाः खिडिजि ३.९.५; सत्येऽसार्वावति १०.१.६; (४) आद्ये १.२.१; चतुक्षिणोऽक्षरम् १.७.९; हँ ह्याः ३.९.४; त्यन्ते१२.६.४; डाप्सू ३.५.१०; (५) स्वरोऽनन्त्यः, १.१.१; गुमन्धा १.४.४; कृष्टमुञुजौ ४.७.२; होतायाम् ८.२.४; दिवा गौ ११.२.४; (६) दीर्घम् ३.२.५; क्रः १२.९.७; उदात्तात् १.११.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(४-२)

अग्निरौहोवाहाइ। वृत्राणी।। जाङ्घ्राऽ३नात्। औहोऽ३वाऽ३। द्रविणाऽ२३४स्यूः। ओइवोइपन्ययाऽ२।। समायेऽ३।। धाऽ२श्शूऽ२३४औहोवा ।। क्रयाहुताऽ२३४५: ।।

(दी.४। प.९। मा.७)७(धे।७)

(४-३)

ओग्नीः।। वृत्राणिजङ्घनात्। औहौहोऽ२३४वा।। द्रविणस्युर्विपन्यया। औहौहोऽ२३४वा।। समिद्धश्शुक्रया। औहौहोऽ२३४वा।। होऽ५तोऽ६हाइ ।।

(दी.४। प.८। मा.३)८(दि।८)

(५-१) औशणानि त्रीणि।[1] * औशनम्।। (उशना, विराड्गायत्री, अग्निः)

प्रेष्ठवाः।। अताऽ२३इथीम् । स्तौषेमित्रम् । इवप्राऽ२३याम् । अग्नाइराऽ३थाऽ३म् ।। नावाऽ२३हाऽ३४३इ ।। दाऽ२३४योऽ६हाइ ।।

(दी.२। प.७। मा.९)९(छो।९)

(५-२) ।। शैरीषम् ।। शिरीषो (उशना, गायत्री, अग्निः ।)

प्रेष्ठवः । ओहाइ ।। अताऽ२३इथीम् । स्तुषाइमित्राऽ३म् । इवाऽ२प्राऽ२३४याम् ।। औहोऽ१इ । अग्नेराथाऽ२३म् ।। नाऽ२३ऽवेऽ३ । दाऽ३४५योऽ६हाइ ।।

(दी.३। प.९। मा.१०)१०(ढौ।१०)

(५-३) ।। औशनम् ।। (उशना, विराड्गायत्री, अग्निः ।)

प्रेष्ठंवोहाउ ।। अतिथाइम् । स्तुषेमित्रमिवप्राऽ२३याम् ।। अग्नायेऽ३ ।। राऽ२थाऽ२३४औहोवा ।। नवेदियाऽ२३४५म् ।

(दी.६। प.६। मा.६)११(कू।११)

(६-१) ।। सांवर्गम् । (संवर्गः) साकमश्वः, गायत्री, अग्निः ।।

त्वन्नोया।। ग्रेमहोभिः। पाहोइवीऽ३श्वा। स्याअरातेः।। उताद्वाऽ१इषाऽ२ः।। मर्त्यस्य । इडाऽ२३भाऽ३४३। ओऽ२३४५इ।।डा।।

(दी.७। प.९। मा.७)१२(झे।१२)

(साम-तन्त्र-सूत्राणि) (७) मन्द्रेभ्यः १.११.७; लघ्वादिरुदात्ते २.६.१; औ विस्नेडि ५.१.१०; दधे यमिन्याम् ६.९.९; न समानात्प्रथमि ११.४.९; (८) एर्जि २.२.२; आव्यहि २.९.४; हन्ते १२.२.९ ब्युद् १२.३.४; (९) उपान्त्यम् १.१.३; प्रवा १.६.४; मन्द्रोहि ४.९.२; श्येने ७.५.१; हि (१०) लघोः स्तुषे ७.३.२; गिनोजेः ११.१.७; (११) भात्तिथेः ७.९.९; लुप् ११.४.७; ए त्यम् १२.६.६; उञ्जु १२.६.१०; गि १२.७.८; (१२) प्रत्युत्क्राम उपान्त्यः १.५.५; स्य २.६.५; विस्वरादुञ्जु ८.८.७; षो ८.९.३; तुनडिवान् ९.५.८; यि ९.९.२;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(६-२) ॥ वार्त्रग्घ्नम् । साकमश्वः, गायत्री, अग्निः ॥

त्वांत्वन्नोअग्नेम । होऽ६भाइः ॥ पाहिविश्वाओऽ३हो । स्याऔऽ३हो । आरातेः । उताद्वाऽ१इषाऽ२ः । मर्ताऽ२याऽ२३४ओहोवा॥ स्याऽ२३४५ ॥

(दी.६। प.८। मा.९)१३(गो।१३)

(७-१) ॥ शौनःशेपे द्वे । वत्सः, गायत्री, अग्निः ॥

एह्यूषूऽ३ब्रवाणाऽ६इताइ। अग्नइत्थेतरागाऽ२इराः। एभाऽ२इर्वर्द्धा॥ सयाऽ२३हाऽ३४३इ । दूऽ२३४भोऽ६हाइ ॥

(दी.६। प.५। मा.८)१४(डै।१४)

(७-२) ॥ शौनःशेपम् ॥ शौनः शेपः, गायत्री, अग्निः ॥

एह्यूषुब्रवोहोणाइताइ ॥ अग्नइत्थेतराऽ१गीऽ३राः । एभिर्वाऽ२३४र्द्धा ॥ सयाऽ२३ऽहाऽ३४३इ ॥ दूऽ२३४भोऽ६हाइ ॥

(दी.४। प.५। मा.६)१५(नू।१५)

(८-१) ॥ वात्से द्वे ॥ वत्सो, गायत्री, अग्निः ॥

आतेवत्साः ॥ मनोयमत् । परमात् । चित्सधाऽ२३स्थात् ॥ अग्नाइत्वाऽ३०काऽ३ ॥ मयोवा । गाऽ५इरोऽ६हाइ ॥

(दी.४। प.७। मा.७)१६(थे।१६)

(८-२) ॥काण्वम् । कण्वः, गायत्री अग्निः॥[1]

आतेवत्सोमनोयमत् । ऐयाहाइ ॥ परमाच्चित्सधस्थादैयाऽ२३होइया ॥ अग्नेत्वांकामयऐयाऽ२३होइया ॥ गिरा । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.१२। प.८। मा.६)१७(जू।१७)

---

१. स्वारत्वात्प्रजापतिर्देवता ।

(साम-तन्त्र-सूत्राणि) (१३) पाह्याः १.७.२; घ ओष्ठ्यादेः १.७.३; खिडौ वृद्धे ५.९.९; दिगमृरे ८.१.८; खुभिः १०.३.९;१०.५.७; (१४) पासे नावा ४.३.८; प्राग्वृद्धाद्दस्य ९.४.२; अजु १०.२.५; ग्वि ११.४.२; एहा (हि) इ १२.८.१०; (१५) अन्तः पदे ११.७.६; (१६) ओष्ठ्य चु २.२.८; रन्यामिजि द्वयोरिजु २.५.१०; ऋट् ८.९.५; निक्षेमन्द्रात् १०.३.७; (१७) इङ्यन्तस्थि २.४.८; व्यञ्जनादिय ५.१.५; ऐतुडि १२.६.२; दन्त्यादिय १२.६.१;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(९-१) ॥ अग्नेरार्षेयं । गायत्री, अग्निः ॥[1]

५र र र ५र १ २ र १ अ ^ ३ ५ ३ ५
त्वामग्नेपूष्काऽ६रादधी ॥ आथर्वा । नाइः । अमाऽ२न्थाऽ२३४ता ॥ मूऽ२३४दृर्ध्नो ।
३ ५ ४ ५ ४ ५
वाऽ२३४इश्वा ॥ स्यवोवा । घाऽ५तोऽ६हाइ ॥

(दी.५। प.८। मा.४)१८(बी।१८)

(१०-१) ॥ वाध्र्यश्वम् । (वध्र्यश्वोऽनूपो वा) गायत्री, अग्निः ॥

४५र ४ ५ ४र ५ ४ ५ २ र १ २र १ २ ^ २ १
अग्नेविवस्वदाभरो । वाहाइ ॥ अस्मभ्यमूतऽ३याइमहे । ओ । वाऽ३हाइ । ओ ।
२ ^ २ १ ३ — १ २ ^ २ १ २ ^ २ ^
वाऽ३हाइ ॥ दाइवोऽ१हियाऽ२ । ओ । वाऽ३हाइ । ओ । वाऽ३हाऽ३इ ॥
१ ^ ३ ५२र २
साऽ२इनाऽ२३४औहोवा । दृशेऽ१ ॥

(दी.६। प.१४। मा.९।)१९(घो।१९)

एकोनविंशतिः । प्रथमः खण्डः ॥१॥

(११-१) ॥ (सांवर्गम्) संवर्गः । अग्निर्गायत्र्यग्निः ॥

४ ५ र ४ ५ १ २ ^ १ ^ ३ ५ १ अ —
नमस्तौ ॥ होग्नाइ । ओजसाऽ३इ । गृणाऽ२न्ताऽ२३४इदे । वाकृष्टयाऽ२ः ॥
१ २ ^ १ ^ ३ ५र र २ ^ ३ १ १ १
अमायेऽ३ः ॥ आऽ२माऽ२३४औहोवा ॥ त्रमर्द्दयाऽ२३४५ ॥

(दी.३। प.८। मा.६)१(डू।२०)

(१२-१) ॥ वैश्वमनसम् । विश्वमना गायत्र्यग्निः ॥

५र ४ २ ^ ४ ५र २ १र अ ^ ३ ५ १ २
दूताऽ३०वोऽ३विश्ववेदसाम् ॥ हव्यवाहाम् । अमाऽ२र्त्ताऽ२३४याम् ॥ याजिष्ठम् ।
१ २ ^ २ २ १ २ ^ ४५ ४
ऋ । जसेऽ३हाइ ॥ गिरा । औऽ३होवा । होऽ५इ ॥ डा ॥

(दी.३। प.१०। मा.६)२(णू।२१)

(१३-१) ॥ श्राभम् । श्राभो गायत्र्यग्निः (इन्द्रः) ॥

५ र १ विर १ २ १ अ — १ २ र १ २ १ अ —
उपत्वाजा ॥ मयोऽ२गि । रओइययूऽ२ः । दाइदिशतीर्हविष्कृ । तओइययूऽ२ः ॥
२र१र २ ^ ३ २ ^ ४ १ २ ^ १र १ १ १
वायोराऽ२३र्नी ॥ कयाऽ३स्थाऽ५इराऽ६५६न् ॥ अश्वाऽ३गावाऽ२३४५ः ॥

(दी.६। प.८। मा.१०)३(गौ।२२)

(साम-तन्त्र-सूत्राणि) (१८) यिनीदि ८.७.५; (१९) एमेषु ६.४.६; लघोर्मरुत्वतायाः ६.७३.५; वि मयोवे १२.३.५; (२०) १. जसि २.८.१०; ङ्कु साम्नि २.९.८; यिवत् २.१०.९; ग्नि ९.९.१; ति जारायाम् १२.४.४; (२१) २ द्वितीयपूर्वा १.३.४; न जह्वायाम् १०.६.१; (२२) ३ इणोरि २.४.६; गिवि स्वरान्बाह्ययुक् ३.४.३; ओ खिडि ११.८.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१३-२) ॥ श्रौष्टीयम् । (श्रौष्टम्) श्रुष्टो गायत्र्यग्निः ॥

उपत्वाजामाऽ६योगिराः ॥ दाइदिशे । ताइः । हवीऽ२ष्कांऽ२३४र्त्ताः ॥
वायोरनाहाइकाया ॥ स्थाइरा । औहोऽ२३४वा ॥ ईडा ॥

(दी.८। प.८। मा.७)४(डे।२३)

(१४-१) ॥ वैश्वामित्रम् । विश्वामित्रो गायत्र्यग्निः ॥

उपात्वाऽ२३ग्नेदिवेदिवाइ ॥ दोषाऽ२वास्ताऽ२ः । धियावयम् ॥ नामोऽ२भाराऽ२ ॥
तयेमाऽ२३साऽ३४३इ । ओऽ२३४५इ ॥ डा ॥

(दी.४। प.७। मा.५)५(थु।२४)

(१५-१) ॥ जराबोधीये द्वे । द्वयोरग्निर्गायत्री रुद्रः ॥

जारा । बोधाऽ२बोधाऽ२ । तद्विविड्ढाइ ॥ विशेवाइशेऽ२ ॥ यज्ञाऽ२३ ।
यायाऽ३४औहोवा ॥ स्तोमऽ२ंरुद्रायदृशीकाम् ॥

(दी.७। प.७। मा.४)६(छी।२५)

(१५-२)

जराबोधोवा ॥ ताद्विविड्ढाइ । विशाइवाऽ२३इशे । यज्ञियाया ।
स्तोमाऽ२ंरुद्राऽ२३या । दृ । शीकोऽ३४५इ ॥ डा ॥

(दी.५। प.८। मा.४)७(बी।२६)

(१६-१) ॥ मारुतम् । मरुतो गायत्र्यग्निः ॥

प्रतित्याऽ२३ञ्चारुमध्वराम् ॥ गोपीथा । या । प्राहूयाऽ२३४साइ ॥ मरुद्भिः ।
आ । ग्राआगहा । औऽ३होवा । होऽ५इ ॥ डा ॥

(दी.५। प.१०। मा.५)८(मु।२७)

(साम-तन्त्र-सूत्राणि) (२३) ४भे दिञु दन्तिनि १०.४.२ उनि(ठ्या) छ्यात् ११.५.२; (२४) ५ खुँसा १.५.२; दोषादिः ६.१०.१; ब्यन्यमिनिदे ६.१०.९; दोषाया अन् ७.११.३; तएम् १२.९.५; (२५) ६नीचान्तानाम् १.१.२; ङिवस्थादुणि २.९.१; घे शते ४.७.१ दि दु ७.१.१; वृदाम् १०.१.१; (२६) ७ डायामामन्द्रात् ४.८.३; जिरे ५.९.८; णीथे वि ७.४.६; उञुयुक्प्रथमि १०.८.८; भे घोषे दुह्यक्षे १२.३.३; न मान्याम् १२.७.६; (२७) ८ वारा १.५.१०;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१७-१) (भार्गवे द्वे) ॥ वारवंतीयानि त्रिणि । द्वयोः भृगुः शुनःशेपो वा, गायत्र्यग्निः ॥

आश्वा । औहोऽ२३४वा । नात्वा । औहोऽ२३४वा ॥ वारवन्तंवन्दध्या । आग्ना । औहोऽ२३४वा ॥ नमोभिस्सम्राजन्ताम् ॥ आध्वराणाम् । औऽ२३होवा । होऽ५इ ॥ डा ॥

(दी.७। प.१२। मा.३)९(छि।२८)

(१७-२)

अश्वन्नत्वावारवन्ताम् ॥ वंदध्याअग्निन्नमोभाइः ॥ सम्राज । तमाध्वराऽ३४ । औहोवा ॥ इहाऽ२३४हाइ । औहोऽ३१२ । याऽ२३४औहोवा ॥ णाऽ२३४५म् ॥

(दी.१०। प.९। मा.७)१०(मे।२९)

(१७-३) ॥ वारवन्तीयम् । इन्द्रो, गायत्र्यश्वः ॥

अश्वन्नत्वाऔहोहाइ ॥ वारावाऽ२३४न्ताम् । वंदाध्याऽ२३४हाइ । अग्राइन्नमाऽ३४ । औहोवा। इहाऽ२३४हाइ । उहुवाऽ२३४भीः ॥ संम्राज । तामध्वराऽ३४ । औहोवा ॥ इहाऽ२३४हाइ । औहोऽ३१२३४ । णाम् । एहियाऽ६हा । होऽ५इ ॥ डा ॥

(दी.९। प.१६। मा.१०)११(तौ।३०)

(१८-१) ॥ सामुद्रे द्वे । समुद्रस्य वासो वा । और्वः, द्वयोरग्निः । गायत्र्यग्निः ॥

और्वभृगुवत् । ओहाइ ॥ शूऽ२३४चीम् । आप्नवान । वदाऽ२हुवाऽ२इ । हुवओइ ॥ अग्राऽ२इंसमूऽ२ ॥ समुओ ॥ द्रवाससससाऽ३१उवा२३४५ ॥

(दी.२। प.९। मा.९)१२(झो।३१)

(१८-२) (वैधारय ऋषिर्वा)

और्वभृगुवच्छुचिम् । एऽ५ । शुचीम् ॥ आप्नवान । वदाऽ२३हुवाइ । हुवाऽ२३इ । हुवए ॥ अग्राइंसाऽ३मू ॥ समूऽ२३ । समुएऽ३ । द्राऽ२वाऽ२३४औहोवा ॥ ससाऽ३मेऽ२३४५ ॥

(दी.४। प.१२। मा.८)१३(थै।३२)

(साम-तन्त्र-सूत्राणि) (२९) १० उदुह्वरेहान्ते ४.३.३; ज्यन्ते ६.३.२; यि नगौ ११.७.५; (३०) ११ लघुयिनि ५.२.१०; (३१) १२ गतिमतायुग्धिया १.१०.१०; चि ६.१०.८; मान्चोद्रनव्यन् ७.५.३; मोदम् ९.९.६; (३२) १३ कया १.८.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१९-१) ॥असंगम् । (आसंग:) अत्रिर्गायत्र्यग्निः ॥

५ ४ ५ र ४र ५ र ४र ५ ३ ४ ५ र र न २
अग्निमिन्धानोमनसौ । हौहोवाहाइ ॥ धियःसचेतमौ । होऽ३हाऽ३ ॥
१ १ २ १ ३ ५र र २ १ ३ १ १ १
होऽ२३४र्तियाः ॥ अग्रायेऽ३म् । आऽ२इंधाऽ२३४औहोवा ॥ विवस्वभीऽ२३४५ः ॥

(दी.८। प.८। मा.६)१४(ङ्कू।३३)

(२०-१) ॥ निधनकामम् । प्रजापतिर्गायत्र्यग्निः ॥

४र र ४ १र र — १ २ १र — १
आदित्प्रत्नाऽ५स्यरेतसाः ॥ ज्योतिःपश्यन्तिवासाऽ२राम् ॥ परोयाऽ२दिध्यताइ ॥
२ १ २र १र २र १ १ १ १
दिवि । होइ । होइ । औहोऔहोवाऽ२३४५हाउ ॥ वा ॥

(दी.८। प.८। मा.७)१५(डे।३४)

पञ्चदशः द्वितीयः खण्डः । इति ग्रामगेयगाने प्रथमस्यार्द्धः प्रपाठकः ॥

(२१-१) ॥ सैन्धुक्षितानि त्रीणि । त्रयाणां सिंधुक्षिद्गायत्र्यग्निः । स्वारं सैन्धुक्षितम् ॥

५ र ४ ५ १ २र र १ २र र ^२ १ — १
अग्निंवोवृधान्ताम् । आध्वराणाम् । पुरूतामौ । होवाऽ३हाइ ॥ आच्छाऽ२नाप्त्रेऽ२३ ॥
२ १ ५ ४ ५
सहोऽ२३४वा । स्वाऽ५तोऽ६हाइ ॥

(दी.५। प.७। मा.४)१(फी।३५)

(२१-२)

५ ५ २ १ र र र — २
अग्निंवाऽ६ए ॥ वृधन्ताम् । अध्वराणाम्पुरूतममच्छाऽ२होऽ१इ ॥ नाऽ२३प्त्रे ॥
१ ३ ५
सहास्वाऽ२३४५ताऽ६५६इ ॥ ईऽ२३४ती ॥

(दी.३। प.६। मा.४)२(टी।३६)

(२१-३) ॥ ऐंडं सैंधुक्षितम् ॥

५ ४ ५ ४ १ २ १ र र २ २ ^ २
अग्निंवः । ओहाइ ॥ वृधाऽ२३न्ताम् । अध्वराणाम्पुरूऽ१ताऽ३माम् ॥
र ३ ५ १ २ २ १ २ ^ ४ ५ ४
अच्छानप्त्रोऽ२३४हाइ ॥ साहाऽ३हा । स्वता । औऽ३होवा । होऽ५इ ॥ डा ॥

(दी.३। प.१०। मा.६)३(णू।३७)

(साम-तन्त्र-सूत्राणि) (३३) १४ दि १.२.१०; ह चु हि ४.१.५; उदु (ह्ये) (ह्यिषु) ४.१.९; लोः ११.६.९; मेऽण् १२.४.५; (२८.३४) साम्नोः प्रत्येकं सामतन्त्रसूत्राणि न सन्ति । (३५) १ विश्वे दिकेऽन्त्येषु २.५.६; सहो ४.१.७; होवि ६.४.५; सन्ध्यात् ११.५.७; (३६) २ आदिः १.१.६; वृद्धं नौ ४.९.७; सि ६.१०.१०; भे पदम् ८.८.२; (३७) ३ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२२-१) ॥ हरसी द्वे । द्वयोरग्निर्गायत्र्यग्निः ॥

१ २८३ ५ २ ८ १ २८ ३ ५ १ २८३ ५
आग्नाओऽ२३४वा ॥ तिग्मेनऽ३शो । चाइषाओऽ२३४वा ॥ याःसाओऽ२३४वा ॥

१ २८ ३ ५ २ १ व्रिर र ३ २
वाइश्वान्निया । त्राइणाओऽ२३४वा ॥ अग्निर्नोऽ२वःसतेरयीऽ१म् ॥

(दी.३। प.७। मा.८)४(ठै।३८)

(२२-२)

४ ५ ४ ५ ३ ५ २ ८३ ५ १ ३ ५
ओहा । ओग्नीः ॥ ताऽ२३४इग्मे । नाशोचाऽ२३४इषा । यःसाऽ२द्वाऽ२३४इश्वाम् ।

२ ३ ५ २ १ व्रिर १ ८ ३ ५र र ३ ५
नियत्राऽ२३४इणाम् ॥ अग्निर्नोऽ२ ॥ वःसाऽ२ताऽ२३४ओहोवा ॥ राऽ२३४यीम् ॥

(दी.३। प.९। मा.९)५(ढो।३९)

(२२-३) ॥ इहवद्वामदेव्यम् । वामदेवो, गायत्र्यग्निः ॥

५ ४ ५ ४र ५ र ४ ५र ४ १ १ २
अग्निस्तिग्मेनशोचिषा । इहा ॥ यऽःसद्विश्वंन्यत्रिणाऽ२म् । इहा ॥

१ र १ २ १ ५ ५
अग्निर्नोवःसताऽ२इ । इहाऽ३ ॥ राऽ२३४योऽ६हाइ ॥

(दी.४। प.७। मा.३)६(थि।४०)

(२३-१) ॥ यामम् । यमो, गायत्र्यग्निः ॥

१ अ ८ ३ २ ८ ३ ५ १ र ८ ३ २८३ ५
अग्नाइमृडाऽ२ । महाःआऽ२३४सी ॥ अयआदाऽ२इ । वयुआऽ२३४नाम् ॥

१ र ३ २ ८ ४
इयेथबाऽ२३ ॥ हिराऽ३साऽ५दाऽ६५६म् ॥

(दी.२। प.६। मा.६)७(चू।४१)

(२३-२) ॥ उत्तरयामम् । यमो, गायत्र्यग्निः ॥

३४र ३ ४३र ४ ५ ३र २ ८ ४ ५ ३ ४ ३र४र ३ ४ ५ ३र २ ८ ४ ५
अग्रेमृडमहाऽःअसि । ओहाऽ३ओहा ॥ अयआदेवयुअनम् । ओहाऽ३ओहा ॥

२१र २ ३ २ ८ ४
इयेथाऽ२३ब ॥ हिराऽ३साऽ५दाऽ६५६म् ॥

(दी.७। प.६। मा.६)८(चू।४२)

(२४-१) ॥ राक्षोघ्ने द्वे । अग्निर्गायत्र्यग्निः ॥

५ र २ ८ ४र ५र ४ ५ १ र २ १ २ १ २
अग्नेराऽ३क्षाणोअःहसाः ॥ प्रतिस्मदेवरिषाऽ२३ताः ॥ तपाइष्ठाऽ२३इरा ॥

१र २ १
जरोदाऽ२३हाऽ३४३ । ओऽ२३४५इ । डा ॥

(दी.५। प.६। मा.६)९(पू.।४३)

(साम-तन्त्र-सूत्राणि) (३८) ४ नौ जेः-२.६.६; उदात्तम् २.९.१०; सन्ध्ये १०.४.६; इञु ड्यादिषु ११.४.७; (३९) ५ ण्यमि ११.१.८; (४१) ७ विष्णोरुदयुक् ३-९.७; (६.८ साम्नोः पृथक् सूत्राणि न सन्ति) (४३) ९ इ ७.४.१;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२५-१) ॥ राक्षोघ्नम् । अग्निर्गायत्र्यग्निः ॥

अग्नेयूऽ३ङ्क्ष्वाहियेतवा ॥ अश्वासोदेवसाधाऽ२३वाः ॥ अरंवाऽ२३हा ॥
तियाशाऽ२३वाऽ३४३ः । ओऽ२३४५इ ॥ डा ॥

(दी.८। प.६। मा.३)१०(टि।४४)

(२६-१) ॥ वैश्वमनसम् । विश्वमना, गायत्र्यग्निः ॥

नित्वा । होऽ३इ । न । क्षिया ॥ वाइश्पताइ । द्युमन्तम् । धाइ । माहेवाऽ२३४याम् ॥
सुवोहाइ ॥ रामग्नाओऽ२३४वा । होऽ५तोऽ६हाइ ॥

(दी.३। प.११। मा.९)११(टो।४५)

(२७-१) ॥ अग्नेः आर्षेयम् । अग्निर्गायत्र्यग्निः ॥

अग्निर्मूर्द्धादीऽ६वःककूत् ॥ पातीऽ२४पार्थीऽ२ । वियाअयाम् ॥ आपाऽ२ऽराइताऽ२ ॥
सिजिन्वाऽ२३ताऽ३४३इ । ओऽ२३४५इ ॥ डा ॥

(दी.३। प.७। मा.६)१२(ठू।४६)

(२८-१) ॥ सोमसाम । सोमो, गायत्र्यग्निः ॥

इममूषू ॥ त्वमास्माऽ२३४काम् । सानीऽ२ऽहोइ । गायाऽ२हो । त्रन्नव्याऽ२३ऽसाम् ॥
आग्नेऽ२होइ । दाइवाऽ२हो ॥ षुप्रावोऽ२३चाऽ३४३ः । ओऽ२३४५इ ॥ डा ॥

(दी.१। प.१०। मा.७)१३(ङे।४७)

(२९-१) ॥ गौपवनम् । गोपवनो, गायत्र्यग्निः ॥

तंत्वागोपा ॥ वानोऽ२गाऽ२३४इरा । जनाइष्ठदा । ग्नयाऽ२ङ्गाऽ२३४इराः ॥
सपौवाओऽ२३४वा । कौवाओऽ२३४वा ॥ श्रुधीऽ५हवाम् । होऽ५इ ॥ डा ॥

(दी.२। प.९। मा.८)१४(झै।४८)

(३०-१) ॥ सूर्यम् । सूर्यवर्च्चा वा, वसुरोचिर्वा, गायत्र्यग्निः ॥

पर्यो । होइवाजा ॥ पताइःकाऽ१वीऽ२ः । आग्निर्हव्या । नायक्रमीऽ२त् ॥
दधाऽ२३त् ॥ राऽ२त्नाऽ२३४औहोवा ॥ निदाशुषेऽ२३४५ ॥

(दी.५। प.८। मा.६)१५(बू।४९)

(साम-तन्त्र-सूत्राणि) (४५) ११ ऊष्मादिभ्यः १.८.८; ग्यचु गुरौ ५.५.३; अं लघु ८.३.२; ग्न भे ८.३.३; (४६) १२ अन्तस्थायाम् ८.२.८; (४७) १३ अष्ट्यामाये ५.६.९; उत्तमिन्यसु ६.११.१; दात् ६.११.२; नीचे ६.११.६; दाल्लघु ७.४.४; (४८) १४ प्रह्वृचि १.१०.२; आ ५.३.८; तृतीयपरे ५.५.२ ग्नि ७.३.६; वौ ११.९.४; वा ओवायाम् १२.४.१०; (४९) १५ हसण् ५.१०.५; व्यस्थे १२.८.८;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(३१-१) ॥ सौर्यम् । सूर्यो, गायत्री, सूर्यः ॥

उदुत्यम् । ओहाइ ॥ जा । तवेऽ२दाऽ२३४साम् । देवंवहा । तीकेताऽ२३४वाः ॥ दाऽ२३४र्शेहाइ ॥ वाइश्वायसू । र्याम् । औऽ२३होवा । होऽ५इ ॥ डा ॥

(दी.४। प.१२। मा.८)१६(थै।५०)

(३२-१) ॥ कावम् । कविर्वसुरोचिर्गायत्र्यग्निः ॥ (र्वसुरोचि) *

कविमग्नीम् ॥ उपाऽ२३ । स्तूऽ२हाऽ२३४औहोवा । सत्यधर्माणमध्वरे ॥ देवाम् ॥ अमीवचाताऽ२३नाऽ३४३म् । ओऽ२३४५इ ॥ डा ॥

(दी.७। प.८। मा.५)१७(जु।५१)

(३३-१) ॥ काशीतम् कापीतं वा सुमन्दं वा । पारावतो (पारावतिर्वा)*गायत्र्यग्निः ॥

शन्नोदेवीः । अभिष्टाऽ२३याऽ३४इ ॥ शन्नोभवा ॥ तुपीताऽ२३याऽ३४इ ॥ शंयोरभी ॥ स्रव । तूऽ२ । नाऽ२३४ । औहोवा ॥ ऊऽ२३४पा ॥

(दी.७। प.१०। मा.३)१८(ञ्वि।५२)

(३३-२) ॥ काशीत्तोत्तरम् । पारावतो, गायत्र्यग्निः ॥

हुवाऽ३होऽ२३४इ । शन्नोदेवीः । अभिष्टयाइ ॥ हुवाऽ३होऽ२३४इ ॥ शन्नोभव । तुपीतयाइ ॥ हुवाऽ३होऽ२३४इ । शंयोरभि । स्रवन्तुनाः । हुवाऽ३होऽ२ । वाऽ२३४औहोवा ॥ ऊऽ२३४पा ॥

(दी.८। प.१२। मा.८)१९(ठ्वै।५३)

(३४-१) ॥ मनाज्ये द्वे । द्वयोर्गोतमो (गोरांगिरसो वा)* गायत्र्यग्निः ॥

कस्यानूऽ१नाऽ२म् । परीणाऽ२३४सी ॥ धियोजिन्वाऽ२ । सिसत्पाऽ२३४ताइ । गोषातायाऽ२३ ॥ स्याऽ२ताऽ२३४औहोवा ॥ उप् । गीऽ२३४राः ॥

(दी.५। प.८। मा.५)२०(बु।५४)

(साम-तन्त्र-सूत्राणि)

(५०) १६ जारा १.२.५; उच्चं गेस्पर्शात् १.९.८; उत् ४.९.९; तडिनि ९.२.८; त्यन्गि ११.१.१;

(४४।१० दशमस्य पृथक्सूत्राणि न सन्ति)

(१७.१८.२१ साम्नां पृथक्सूत्राणि न सन्ति)

(५३) १९ उदुह्लोऽडि ७.८.१; इ जु प्रथमओर्वि १०.५.८;

(५४) २० मध्यम् १.२.३; तृतीयपरे ४.५.९;

* आर्षेयब्राह्मणरीत्या ऋषिविकल्पः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(३४-२) ॥ गौराङ्गिरसस्य साम, गौतमस्य, मनाज्यं मनाज्योत्तरं वा ॥

२र र ^ १ २३२ र ^ ४ २र३ ५ २र र १
ओहोइहुऽ३वाऽ२३इ । हुवए । कस्यनूनाऽ३०पाऽ३रीणसि ॥ ओहोइहुऽ३वाऽ२३इ ।
२३२ र ^ ४ २ ३५ २र र १ २३२ र र र
हुवए । धियोजिन्वाऽ३सीऽ३सत्पताइ ॥ ओहोइहुऽ३वाऽ२३इ । हुवए । गोषाताय ॥
३ २ ४
स्यंताऽ३इगाऽ५ँइराऽ६५६ः ॥

(दी.१२। प.१०। मा.१३)२१(जि।५५)

एकविंशतिः । तृतीयः खण्डः ॥३॥

(३५-१) ॥ उपहवौ द्वौ । द्वयोर्भरद्वाजो, बृहत्यग्निः ॥

५ र २र ^ १ ^ ३ २ ^ ३र२ ^ १ २ ३ ५
यज्ञायज्ञा ॥ वोअग्नयाऽ३इ । गिराऽ२गिराऽ३४ । हाहोऽ३इ । चादक्षाऽ२३४साइ ।
१ विर १ २र १२ १ २ १
प्रप्राऽ२वयममृतंजा । तावेऽ१दासाऽ२म् ॥ प्रियम्मित्राम् । नशꣳसिषाम् ॥
३र २^ ३र र
एहिया । औहौहोऽ२३४५इ ॥ डा ॥

(दी.८। प.१२। मा.८)२२(ठै।५६)

(३५-२)
४ ३र ४ ५र २ ^ २ ३ २ ^ ५ ३ र २ १ ^ ३ २ १
यज्ञायज्ञा । होइ । वोऽ३ग्नयएऽ३४ । हिया ॥ गिरागिरा । चाऽ२दक्षसाइ ।
२ ३र२ १ २ १ २ ^ १ ^ ३ ५ २१ २ १
प्रप्रावयाम् । अमृतंजाऽ३ । तवेऽ२दाऽ२३४साम् ॥ प्रियम्मित्राम् । नशꣳसिषाम् ॥
३र २^ ३र
एहिया । औहोऽ२३४५इ ॥ डा ॥

(दी.६। प.१४। मा.८)२३(घै।५७)

(३५-३) ॥ श्नौष्टीगवम् । श्नुष्टीगुर्बृत्यग्निः ॥

१ र १ १ र १ अ
याज्ञायाज्ञाऽ२ । वोअग्नायाऽ२इ ॥ गाइरागाइराऽ२ । चादक्षासाऽ२इ ।
१ १ २ ^ १ ^ ३ ५ १
प्रप्रावायाऽ२म् । अमृतंजाऽ३ । तवेऽ२दाऽ२३४साम् ॥ प्रायम्माइत्राऽ२म् ॥
१ अ २ ^ १
नाशꣳसाऽ२३इषाऽ३४३म् । ओऽ२३४५इ ॥ डा ॥

(दी.२। प.११। मा.१२)२४(चा।५८)

(साम-तन्त्र-सूत्राणि)

(५६) २२ उणो वयु ३.२.३; प्रि ७.१०.१ अण् ८.२.३; दोश्चिक्रः १०.९.१०; आ खिडः ११.८.७;

(५७) २३ पत १.४.१; यरेऽप्रथमे ८.४.६; हियायां नचागोः १२.७.९;

(५८) २४ अभिगीते प्रथमिपरे ५.२.९; यचु यरे ५.७.५; इनः ६.९.५; अपंचिनः ६.७.७;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(३५-४) ॥ यज्ञायज्ञीयम् । (भरद्वाजः) अग्निर्वैश्वानरो, बृहत्यग्निः ॥

यज्ञाऽ५य । ज्ञाऽ३वोऽ३ग्नायाइ ॥ गाइरागिरा । चाऽ३दाक्षाऽ३साइ । प्रप्राऽ२वयममृतम् । जाताऽ२३वां । हिम्माइ ॥ दाऽ३साम् ॥ प्रायम्मित्र-न्नशाऽ२ंसिंषाउ ॥ वाऽ३४५ ॥

(दी.३। प.१०। मा.७)२५(णे।५९)

(३६-१) ॥ कार्त्तयशम् । कृतयशा, बृहत्यग्निः ॥

पाहिनोऽ३अग्नएकया ॥ पाहियुत । द्वितायाऽ१याऽ२ । पाहिगीर्भिस्तिसृभिः । ऊर्जाम्पाऽ१ताऽ२इ । पाहिचतौऽ३ । होऽ३वा ॥ सृभिर्वाऽ२३साऽ३४३उ । ओऽ२३४५इ ॥ डा ॥

(दी.४। प.१०। मा.६)२६(नू।६०)

(३६-२) ॥ नार्मेधम् । नृमेधा, (भरद्वाजः) बृहत्यग्निः ॥

पाहिनोअग्नएकयाऽ६ए ॥ पा । होइ । उ । ता । द्वितायाऽ३या । पाहोऽ२इगाऽ२३४इर्भीः । ताइसृभिः ॥ ऊर्जाम्पाता । औहौहोऽ२३४वा । पाऽ२३४हिहाइ ॥ चतासृभा । औहौहोऽ२३४वा ॥ वाऽ२३४साउ । एहियाऽ६हा । होऽ५इ ॥ डा ॥

(दी.११। प.१७। मा.१२)२७(खा।६१)

(३६-३) ॥ कार्त्तवेशम् । कृतवेशो, (भरद्वाजः) बृहत्यग्निः ॥

पाहिनोअग्नए । कयाऽ३ । पाऽ२३४ । हियुतद्विती । याया ॥ पाहिगीर्भिस्तिसृभिरूर्जाम् । पाऽ३ताइ ॥ पाहोइचाऽ३ताऽ३४ । हाओवा ॥ सृभिर्वसो ॥ उपाऽ२३४५ ॥

(दी.११। प.११। मा.६)२८(कू।६२)

०

(साम-तन्त्र-सूत्राणि)

(५९) २५ तृतीयाद्यज्ञे ३.५.५; दस्मादिः कृष्ट्वा ३.८.४; मदे ५.६.१०; शंस्तुडः ५.८.७; तुडि व्यादेः ७.१.९; न प्रप्र सहयोः ११.८.८;

(६०) २६ दान्त्ये ९.५.५;

(६१) २७ पात् १२.२.५;

(६२) २८ नीचंमन्द्रं नीचे ३.५.३; नद्यादेर्जात् ९.४.८;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(३७-१) ॥ पृश्निनी द्वे । भरद्वाजो, बृहत्यग्निः ॥

बृहाद्भीऽ२३रग्नेअर्चिभिर्हाउ ॥ शुक्राइणदेवशोचिषा । भराद्वाऽ१जेऽ२३ । होवाऽ३हाइ । समिधानः । याविष्ठियाऽ२३ । होवाऽ३हाइ ॥ रेवात्पाऽ१वाऽ२३ । होवाऽ३हाइ ॥ कादीदिहि । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.७।प.१३।मा.८)२९(जै।६३)

(३७-२) ॥ भरद्वाजो, बृहत्यग्निः ॥

बृहद्भिरग्नेअर्चिभीऽ६रे ॥ शुक्राइणदेवशोचिषा । भराद्वाऽ१जेऽ२३ ॥ ओऽ३वा । समिधानः । याविष्ठियाऽ२३ । ओऽ३वा ॥ रेवात्पाऽ१वा२३ । ओऽ३वा ॥ कादीदिहि । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.७।प.१३।मा.४)३०(जी।६४)

(३८-१) ॥ उरोराङ्गिरसस्य साम । उरुर्बृहत्यग्निः ॥

त्वेआऽ२३ग्नेस्वाहुतहाउ ॥ प्रियासस्सन्तुसूरयः । यन्तारोऽ१याऽ२३४इ । मघवानोजना । नाऽ३म् ॥ ऊर्वन्दयाऽ२३हा ॥ तगोनाऽ२म् । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.१०।प.१०।मा.७)३१(मे।६५)

(३९-१) ॥ पौरुमद्गे द्वे । द्वयोर्गोतमो, बृहत्यग्निः ॥

अग्नेजरितर्विश्पतिः । औहोवा । एहिया । हाउ ॥ तपानोदेऽ२वरक्षसः । अप्रोषाऽ१इवाऽ२न् । गार्हपताऽ३इ । माहाऽ२आऽ२३४सी ॥ दिवाः । पायौवाओऽ२३४वा ॥ हाऽ३हाइ । दुरोऽ५णयूः । होऽ५इ ॥ डा ॥

(दी.६।प.१४।मा.१२)३२(घा।६६)

(३९-२)

अग्रेजरितर्वि । श्पतीऽ३ः । ताऽ२३४ । पानोदेवर । क्षसाः ॥ तापानोदेवरक्षसो । अप्रोषीऽ३वान् । गृहपताइ । माहाऽ२आऽ२३४सी ॥ ओऽ४हा । हहाइ ।

(साम-तन्त्र-सूत्राणि)

(६३) २९ दे सूरे वाघद्ध्यादितः १.६.६; सि मासे २.३.१; घम् २.७.५; ईशे ४.४.७; वाचि ११.९.३;

(६४) ३० ब्रध्ने बि ४.६.७;

(६५) ३१ त्वे ८.७.२; ण्यय १०.७.७;

(६६) ३२ अचुनवृद्ध्योर्नावि ६.१.९;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिवस्पायूऽ२३४५: ॥ ओऽ४हा । हहाइ । दुरोणयूऽ२३४५: । ओऽ४हा । हहाऽ३४३इ । ओऽ२३४५इ ॥ डा ॥

(दी.९।प.१९।मा.११)३३(धा।६७)

(४०-१) ॥ माण्डवे द्वे । जमदग्निः, द्वयोर्मण्डुर्वृहत्यग्निः (उषा) ॥

अग्नेविवाहाउ ॥ स्वाऽ३दूषाऽ३साः । चाइत्राऽ३ःहाइ । राधोऽ३हाऽ३इ । अमाऽ२र्ताऽ२३४या । आदाऽ१शुषेऽ२ । जातवेदः । वहातूऽ१वाऽ२म् ॥ अद्याहोइ । दाऽ२३इवांः ॥ उषः । बूऽ२धाऽ२३४औहोवा ॥ हुवेवसूऽ२३४५ ॥

(दी.७। प.१३। मा.११)३४(ज।६८)

(४०-२) ॥ विदावसुनिधनम् । माण्डवम् ॥

अग्नेविवस्वदुषासाः ॥ चित्रःराधोअमाऽ२र्तिय । आदाऽ१शुषेऽ२ । जातवेदः । वहातूऽ१वाऽ२म् ॥ अद्यादाऽ२३इवांः ॥ उषः । बूऽ२धाऽ२३४औहोवा ॥ विदावसूऽ२३४५ ॥

(दी.९। प.९। मा.७)३५(धे।६९)

(४१-१) ॥ गाथम् । भरद्वाजो, बृहत्यग्निः ॥

त्वन्नाऽ२३श्चित्रऊत्या ॥ वसोराधा । सिचोदाऽ१याऽ२३ । आस्याराऽ२३४याः । त्वमग्ने । रथाइरासाऽ३इ ॥ वीदागाऽ२३४धाम् । तुचाऽ२३हाइ ॥ तुना । औऽ३होवा । होऽ५इ ॥ डा ॥

(दी.२। प.१२। मा.७)३६(छे।७०)

॥ इति ग्रामगेयगाने प्रथमः प्रपाठकः ॥१॥

(साम-तन्त्र-सूत्राणि)

(६७) ३३ किनि हावति २.१०.८; ह ५.५.७; पिनोऽवृद्धे ५.९.२;

(६८) ३४ द्विताया: ४.१०.४; वादिभ्याम् ९.५.९; अञु ८.८.३;

(६९) ३५ अ मिनि २.२.४; तालव्यादेर्म ३.२.१;

(७०) ३६ घ्वन्धः ६.१.६; त्यवि ९.३.७; स्यञु नपु १०.७.८; ओऽडि ११.३.४;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(४२-१) ॥ उभयत स्तोभम् गौतमम् । गोतमो, बृहत्यग्निः ॥

हाउत्वमित्सप्रथाअसिहाउ ॥ आग्नेत्रातः । ऋताःकवाऽ२३४इः । हाहोइ । त्वांविप्रासःसमिधा । नादीदिवाऽ३४ः । हाहोइ ॥ आविवासाऽ३४ । हाहोऽ३ ॥ तिवोऽ२३४वा । धाऽ५सोऽ६हाइ ॥

(दी.११। प.११। मा.१०)१(कौ।७१)

(४२-२) ॥ गौतमम् । गोतमो, बृहत्यग्निः ॥

त्वंत्वाऽ६मे ॥ इत्सप्रऽ३थायासाइ । आऽ२३४सी । आग्नेत्रातः । ऋताःकवाऽ२इः । काऽ२३४वीः । त्वांविप्रासःसमिधा । नादीदिवो । दाऽ२३४इवाः ॥ आविवासाऽ२३हा । तिवेधाऽ२३साऽ३४३ः । ओऽ२३४५इ ॥ डा ॥

(दी.८। प.१३। म.९)२(ढो।७२)

(४३-१) ॥ आयुः साम । अग्निर्बृहत्यग्निः ॥

आनोअग्नेवयोवृधम् । एऽ३४ । रयाऽ३४५इम् । पावऽ३काशꣳसाऽ२३याम् । रास्वाचनउपमाते । पूरुस्पृहाऽ२म् ॥ सुनाइताइसूऽ३हाइ ॥ यशस्तराम् । औऽ२३होवा । होऽ५इ ॥ डा ॥

(दी.९। प.११। मा.१२)३(ता।७३)

(४४-१) ॥ हरसी द्वे । द्वयोरग्निर्बृहत्यग्निः ॥

योविश्वाऽ३दायतेवसू ॥ होताऽ२मान्द्रोऽ२ । जनानाम् । माधोऽ२र्नापाऽ२ । त्राप्रथमान्यस्मै ॥ प्रास्तोऽ२मायाऽ२३ ॥ तुवोऽ२३४वा । ग्नाऽ५योऽ६हाइ ॥

(दी.७। प.८। मा.२)४(जा।७४)

(४४-२)

योविश्वादयतेवसुहाउ ॥ होताऽ२मान्द्रोऽ२ । जनानाम् । ओवा । ओवा । माधोऽ२र्नापाऽ२ । त्राप्रथमान्यस्मै । ओवा । ओवा ॥ प्रास्तोऽ२माया२३॥ तुवोऽ२३४वा । ग्नाऽ५योऽ६हाइ ॥

(दी.८। प.१२। मा.३)५(ठि।७५)

(साम-तन्त्र-सूत्राणि)

(७१) १ (पृथक् सूत्राणि न सन्ति) (७२) २ वि ६.३.१; प्रथा: १३.९.३

(७३) ३ सुन्यारेर्वच ७.५.६; (७४) ४ अवृद्धार्चिकस्य ९.४.७;

(७५) ५ (पृथक् सूत्राणि न सन्ति ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(४४-३) ॥ दैर्घश्रवसे द्वे । द्वयोर्दीर्घश्रवा, बृहत्यग्निः ॥

योविश्वादयतेवस्वोहाओहाऽ६ए ॥ होताऽ२मन्द्रोजनाऽ२नाम् । ओऽ३हा। ओऽ३हाऽ३एऽ३४ ॥ मधोऽ३४र्नपा ॥ त्राप्रथ । मानायस्माइ । ओऽ३हा । ओऽ३हाऽ३एऽ३४। प्रस्तोऽ३४मायाऽ३ ॥ तुवोऽ२३४वा । ग्नाऽ५योऽ६हाइ ॥

(दी.१३। प.१२। मा.७)६(ठे।७६)

(४४-४)

योविश्वादयतेवसूऽ६ए ॥ होतामन्द्रोजनानाम् ॥ माधोऽ१र्नापौ । वाऽ३२ ॥ त्राप्रथमान्यस्मै ॥ प्रास्तोऽ१मायौ । वाऽ३२ ॥ त्वग्नये । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.१२। प.११। मा.३)७ (चि।७७)

॥ द्वाविंशतिः चतुर्थः खण्डः ॥४॥ दशतिः ॥

(४५-१) ॥ आग्नेये द्वे । द्वयोरग्निर्बृहत्यग्निः ॥

एनावोअग्निंनामसा ॥ ऊर्जोनपा । तामाऽ१हुवेऽ२ । प्रायंचेतिष्ठमरतिम् । सुवाध्वाऽ१राऽ२म् ॥ विश्वास्याऽ१दूऽ२ ॥ साममृतम् । इडाऽ२३भाऽ३४३ ॥ ओऽ२३४५इ ॥ डा ॥

(दी.६। प.१०। मा.५)८(ड्डु।७८)

(४५-२)

एनावोअग्निन्नमसाहाउ ॥ ऊर्जोनपा । तामाऽ१हुवेऽ२३। हाउ । प्रायंचेतिष्ठमरतिम् । सुवाध्वाऽ१राऽ२३म् । हाउ ॥ विश्वास्याऽ१दूऽ२३ । हाउ ॥ साममृतम् । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.७। प.१३। मा.९)९(जो।७९)

(साम-तन्त्र-सूत्राणि)

(७६) ६ तृतीये ३.८.२; मधोक्षरे नावि ४.३.१०; योवत्यामु ९.६.८; गिनि स्य षद् १०.४.७;

(७७) ७ नवि ६.६.५;

(७८) ८ चद १०.६.४;

(७९) ९ स्थायां बार्हतमु ५.१०.३; हाउतुडि न भयुक् ११.१०.८;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(४५-३) ॥ मनाज्ये द्वे । द्वयोर्गोतमो, बृहत्यग्निः ॥

एनावोअग्निमेऽ५नमसा ॥ ऊर्जोनपातमाहुवे । प्राऽ२३याम् । चाइतिष्ठम् । आरतिम् । सुवाध्वाऽ१राऽ२म् ॥ विश्वास्याऽ१दूऽ२ ॥ ताममृतम् । इडाऽ२३भाऽ३४३ । औऽ२३४५इ ॥ डा ॥

(दी.८। प.११। मा.८)१०(टै।८०)

(४५-४)

एनावोअग्निन्नमसो । जोनपोवा ॥ तामाहुवे । प्राऽ२३याम् । चाइतिष्ठम । राऽ२३तीम् । स्वध्वरम् । विश्वस्याऽ२३दू ॥ ताममृतम् । इडाऽ२३भाऽ३४३ । औऽ२३४५इ ॥ डा ॥

(दी.७। प.१२। मा.७)११(छे।८१)

(४६-१) ॥ दैवराजम् । देवराङ् (गौतमः) बृहत्यग्निः ॥

शेषेवनाऽ५इषुमातृषू ॥ सांत्वामर्तासः । इन्धाऽ२३ताइ । आतंद्रोहव्यंवह । साइ । हवीऽ२ष्काऽ२३४र्त्ताः ॥ आदिद्देवाइ ॥ षुराजाऽ२३साऽ३४३इ । औऽ२३४५इ ॥ डा ॥

(दी.८। प.१०। मा.८)१२(णै।८२)

(४७-१) ॥ गाथिनस्साम । कौशिको, गाथिर्बृहत्यग्निः ॥

अदर्शिगातुवित्तमाऽ६ए ॥ यास्मिन्(स्थि)व्रतानियादधुः । ऊपोषुजाऽ३ । हाऽ३हाइ । तमारियस्यवर्द्धनम् ॥ अग्नाइन्नक्षाऽ३ । हाऽ३हा ॥ तुनोगिरः । इडाऽ२३भाऽ३४३ । औऽ२३४५इ ॥ डा ॥

(दी.६। प.११। मा.८)१३(कै।८३)

(४८-१) ॥ बार्हदुक्थे द्वे । द्वयोर्बृहदुक्थो, बृहत्यग्निः ॥

अग्निरुक्थाइ ॥ पुरोऽ३हाइताः । ग्रावाणोब । हिराऽ३ध्वाराइ । ऋचायामिमरुतोब्रह्माणस्पाताऽ२इ । दाइवाऽ२आवाऽ२३ः ॥ वरोऽ२३४वा । णाऽ५योऽ६हाइ ॥

(दी.६। प.८। मा.९)१४(गो।८४)

होऽ४वा । उहुवाऽ३ । होवा । प्रसेनानाइः । शूरोआऽ३ । ग्राइरथानाम् ॥
२ १ २र१ २ २ ३ ४ ५ २ १र २ १ २ २ ३ ४ ५
गव्यन्नेताइ । हर्षताऽ३इ । अस्यसेना ॥ भद्रान्कृण्वान् । इन्द्रहाऽ३ । वान्त्सखिभ्याः ॥
२र १र २र १ २ १ २ ३ ४ ५ ३ ५ ३ २ ४ ५
आसोमोवा । स्त्राऽ३रभ । सानिदत्ताइ । होऽ४वा । उहुवाऽ३ । होवाऽ६ ॥
होउवा ॥ (दी.९। प.१९। मा.११)१६(ध । १०३५)

(५३३-२)
५र ४ २ १११ २ १र२र १ र र २ २ ३ ४ ५ २ १ २र१
औहोऽ३वाऽ३४५ । प्रसेनानाइः । शूरोआऽ३ । ग्राइरथानाम् ॥ गव्यन्नेताइ ।
२ २ ३ ४ ५ २१र २ १ २ २ ३ ४ ५
हर्षताऽ३इ । अस्यसेना ॥ भद्रान्कृण्वान् । इन्द्रहाऽ३ । वान्त्सखिभ्याः ॥
र ४ २ १११ २र १र २र१ २ १ २ २ ४
औहोऽ३वाऽ३४५ । आसोमोवा । स्त्राऽ३रभ । साऽ३४३ । नीऽ३दाऽ५-
त्ताऽ६५६इ ॥ (दी.११। प.१५। मा.१०)१७(डौ । १०३६)

(५३३-३)
५र ४ २ १११ ३ र २र १ र र २ २ ३ ४ ५ ३ २र १
ओहोऽ३वाऽ३४५ । प्रसेनानाइः । शूरोआऽ३ । ग्राइरथानाम् ॥ गव्यन्नेताइ ।
२ २ ३ ४ ५ ३ र २ १ २ २ ३ ४ ५
हर्षताऽ३इ । अस्यसेना ॥ भद्रान्कृण्वान् । इन्द्रहाऽ३ । वान्त्सखिभ्याः ॥
५र ४ २ १११ ३र र२र१ २ १ २ २ ४
ओहोऽ३वाऽ३४५ । आसोमोवा । स्त्राऽ३रभ । साऽ३४३ । नीऽ३दाऽ५ ॥
३ १११
ताऽ२३४५इ ॥ (दी.११ । प.१६। मा.१०)१८(कौ । १०३७)

(५३४-१) ॥ वैश्वज्योतिषाणि त्रीणि । त्रयाणां विश्वज्योतिस्त्रिष्टुप्सूर्यः ॥

२र र २ र र र १ अ १११ २र र २
हाउहोवाऽ३हाइ । प्रतेधारामधुमऽ३ताइरसृग्राऽ२३४५न् ॥ हाउहोवाऽ३हाइ ।
र र र १ अ १११ २र र २
वारंयत्पूतोअतिऽ३याइषिआव्याऽ२३४५म् । हाउहोवाऽ३हाइ । पवमान-
र १ अ १११ २र र २ र
पवसेऽ३धामगोनाऽ२३४५म् ॥ हाउहोवाऽ३हाइ । जनयन्त्सूर्यमऽ३-
१ अ १११ २र र २ १११
पाइन्वोअर्काऽ२३४५इः । हाउहोवाऽ३हाउ ॥ वाऽ३४५ ॥
(दी.२०। प.१०। मा.२१)१९(म । १०३८)

(५३५-१) ॥ अस्य देवा देवता ॥

२ १र २ १ २ ३ ४ ५ २र १ २ १ २ ३ ४ ५
प्रगायता । अभिय । चामदेवान् ॥ सोमꣳहिनो । ताऽ३मह । तेधनाया ॥
२र १ २ १ २ ३ ४ ५ २र १र २ १ २
स्वादुꣳपवा । ताऽ३मति । वारमव्याम् ॥ आसीदतू । कलशम् । दाऽ३४३इ ।
२ ४
वाऽ३आऽ५इन्दूऽ६५६ः ॥ (दी.५। प.१३। मा.७)२०(बे । १०३९)

(साम-तन्त्र-सूत्राणि) (१०३५)१६ (पृथक् सूत्राणि न सन्ति) (१०३६)१७ चतुर्थात् ३.१.३; जेः १३.११.१२; (१०३७)१८ राःष्ठायाम् ४.८.८; (१०३८) आद्वि ९.१.३; (१०३९)२० (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५३६-१) ॥ इन्द्रोऽस्य देवता ॥

२र र २ र र र २ ३र५र २र र २
हाउहोवाऽ३हाइ । प्रहिन्वानोजनितारोऽ३४३दसीयोः ॥ हाउहोवाऽ३हाइ ।
र र २ ३र५र २र र २ र र
रथोनवाजंसनिषाऽ३४३नयासीत् ॥ हाउहोवाऽ३हाइ । इन्द्रङ्गच्छन्नायुधा-
२ ३र ५ २र र २ र र २ ३र ५
साऽ३४३ंशिशानः ॥ हाउहोवाऽ३हाइ । विश्वावसुहस्तयोराऽ३४३दधानः ।
४
दधाऽ५नाउ ॥ वा ॥ (दी. २३ । प.१०। मा.१३)२१(णि । १०४०)

(५३७-१) ॥ वाचस्सामनी द्वे । द्वयोः वाक्त्रिष्टुप्वाक्सोमौ ॥

३ ४ ५ र ३ १ १ १ ३ ४ र ३र४ ५ ३ १ १ १ ३र ४ ५
तक्षद्यदी । होऽ२३४५इ ॥ मनसोवेनतः । वाऽ२३४५क् ॥ ज्येष्ठस्यधा ।
३ १ १ १ ४ ३र ४ ५र ३ १ १ १ ३र४र ५र ३ १ १ १
होऽ२३४५ ॥ मन्द्युक्षोरनी । काऽ२३४५इ ॥ आदीमायन् । होऽ२३४५इ ॥
३ ४३र ४र५ र ३ १ १ १ ३ ४ ५ ३ १ १ १ ४ र
वरमावावशा । नाऽ२३४५: ॥ जुष्टम्पतिम् । होऽ२३४५इ ॥ कलशेगाऽ५वः ।
इ । दाउ ॥ वा ॥ (दी.१३। प.१८. मा.११)२२(ङ । १०४१)

(५३७-२)

२ १ २ ३ ४ र ३र४ ५ ३ १ १ १ २र १ २
तक्षद्यदाऽ३१२३४इ । मनसोवेनतः । वाऽ२३४५क् ॥ ज्येष्ठस्यधाऽ३१२३४ ।
३र ४ ५र ३ १ १ १ २र १ र २ ३ ४ ३र४र५ र
मन्द्युक्षोरनी । काऽ२३४५इ ॥ आदाइमायाऽ३१२३४न् । वरमावावशा ।
३ १ १ १ २ १ २ र
नाऽ२३४५: ॥ जुष्टम्पताऽ३१२३४इम् । कलशेगाऽ५वः । इ । दाउ ॥ वा ॥
(दी.११। प.१४। मा.११)२३(ध । १०४२)

(५३८-१) ॥ दाशस्पत्ये द्वे । द्वयोर्दशस्पतिस्त्रिष्टुप्सूर्यः ॥

४ ५ १ र २ १ २ १ — रि र र २ १ २
साकाम् ॥ उक्षोमर्जयन्तस्वसाऽ२३राः । दाशाऽ२ । धीरस्यधीतयोधनूऽ२३त्रीः ॥
१ — १ र अ २ १ — १ र र
हारीऽ२: । पर्यद्रवज्जाःसूरियाऽ२३स्या ॥ द्रोणाऽ२म् । ननक्षेअत्योनवाऽ२३ ।
२ १ १ १
हाउवाऽ३ ॥ जीऽ२३४५ ॥ (दी.७। प.१०। मा.७)२४(जे । १०४३)

(५३८-२)

५र ५ २ ५ ४ ५र र ५ २
साकमुक्षाऽ६ए ॥ एऽ३१२३४ । मर्जयन्तस्वसारः । दशधीराऽ६ए । एऽ३१२३४।
५र ४ ५र४ ५ र ५ २ ५ ४र र ५
स्यधीतयोधनुत्रीः ॥ हरिःपर्याऽ६ए । एऽ३१२३४ । द्रवज्जाःसूर्यस्य ॥
र ५ २ र ५र ४ ५ ५ ३ १ १ १
द्रोणन्ननाऽ६ए । एऽ३१२३४ । क्षेअत्योनवाऽ६ । हाउवा ॥ जीऽ२३४५ ॥
(दी.११। पा.१४ । मा.८)२५(घै । १०४४)

(साम-तन्त्र-सूत्राणि) (१०४०)२१ (१०४२)२३ (पृथक् सूत्राणि न सन्ति) (१०४१)२२ तक् २.१०.१०; दिवीउणि ३.५.२; (१०४३)२४ (१०४४)२५ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५३९-१)　॥ कश्यपस्य शोभनम् । कश्यपस्त्रिष्टुप्सूर्यः ॥

४ ५ ४ १ विर १ विर १ २ र १ र २ ३ ४ ५
अधियदा ॥ स्माइन्वाऽ२जिनीऽ२वशु । भाः । स्पर्द्धन्तेधियःसू । राइनविशाः ॥
२ १र र अ २ १ २ १ २
अपोवृणान५पवताइ । कवीऽ२३यान् । व्रजन्न । पा । शुवर्द्ध । नाऽ३४३ ।
२ ४
याऽ३माऽ५न्माऽ६५६ ॥

(दी.६। प.१२। मा.६)२६(खू । १०४५)

(५४०-१)　॥ दाशस्पत्यानि चत्वारि । चतुर्णां दशस्पतिस्त्रिष्टुप्सूर्यसोमेन्द्राः सोमेन्द्रौ वा ॥

२ १ — १ र र २ १ ५ १ २
इन्दुऽ३र्वाजीऽ२ । पवतेगोनियोघाः ॥ इन्द्राइसोऽ२३४माः । साहइन्वन्मदाया ॥
१ ५ १र र २ १ ५ २ १
हन्ताइराऽ२३४क्षाः । बाधतेपर्यरातिम् ॥ वराइवा२३४स्कृ । ण्वन्वृजानाऽ२३ ।
१ न २ ३ ५ ४
स्या । राऽ३जौवाओऽ२३४वा । होऽ५इ ॥ डा ॥

(दी.४। प.१२। मा.१०)२७(थौ । १०४६)

(५४०-२)

४ ५ र ४र५ र ४र ५ १ अ २ ३ ५ १ विर
इन्दुर्वाजीपवतौ । हौहोवाहाइ ॥ गोनियोघौ । वाओऽ२३४वा । इन्द्रेऽ२-
१र विर १ २ १ अ २ ३ ५ १ २ १२र१र २ र १ अ २
सोमाऽ२ःसहइ । न्वान्मदायौ । वाओऽ२३४वा ॥ हन्तिरक्षोबाधते । पार्यरातौ ।
३ ५ १ २ १ २ १ न २ ३ ५
वाओऽ२३४वा ॥ वरिवस्कृण्वन्वृजनाऽ३ । स्या । राऽ३जौवाओऽ२३४वा ।
४
होऽ५इ ॥ डा ॥　(दी.१०। प.१५। मा.७)२८(मे । १०४७)

(५४०-३)

५ र र र र ४ ५ २र २ र र १ २
इन्दुरौहोवाहाईया ॥ वाजाउ । वाऽ३ । हाउवा । पवतेगोनियोघाउ । वाऽ३ ।
२ १ २ १ २ २ १ ३
हाउवा । इन्द्राइसोमः । सहइन्वाउ । वाऽ३ । हाउवाऽ३ । माऽ२दा-
५र र ३ १ १ १ २ १ २ र १ २ २
ऽ२३४औहोवा । याऽ२३४५ ॥ हन्ताइरक्षो । बाधाताइपाउ । वाऽ३ । हाउवाऽ३ ॥
१ ३ ५र र ३ १ १ १ २ १ २ १ २
र्याऽ२राऽ२३४औहोवा । तीऽ२३४५म् ॥ वराइवस्कृ । ण्वन्वृजनाउ । वाऽ३ ।
२ १ ३ ५र र ३ १ १ १
हाउवाऽ३ । स्याऽ२राऽ२३४औहोवा ॥ जाऽ२३४५ ॥

(दी.१४। प.२५। मा.२१)२९(न । १०४८)

(साम-तन्त्र-सूत्राणि)(१०४५)२६ ताक्षादिभ्यः १०.९.७; (१०४६)२७ गतृतीयात् ३.४२; दुः ६.११.५; (१०४७)२८ (१०४९)३० (पृथक् सूत्राणि न सन्ति) (१०४८)२९ इदिन्ववत्यःमघोषिणः ६.४.९;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५४०-४)
५ २ २ २२ ४ ५ २ २ ४ ५ २ २
इन्दुर्वाजीपवतेगोनियोघाः ॥ इन्द्रेसोमःसहइन्वन्मदाया ॥ हन्तिरक्षोबाध-
२ ४ ५ ४ ५ ३२ २ ५२ २ २
तेपर्यरातीम् ॥ वरिवस्कृण्वन्वृजनस्यराजा । राजाऽ३४औहोवा ॥ एऽ३ ।
२ १२ ३ १ १ १
स्यराजाऽ२३४५ ॥ (दी.१३। प.७। मा.४)३०(ठी । १०४९)

॥ इति ग्रामे गेय-गाने पञ्चदशः प्रपाठकः ॥१५॥

(५४१-१) ॥ श्नौष्टानि त्रीणि । त्रयाणां श्रुष्टिस्त्रिप्सोमः ॥
५२ ४ ५ ४ ५ १२ २२ २ १ २ न २ ३ २ न २
औहोहाइ । अयोहाइ ॥ पवापवस्वैनावसूऽ२३नी । औऽ३होइ । इहा । ईऽ३या ।
२ १ २ २ १ २ न २ ३ २ न २ १
माःश्चत्वइन्दोसरसिप्रधाऽ२३न्वा । औऽ३होइ । इहा । ईऽ३या ॥ ब्रध्नश्चिद्य-
२ २ २ १ २ न २ ३ २ न २ १२ २
स्यवातोनजूऽ२३तीम् । औऽ३होइ । इहा । ईऽ३या ॥ पुरुमेधाश्चित्त-
२ २ १ २ न २ ३ २ १ ३ ५२ २ २
कवेनराऽ२३न्धात् । औऽ३होइ । इहा । ईऽ२ । याऽ२३४ । औहोवा ॥ एऽ३ ।
२२ ३ २
दीदिहीऽ१ ॥ (दी.१४ । प.२२। मा.९)१(थो । १०५०)

(५४१-२)
५ ४ ५ ४ ५ १ २ २ २ १ २ २ न २
अयोहाइ । पवोहाइ ॥ पवस्वैनावसूऽ२३नी । इहोइयाऽ३ । ईऽ३या ।
२ १ २ २ १ २ २ न २ १
माःश्चत्वइन्दोसरसिप्रधाऽ२३न्वा । इहोइयाऽ३ । ईऽ३या ॥ ब्रध्नश्चिद्यस्य-
२ २ २ १ २ २ न २ १२ २ २ २ १ २
वातोनजूऽ२३तीम् । इहोइयाऽ३ । ईऽ३या ॥ पुरुमेधाश्चित्तकवेनराऽ२३न्धात् ।
२ १ ३ ५२ २ २ २२ १ १ १ १
इहोइयाऽ३ । ईऽ२ । याऽ२३४ । औहोवा ॥ एऽ३ । दीदयाऽ२३४५त् ॥
(दी.१६। प.१८। मा.१०)२(गौ । १०५१)

(५४१-३)
२ ३ ५ २ १ ५ २ १२२ १२२ २ १२ २२
हाओऽ२३४वा ।(द्विः)। हाऽ३ओऽ२३४वा । हाउवा । अयापवापवस्वैनावसूनि ।
१ २ १ — १२ १२ २ १ २२ १ २१२ १२ १
इहइ । हियाऽ२ । इहा । इहा ॥ माःश्चत्वइन्दोसरसिप्रधन्व । इहइ । हियाऽ२ ।
१२ १२ १ २ १ २ १२२२ १२२ १ २ १ — १२ १२
इहा । इहा ॥ ब्रध्नश्चिद्यस्यवातोनजूतिम् । इहइ । हियाऽ२ । इहा । इहाऽ३ ॥
२ ३ ५ २ १ ५ १२२२ १ २२१ २२
हाओऽ२३४वा (द्विः)। हाऽ३ओऽ२३४वा । हाउवा । पुरुमेधाश्चित्तकवेनरन्धात् ।
१२ १ — १२ १ ३ १ १ १
इहइ । हियाऽ२ । इहा ॥ इहाऽ२३४५ ॥(दी.१४ । प.२८। मा.१५)३(दु । १०५२)

(साम-तन्त्र-सूत्राणि) (१०५०)१ (१०५१)२ (पृथक् सूत्राणि न सन्ति) (१०५२)३ ग्राम इह विपरीतं विश्वो रोहतु १३.११.१६;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५४२-१) ॥ आत्रम् । अत्रिस्त्रिष्टुप्सूर्यो विश्वेदेवा वा ॥

२ र र १ र र र १ र
महत्तत्सोमोमहिषश्चऽ३काराऽ२ ॥ अपांयद्गर्भोवृणीतऽ३दाइवाऽ२न् ॥ अदधा-
र र १ र र १ २
दिन्द्रेपवमानऽ३ओजाऽ२ः ॥ अजनयत्सूर्येऽ३ज्योऽ२३ । तिरिन्दाउवाऽ३ ॥
२ १ २ १र२र १र २ १ १ १ १
एऽ३ । अजनयत्सूर्येज्योतिरि । दूऽ२३४५ः ॥

(दी.१३। प.८। मा.६)४(डू । १०५३)

(५४३-१) ॥ वासिष्ठम् । वसिष्ठस्त्रिष्टुप्सोमः ॥

२ १ २ २ १ १ २ ५र ३ १ १ १
असाऔऽ३हो । जिवाक्वाऽ२ । रथ्याइयाऽ३४ । था । जाऽ२३४५उ ॥
२ १ २ २ १ १ २ ५र ३ १ १ १ २ १ २ २
धियाऔऽ३हो । मनोताऽ२ । प्रथमामाऽ३४ । नी । षाऽ२३४५ ॥ दशाऔऽ३हो ।
१ १ २ ५ ३ १ १ १ २ १ २ २
स्वसाराऽ२ः । अधिसानोऽ३४ । अ । व्याऽ२३४५इ ॥ मृजाऔऽ३हो ।
१ १ २ ५ १ १ १
तिवाह्नीऽ२म् । सदनाइषूऽ३४ । अच्छऽ२उ । वाऽ३४५ ॥

(दी.२। प.२०। मा.११)५(ञ । १०५४)

(५४४-१) ॥ अपां साम । आपस्त्रिष्टुप्सोमः ॥

५ ४र ५ ४र५र४ ५ ४र ५ ३ २ ३ ३र २ १ २र १
अपामिवेदूर्मयस्तौ । होवाहाइ ॥ तुराणाऽ२३४ः । हाहोइ । प्रमनी । षाः ।
२र २ ३ ५ २ ३र २ १ २
ईरतेऽ३ । सोमम । छाऽ३४ । हाहोइ ॥ नमस्य । ताइः । उपचाऽ३ ।
२ ३ ५ २ ३र २ १ २ १ २ ३ २ ३ ५ २
यन्तिसम् । चाऽ३४ । हाहोइ ॥ आचवि । शा । तियुश । तीरुश । ताऽ३४म् ।
३र २ ५र र २ १ १ १ १
हाहाऽ३४ । औहोवा ॥ वाऽ३हाऽ२३४५ः ॥

(दी.१२ । प.२४। मा.११)६(झ १०५५)

॥ सप्तमः खण्डः ॥७॥ दशतिः ॥५॥

(इति त्रैष्टुभम् ॥)

(५४५-१) ॥ प्रेंखौ द्वौ । नकुलोऽनुष्टुप्सोमः ॥

५ र २ ३ ५ २ १र प० २
पुरोजिती ॥ वोअन्धाऽ२३४साः । सुतायामाऽ२दयाऽ३१उवायेऽ३ ।
३ ५ १ प २ ५
त्नाऽ२३४वे ॥ अपश्वानाऽ२श्नथाऽ३१उवायेऽ३ ॥ ष्टाऽ२३४ना ॥
१ र प २ ३ ५
सखायोदीऽ२र्घजाऽ३१उवाये ॥ ह्वीऽ२३४याम् ॥

(दी.३। प.८। मा.६)७(डू । १०५६)

(साम-तन्त्र-सूत्राणि) (१०५३)४ (१०५६)७ (पृथक् सूत्राणि न सन्ति) (१०५४)५ उञ्जुयुग्वा ३.१.२; (१०५५)६ खि १०.५.४;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५४५-२) ॥ वामदेवोऽनुष्टुप्सोमः ॥

पुरोजिती ॥ वोऽ३ओन्धाऽ३साः । सूतायमाऽ२ । ऊऽ२ । हाऽ२इ । ऊऽ२ ।
दाऽ३याइत्नाऽ३वे । आपश्वानाऽ२म् । ऊऽ२ । हाऽ२इ । ऊऽ२ ।
श्नाऽ३थाइष्टाऽ३ना ॥ साखायोदाऽ२इ । ऊऽ२ । हाऽ२इ । ऊऽ२३ ॥
घाऽ२जाऽ२३४औहोवा ॥ एऽ३ । ह्वियाऽ२३४५म् ॥

(दी.७। पं.१९।मा.११)८(झे ।१०५७)

(५४५-३) ॥ कार्तयशम् । कृतयशाऽनुष्टुप्सोमः ॥

पुरोहाहाउ ॥ जाऽ२३४इती । वोआऔऽ३होऽ३ । धासाः । सुताऔऽ३होऽ३ ।
यामाऽ६ । हाउवा । दयित्नवेऽ२ । उपा ॥ अपश्वानꣳश्नथाऽ१इष्टाऽ३ना ॥
सखाऔऽ३होऽ३ ॥ योदाऽ६ । हाउवा । घंजिह्वियम् ॥ उपाऽ२३४५ ॥

(दी.५। प.१५। मा.११)९(म। १०५८)

(५४५-४) ॥ औध्र्वसद्मनम् । ऊर्ध्वसद्मानुष्टुप्सोमः ॥

पुरोजितीवोअन्धसः । उवाहाइ । सुतायमादयित्नवउवाऽ२३होइ । अपश्वानꣳश्न-
थिष्टनउवाऽ२३होइ ॥ साखायोदाइ ॥ घाजिह्वाऽ२३४५याऽ६५६म् ।
सुवृक्तिभिर्नृमादनम्भरेऽ२षुवाऽ१ ॥ (दी.१०। प.७। मा.९)१०(फो। १०५९)

(५४५-५) ॥ श्यावाश्वम् । श्यावाश्वोऽनुष्टुप्सोमः ॥

पुरोऽ३१ । जीऽ३ती । वोअ । धाऽ३सः । एहिया ॥ सू । तायमादा । यि ।
त्नवाऽ२इ । एहियाऽ२ । अपश्वानाꣳश्नाऽ३थीऽ३ ॥ ष्टाऽ२३४ना ॥ ऐहाऽ२इ ।
एहियाऽ२ । सखायोदाइर्घाऽ३जीऽ३ । ह्वाऽ३४५योऽ६हाइ ॥

(दी.९। प.१६। मा.६)११(तू। १०६०)

(५४५-६) ॥ आन्धीगवम् । अन्धीगुरनुष्टुप्सोमः ॥

पुरोजितीवोऽ४न्धासाः ॥ सुताय । मादाऽ२३या । हुम्माऽ२१२ ।
त्नवेअपश्वानꣳश्नथिष्टन ॥ साखाऽ३उवा ॥ योऽ२दी । घाऽ२३जी । ह्वियाम् ।
औऽ२३होवा । होऽ५इ ॥ डा ॥ (दी.६। प.१२। मा.५)१२(खु । १०६१)

(साम-तन्त्र-सूत्राणि) (१०५७)८(१०५९)१०(१०६१)१२ (पृथक् सूत्राणि न सन्ति) (१०५८)९ (द्वः)
द्वः हाउवायाम् ४.९.४; (१०६०)११ सात्याः ३.६.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५४६-१) क्रौञ्चानि त्रीणि। त्रयाणां क्रुङ्नुष्टुप्पूषाभगोद्यावापृथिवी ॥

अयंपूषौहो । रायिर्भगाः ॥ सोम४पुनाऽ३ । नोआऽ३र्षाऽ५ताऽ६५६इ ॥
पतिर्विश्वौहो । स्याभूमनाः ॥ वियख्यद्रोऽ३ । दासीऽ३ऊऽ५भाऽ६५६इ ॥

(दी.७। प.८। मा.६)१३(जू । १०६२)

(५४६-२)

अयंपूषा । अयंपूषा ॥ रयिर्भगाः । सोम४पूनाऽ२ । नोअर्षताइ । पतिर्वाइश्वाऽ२ ।
ओस्याभूऽ१मानाऽ२ः ॥ ओइवियख्याऽ२३द्रो ॥ दासीउभ । इडाऽ२३भाऽ३४३ ।
ओऽ२३४५इ ॥ डा ॥ (दी.५। प.१२। मा.८)१४(फै । १०६३)

(५४६-३)

अयंपूषा । हो । रयिर्भगाऽ६ए ॥ सोमाऽ२४पुनाऽ२ । नआऽ३४५ ।
षाऽ२३४ती । पतिर्विश्वस्यभूमनः ॥ वियख्याऽ२३द्रो ॥ दसीऊऽ२३भाऽ३४३इ ।
ओऽ२३४५इ ॥डा ॥ (दी.४। प.११। मा.६)१५(तू । १०६४)

(५४७-१) ॥ त्वाष्ट्री सामनी द्वे । द्वयोस्त्वाष्ट्र्योऽनुष्टुप्सोमेन्द्रौ ॥

सुतासोमा ॥ धुमाऽ३त्तमाः । सोमाइन्द्राऽ३यमाऽ३ । एऽ३ । दिनआ ।
पवाइत्रवाऽ३न्तोऽ३ । एऽ३ । क्षरन्ना । दाइवान्गच्छाऽ३न्तुवाऽ३ः ।
एऽ३ ॥ मदाआ ॥ (दी.४। प.११। मा.७)१६(ते । १०६५)

(५४७-२) ॥ ऊर्ध्वेडः त्वाष्ट्रीसाम ॥

सुतासोमधुमत्तमाः ॥ सोमाऽ२इन्द्राऽ२ । यमाऽ३४५। दीऽ२३४नाः ।
पवित्रवन्तोअक्षरन् ॥ देवान्गच्छा ॥ तुवोमाऽ२३दाऽ३४३ः । ओऽ२३४५इ ॥
डा ॥ (दी.६। प.९। मा.७)१७(घे । १०६६)

(५४७-३) ॥ वासिष्ठम् । वसिष्ठोऽनुष्टुप्सोमेन्द्रौ ॥

सुतासोमधुमत्तमाः । सोमाइन्द्रा ॥ यमन्दिनः । पावित्रावाऽ२ । तोअक्षरन् ॥
दाइवान्गाच्छौवा ॥ तूऽ२३४वाः । मदा । औऽ३होवा । होऽ५इ ॥ डा ॥

(दी.६। प.११। मा.८)१८(कै । १०६७)

(साम-तन्त्र-सूत्राणि) (१०६२)१३ व्यग्भिनि ९.४.४; (१०६३)१४ (१०६५)१६ (१०६६)१७(१०६७)१८
(पृथक् सूत्राणि न सन्ति) (१०६४)१५ श्विनि २.१.३;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५४७-४) ॥ आनिधनं त्वाष्ट्री साम् । त्वाष्ट्र्योऽनुष्टुप्सोमेन्द्रौ ॥

५ ४२५२ ४ ५ २ ४२ ५ २ २ १ अ ३ २ १
सुतासोमधुमत्तमाः । सोमाहाउ ॥ इन्द्राऽ३यामन्दिनाऽ२ः । इन्द्राऽ३हो ।
अ ३ ५ २ १ अ ३ २ १
यमाऽ२न्दा२३४इनाः । पवित्रवऽ३न्तोअक्षाराऽ२न् । त्रवाऽ३हो ।
अ ३ ५ २२ २ १ २ ३२ २ १
तोऽ२क्षाऽ२३४रान् । देवान्गाच्छऽ३न्तूवोऽ१मादाऽ२ः ॥ देवाऽ३न्होइ ।
३ ५ १ ३ ५२ २ २ १ १११
गच्छोऽ२३४हा ॥ तूऽ२वाऽ२३४औहोवा ॥ मदाऽ३आऽ२३४५ ॥

(दी.१०। प.१३। मा.१२)१९(बा । १०६८)

(५४७-५) ॥ वासिष्ठम् । वसिष्ठोऽनुष्टुप्सोमेन्द्रौ ॥

५ २ २ ५ २२ २ २ १ अ १
सुतासोमधुमत्तमाऽ६ए ॥ सोमाइन्द्राऽ३यामन्दिनाऽ२ः । दाइनाऽ२ः ।
१ अ १ २ २ १ २
पवित्रवऽ३न्तोअक्षाराऽ२न् । क्षाराऽ२न् । देवान्गाच्छऽ३न्तूवोऽ१मादाऽ२ः ।
१ ३२ २ १ ३ ५ १ ३ ५२ २
मादाऽ२ः ॥ देवाऽ३न्होइ । गच्छोऽ२३४हा ॥ तूऽ२वाऽ२३४औहोवा ॥
२ १ १११
मदाऽ३ईऽ२३४५ ॥ (दी.१०। प.११। मा.१३)२०(पि । १०६९)

(५४७-६) ॥ त्वाष्ट्री सामनी द्वे ।(स्वारं त्वाष्ट्री साम) द्वयोस्त्वाष्टयोऽनुष्टुप्सोमेन्द्रौ ॥

१ २ २ २ २ ३ २ १ १२ २ २ २ ३ २ १
सुतासोमाऽ३हा । धुमत्तामाऽ२ः ॥ सोमाइन्द्राऽ३हा । यमन्दाइनाऽ२ः ॥
१ २ २ ३२ २ १ १२ २ २ २ ३ २ १ ५
पवित्रवाऽ३हा । तोअक्षाराऽ२न् ॥ देवान्गाच्छाऽ३हा । तुवोऽ३होऽ२३४ । वा ।
४ ५
माऽ५दोऽ६हाइ ॥ (दी.७। प.१०। मा.७)२१(जे । १०७०)

(५४७-७) ॥ द्विरभ्यस्तं त्वाष्ट्री साम ॥

५ २ ३२ २ २ २ ३ २ १ २ ५२ ३ २
सुता । सोमाऽ३ । हाऽ३हा । धुमत्तामाऽ२३४ः ॥ सोमाः । इन्द्राऽ३ ।
२ २ ३ २ १ ५ ३ २ २ २ ३२ २ १
हाऽ३हा । यमन्दाइनाऽ२३४ः ॥ पवि । त्रवाऽ३ । हाऽ३हा । तोअक्षाराऽ२३४न् ॥
२५२ ३ २ २ २ ३ २ १ ५ ४ ५
देवान् । गच्छाऽ३ । हाऽ३हा । तुवोऽ३होऽ२३४ ॥ वा । माऽ५दोऽ६हाइ ॥

(दी.७। प.१८। मा.८)२२(जै । १०७१)

(५४७-८) ॥ वासिष्ठम् । वसिष्ठोऽनुष्टुप्सोमेन्द्रौ ॥

५ २ २ ४ ५ ४ ५ २२१२ २ १ २ १ २ ३ ५ २ २
सुतासोऽ३माधुमत्तमाः ॥ सोमाइन्द्रा । यमन्दिनः । पावाओऽ२३४वा । त्रवन्तो-
३२ २ २ १ २ १२ २ १
अक्षरन् ॥ देवान्गाच्छा ॥ तुवोमाऽ२३दाऽ३४३ः । ओऽ२३४५इ ॥ डा ॥

(दी.७। प.९। मा.८)२३(झै । १०७२)

(साम-तन्त्र-सूत्राणि) (१०६८)१९ (१०६९)२० (१०७०)२१ (१०७१)२२ (१०७२)२३ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५४८-१) ॥ क्रौञ्चे द्वे । द्वयोः क्रुङनुष्टुप्सोमः ॥

४ ५ २ १ अ २ २ १ र अ २
हाउसोमाः ॥ पवाऽ३न्ताइन्दावाउ । वाऽ३ । हाउवा । अस्मभ्यंगातूवित्तामाउ ।
२ १र र र २ २ २ ५र
वाऽ३ । हाउवा । मित्राःस्वानाआरेऽ१पासाउ । वाऽ३ । हाउवाऽ३४ ॥ सुवा ।
३ २ १ ४ २ ५
धियाऽ३ः ॥ सूऽ२३वाऽ३ः । वाऽ३४५इदोऽ६हाइ ॥

(दी.५। प.१४। मा.१४)२४(भी । १०७३)

(५४८-२)
५र र ३ २ ३ ४ ५ २ १ २ १ २ ३ २ १ २ ३ ५
सोमाः४पवन्तइन्दवाः ॥ अस्माभ्यंगा । तुवित्तमाः । माइत्राओऽ२३४वा ।
२र १र २र१ २ ३ र २ १ २ १ २ १
स्वानाअरेपसः ॥ सुवाधियाः ॥ सुवर्वाऽ२३इदाऽ३४३ः । ओऽ२३४५इ ॥ डा ॥

(दी.६। प.९। मा.११)२५(घ । १०७४)

(५४९-१) ॥ सोम सामानि त्रीणि । त्रयाणां सोमोऽनुष्टुप्सोमः ॥
५ र र १ ३ ५र र ५ २ १ २ १ २
अभीनोवा ॥ जाऽ२साऽ२३४औहोवा । ताऽ२३४माम् । रयिमर्षशतस्पृहम् ॥
१ र १ अ १ १ २
इन्दोसहस्त्रभाऽ२३हो । णसाऽ२म् ॥ तुविद्युम्नंविभाऽ२३होयेऽ३ ॥
२ ३
सहमोऽ२३४५इ ॥ डा ॥ (दी.५। प.९। मा.५)२६(भु । १०७५)

(५४९-२)
५ र र १ र २ १ १ २ २ १ २
अभीनोवा ॥ जासातमम् । रयिम । षाउवाऽ२३ । होवाऽ३हाइ । शतस्पृहम् ।
१ विर १ १ २ २ १ २
इन्दोऽ२स । हाउवाऽ२३ । होवाऽ३हा । स्त्रभर्णसम् ॥ तुवायेऽ३ ॥
१ ३ ५र र २ र १ ३ १ १ १
द्यूऽ२म्नाऽ२३४औहोवा ॥ विभासहाऽ२३४५म् ॥

(दी.७। प.१३। मा.८)२७(जै । १०७६)

(५४९-३)
२ १ २र र ४ २ ३ ५ २ १
अभीऽ२होइ । नोवाजाऽ३साऽ३ । हाताऽ२३४माम् ॥ रयीऽ२ऽहोइ ।
२ ४ २ ३ ५ २ १ २ ४
अर्षशाऽ३ताऽ३ । हास्पृऽ२३४हाम् । इन्दोऽ२होइ । सहस्त्राऽ३भाऽ३ ।
२ ३ ५ २ १ २ ४ २ ४
हार्णाऽ२३४साम् । तुवाऽ२होइ । द्युम्नंवीऽ३भाऽ३ । हाऽ३साऽ५हाऽ६५६म् ॥

(दी.२। प.१२। मा.८)२८(छै । १०७७)

(साम-तन्त्र-सूत्राणि) (१०७३)२४ (१०७५)२६(१०७७)२८ (पृथक् सूत्राणि न सन्ति) (१०७४)२५ कण्ठ्येक्षेऽसणि शतावति ९.८.२; (१०७६)२७ तखिट् २.४.१०;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५४९-४) ॥ क्रौञ्चम् । क्रुङनुष्टुप्सोमः ॥

अभीनोवाऽ३१२३४ । जसा । तमाऽ३म् ॥ रयिमर्षाऽ३१२३४ । शत । स्पृहाऽ३म् ॥ इन्दोसाहाऽ३१२३४ । स्त्रभ । णसाऽ३म् ॥ तुवाइद्यूम्नाऽ३१२३म् । विभाऽ५सहाउ ॥ वा ॥ (दी.१। प.१२। मा.६)२९(खू । १०७८)

(५४९-५) ॥ सोमसाम । सोमोऽनुष्टुप्सोमः ॥

अभीनोवौहोऽ५जसातमाम् ॥ रयिमर्षौहोऽ५शतस्पृहाम् ॥ इन्दोसहौहोऽ५-स्त्रभर्णसाम् ॥ तुविद्युम्नौहोऽ५विभासहाम् । सहम् । तुविद्युम्नंविभाऽ६ । हाउवा ॥ सहऽ३मेऽ२३४५ ॥ (दी.९। प.८। मा.६)३०(दू । १०७९)

(५५०-१) ॥ आङ्गिरसानि त्रीणि । त्रयाणामंगिरसोऽनुष्टुबिन्द्रः ॥

आऽ२३४भी ॥ ओइनवन्तआद्रूऽ१हाऽ२ः । ओइप्रियमिन्द्रस्यकामाऽ१याऽ२म् ॥ ओइवत्सन्नपूर्वआयूऽ१नीऽ२ ॥ ओइ । जातꣳरिहन्तिमोऽ१२३४ । वा । ताऽ५रोऽ६हाइ ॥ (दी.२। प.८। मा.९)३१(जो । १०८०)

(५५०-२)

अभी । नवाऽ३२ । तआऽ५द्रुहाः ॥ प्रियामिन्द्राऽ३ । स्याकामाऽ२३४याम् । वत्सन्नपूऽ३ । र्वाआयूऽ२३४नी ॥ जाताऽ३ꣳहोइ । रिहाऽ३हो ॥ तिमाताऽ२३-राऽ३४३ः । ओऽ२३४५इ ॥ डा ॥ (दी.३।प.१२। मा.७)३२(ठे । १०८१)

(५५०-३)

अभीनवन्तेअद्रुहः । ओहाइ ॥ प्रियमिन्द्रस्यकामियम् । ओहाइ ॥ वत्सन्नपूर्वआयुनि । औहोवाहाइ ॥ जातꣳरिहौवा । तीऽ२३४मा । तरा । औऽ३होवा । होऽ५इ ॥ डा ॥ (दी. ६। प.१२ । मा.८)३३(खै । १०८२)

(५५१-१) ॥ गृत्समदस्य सूक्तानि चत्वारि । चतुर्णां गृत्समदो बृहती सोमः ॥

आहाऽ३ । ओऽ२३४वा ॥ र्यतायधृष्णवेऽ२ । धनूऽ३ः । ओऽ२३४वा ॥ तन्वन्तिपौꣳसियम् । शुक्राऽ३ः । ओऽ२३४वा ॥ वियन्त्यसूरायनिर्णिजेऽ२ । विपाऽ३ । ओऽ२३४वा ॥ अग्रेऽ२महीयुवाऽ२३४५ः ॥

(दी.८। प.१२। मा.४)३४(ठी । १०८३)

(साम-तन्त्र-सूत्राणि)(१०७९)३० मो दोसु ११.६.४; (१०७८)२९ (१०८०)३१(१०८२)३३ (पृथक् सूत्राणि न सन्ति) (१०८१)३२ नवाद्यशसात् १.१०.५; (१०८३)३४ यव्यन् ९.१.६; मस्सꣳस्था ११.५.६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५५१-२)

हाऽ३हाइ । आहर्यता । याऽ२३४धृ । हाऽ३हाऽ३४ । औहोवा । ष्णाऽ२३४वे ॥ हाऽ३हाइ । धनूष्टान्वा । तीऽ२३४पौ । हाऽ३हाऽ३४ । औहोवा । सीऽ२३४याम् ॥ हाऽ३हाइ । शुक्राविय । ताअसुरा । याऽ२३४नी । हाऽ३हाऽ३४ । औहोवा । णीऽ२३४जे ॥ हाऽ३हाइ । विपामाग्राइ । माऽ२३४ही । हाऽ३हाऽ३४ । औहोवा । यूऽ२३४वाः ॥ (दी.९ । प.२५ । मा.८)३५(नै । १०८४)

(५५१-३)

आहर्यतायधृष्णवआ ॥ धनूष्टाऽ१न्वाऽ२ । तिपौंऽसाऽ१याऽ२म् । शुक्राविय । ताअसुराऽ३ । यानीऽ२र्णा२३४इजाइ ॥ विपामाऽ१ग्राऽ२इ ॥ ओइ । माऽ२३हीऽ३ । यूऽ३४५वोऽ६हाइ ॥ (दी.३ । प.१० । मा.८)३६(णै । १०८५)

(५५१-४)

आऽ४हर्य । ताऽ४यधृ । ष्णाऽ३वे । धनुष्टन्वा ॥ तिपौंऽसियाम् । शुक्राविय । ताअसुरा । यनाउवाऽ३ । णीऽ२३४जे ॥ वाइपाऽ३ऽहाइ । आग्रेऽ३हाइ ॥ महीयूऽ२३वाऽ३४३ः । ओऽ२३४५इ ॥ डा ॥ (दी.२ । प.१४ । मा.८)३७(झै । १०८६)

(५५२-१)　　॥ द्विरभ्यस्तमाकूपारम् । अकूपारोऽनुष्टुब्देवाः ॥

परित्यंऽहर्यतंऽहरिम् । पाऽ२३४ । रित्यंऽहौहोऽ५र्यतंऽहराइम् ॥ बभ्रुम्पुनन्तिवारेण । बाऽ२३४ । भ्रुम्पुनौहोऽ५न्तिवारेणा ॥ योदेवान्विश्वाँऽइत्परि । योऽ२३४ । देवान्वौहोऽ५श्वाँऽइत्पराइ ॥ मदेनसहगच्छति । माऽ२३४ । देनसौहोऽ५हग । छाऽ५तोऽ६हाइ ॥ (दी.१७। प.१३। मा.७)३८(जे । १०८७)

(५५३-१)　　॥ वैरूपम् । विरूपोऽनुष्टुप्सोमः ॥

प्रसुन्वाऽ२३नायअन्धसाः ॥ मर्त्तः । नवाऽ२ । ष्टतद्वाऽ२३४चाः । अपश्वानमराधाऽ२३४साम् ॥ हतामाऽ२३खम् ॥ नभूऽ३गाऽ५वाऽ६५६ः ॥

(दी.३ । प.८। मा.७)३९(डे । १०८८)

॥ इति ग्रामे गेय-गाने षोडशस्यार्द्धः प्रपाठकः ॥

॥ त्रयस्त्रिंशदष्टमः खण्डः ॥८॥ दशतिः ॥६॥ इत्यानुष्टुभम् ॥

(साम-तन्त्र-सूत्राणि) (१०८४)३५ (१०८५)३६ (पृथक् सूत्राणि न सन्ति) (१०८६)३७ (१०८७)३८ (पृथक् सूत्राणि न सन्ति) (१०८८)३९ भि कयास्थिरायाम् ७.७.६ हत् ११.१.४;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५५४-१) ॥ कावम् । (कुत्सो) कविः जगती सोमसूर्यौ ॥

आभिप्रीऽ२३४या । णीपावाऽ२३४ताइ । चानोहिताऽ२३ः ॥ नामानीऽ२३४या । ह्वोअधीऽ२३४ये । षूवर्द्धतायेऽ३ ॥ आसूरीऽ२३४या । स्याबृहाऽ२३४ताः । बृहन्नधायेऽ३ ॥ राथंवाऽ२३४इष्वा । चामारूऽ२३४हात् । विचाऽ३१उवाऽ२३ ॥ क्षाऽ२३४णाः ॥ (दी. ४। प.१३। मा.८)१(दै । १०८९)

(५५४-२) ॥ ऐडंकावम् । कविर्जगती सोमसूर्यौ ॥

एऽ५ । अभिप्रियाऽ२ । णिपवताइ । एऽ५ । चनोहिताः ॥ एऽ५ । नामानियाऽ२ । ह्वोअधियाइ । एऽ५ । षुवर्द्धताइ ॥ एऽ५ । आसूरियाऽ२ । स्यबृहताः । एऽ५ । बृहन्नधी ॥ एऽ५ । रथंविष्वाऽ२ । चमरुहात् । एऽ५ । विचक्षणाः । होऽ५इ ॥ डा ॥ (दी.६। प.२२। मा.९)२(खो । १०९०)

(५५४-३) ॥ वाजसनि । वाजसनिर्जगती सोमसूर्यौ ॥

अभ्यौहोवाहाइप्रियाणी ॥ पवताइचाऽ२३४नो । हिताः । नामानियह्वो-अधियेषुवर्द्धताइ ॥ आसूर्यस्यबृहतोबृहन्नधाइ ॥ रथम् । वाइष्वञ्चमरुहत् । विचाऽ३१उवाऽ२३ ॥ क्षाऽ३णाऽ२३४५ः ॥ (दी.९ । प.९ । मा.११)३(ध । १०९१)

(५५४-४) ॥ वाजजिती द्वे । द्वयोर्वाजजित् (प्रजापतिः) जगती सोमसूर्यौ ॥

अभिप्रिया । णीपवताइ । होइहोवाऽ३होयेऽ३४ । चनोहिताः । हाहो । वाहाइ ॥ नामानिया । ह्वोअधियाइ । होइहोवाऽ३होयेऽ३४ । षुवर्द्धताइ । हाहो । वाहाइ ॥ आसूरिया । स्याबृहताः । होइहोवाऽ३होयेऽ३४ । बृहन्नधी । हाहो । वाहाइ ॥ रथंविष्वा । चामरुहात् । होइहोवाऽ३होयेऽ३४ । विचक्षणाः । हाहो । वाऽ६हाउ वा ॥ वाजीजिगीऽ३वाँऽ१ ॥ (दी.१५ । प.२६। मा.१६)४(पू । १०९२)।

(५५४-५) अभिप्रिया । णीपवताइ । चानोहिताः । होवाऽ३होइ ॥ नामानिया । ह्वोअधियाइ । षूवर्द्धताइ । होवाऽ३होइ ॥ आसूरिया । स्याबृहताः । बृहन्नधाइ । होवाऽ३हो ॥ रथंविष्वा । चामरुहात् । वीचक्षणाः । होवाऽ३होऽ२ । वाऽ२३४औहोवा ॥ वाजीजिगीवाविश्वाधनाऽ२नीऽ२३४५ । (दी.२१। प.१८। मा.१२)५(गा । १०९३)

(साम-तन्त्र-सूत्राणि) (१०८९)१ (१०९२)४ (१०९३)५ (पृथक् सूत्राणि न सन्ति) (१०९०)२ मन्द्रात् द्वितीयं द्रसदनायाम् ३.८.३; (१०९१)३ आदिर्घोषे ४.१.३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५५४-६)　　|| स्वारंकावम् । कविः प्रजापतिर्जगतीं सोमसूर्यौ ||

५ ४　२ १र　२र १ —　१र र　र
अभ्योवा || प्रियाणिपवताइ । चनोहाइताऽ२ः । नामानियह्वोअधियाइ ।
२ १ —　१र र　२ १　१ २ ४ ५
षुवर्व्होताऽ२इ || आसूर्यस्यबृहतो । बृहन्नाधीऽ२३ || राथाऽ३म्वाइष्वा ।
२ १　१ २ ४
चमरूहाऽ२३त् । वाइचाऽ३क्षाऽ५णाऽ६५६ः ||(दी.७। प.१०। मा.१०)६(ञौ। १०९४)

(५५५-१)　　|| उद्वद्भार्गवम् भृगुर्जगती सोमो देवाश्च ||

२ र १　२र १　२र१　२ र १　२ १
अचोदासोऽ२३ । नोधनूवाऽ२३ । तूइन्दवाः || प्रस्वानासोऽ२३ । बृहद्दाइ-
२र१　२ १　२र १　२र१र
वेऽ२३ । षूहरयाः || विचिदाश्नाऽ२३ । नाइषायाऽ२३ः । आरातयाः ||
२ र १　२र १　२र१र २　१ १ १
अर्योनाःसाऽ२३ । तूसनाइषाऽ२३ । तूनोधियाऽ३१उवाऽ२३४५ ||

(दी.१२ । प.१२। मा.९)७(छो । १०९५)

(५५५-२)　　|| आंगिरसे द्वे द्वयोरंगिरसो जगती सोमो देवाश्च ||

१ २र ३ २　३र ४　५ ४ ५　१ २र ३र २　३४रर५ ४ ५
आचोदसो । नोधनुवन्तु । इन्दवाः || प्रास्वानासो । बृहद्देवेषु । हरयाः ||
१ २ ३ २　३र४ र ५　४र ५　१२र ३ २　३ ४ ५ ४
वाइचिदश्ना || नाइषयोअ । रातयाः || आर्योनःसा । तुसनिष । तुनोऽ५धियाउ ||
वा ||　　(दी.१०। प.१३ । मा.७)८(बे । १०९६)

(५५५-३)

२र र २　र र र १ २ ४ २ ३ १ १ १
हाउहोवाऽ३हाइ । अचोदसोनोऽ३धा । नुवाऽ३न्तूऽ३ । इन्दवाऽ२३४५ः ||
२र र २　र र र १　२र ४　२ ३ १ १ १
हाउहोवाऽ३हाइ । प्रस्वानासोबृऽ३हात् । देवेऽ३षूऽ३ । हरयाऽ२३४५ः ||
२र र २　र र १ २ ४　२र ३ १ १ १
हाउहोवाऽ३हाइ । विचिदश्नानाऽ३आइ । षयोऽ३आऽ३ । रातयाऽ२३४५ः ||
२र र २　र　१ २ ४ २र　१ १ १
हाउहोवाऽ३हाइ । अर्योनःसन्तुऽ३सा । निषाऽ३न्तूऽ३ । नोधियाऽ३२उवाऽ३४५ ||

(दी.२०। प.१६ । मा.१६)९(पू । १०९७)

(५५५-४)　　|| सामराजे द्वे । द्वयोः सामराजो जगती सोमो देवाश्च ||

५ ४　१ र र　२ १ —　१ र र र　र　२ १
अचोहाइ || दासोनोधनुवा । तुइन्दावाऽ२ः । प्रस्वानासोबृहद्देवाइ । षुहरायाऽ२ः ।
३ ५　३ ५　२र　३ ५　१ २
विचोऽ२३४हाइ । अश्नोऽ२३४हाइ । नाइषयः । अरोऽ२३४हाइ । तायाः ||
३ ५　३ ५　२ ३ ५　१न २
अर्योऽ२३४हाइ । नःसोऽ२३४हा || तूसानीऽ२३४षा । तूनाऽ३उवाऽ३ ||
५
धीऽ२३४याः ||　　(दी.७। प.१५। मा.१४)१०(ञी । १०९८)

(साम-तन्त्र-सूत्राणि) (१०९४)६ (१०९६)८(१०९८)१० (पृथक् सूत्राणि न सन्ति) (१०९५)७ द्ररा तुसा ८.१.७; (१०९७) ९नु १.४.८;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५५५-५) ॥ स्वार सामराजम् ॥

अचौहोवा ॥ दासोनोधनुवा । तुइन्दावाऽ२ः । प्रस्वानासोबृहद्देवाइ । षुहरायाऽ२३ः ।
वाइचीऽ३दाश्ना । नाइषाऽ२३४याः । होइ । अराताऽ२३४याः ॥ होऽ३इ ।
आर्योऽ३नाःसा ॥ तूसानीऽ२३४षा । हो । तुनोऽ३धाऽ५याऽ६५६ः ॥

(दी.७। प.१४। मा.११)११(झ । १०९९)

(५५५-६) ॥ सिमानान्निषेधः ॥

अचो । वाहाइ ॥ दासोनोधनुवा । तुइन्दावाऽ२ः । प्रास्वानासोबृहद्देवाइ ।
षुहरायाऽ२३ः । वाऽ२३इचीत् । आऽ२३श्नाऽ३४ । नाइषयोअरा । ताऽ३याः ॥
आऽ२३र्यो ॥ नाऽ२३ःसाऽ३४ । तुसनिष । तुनोऽ३धाऽ५याऽ६५६ः ॥

(दी.९। प.१४। मा.११)१२(घ । ११००)

(५५६-१) ॥ वैधृतं वासिष्ठम् । वसिष्ठो जगतीन्द्रः ॥

एषप्रकोशेऽ२ । म । धुमाःऽ२ । अचाइक्राऽ२३४दात् ॥ इन्द्रास्यवाज्राऽ२ः ।
व । पुषोऽ२ । वपुष्टाऽ२३४माः ॥ अभात्रृतास्याऽ२ । सु । दुघाऽ२ः । घृताश्चू-
ऽ२३४ताः ॥ वाश्राअर्षान्तीऽ२ । प । यसाऽ२३ । चधाऽ३इनाऽ५वाऽ६५६ः ॥

(दी.३। प.१६। मा.१०)१३(टौ । ११०१)

(५५७-१) ॥ लौशे द्वे । द्वयोर्लुशो जगतीन्द्रसोमौ ॥

प्रोयाऽ२३४सीत् । इन्दुरिन्द्राऽ२३ । स्याऽ३निष्कृतम् ॥ सखासख्युः ।
नप्रमिनाऽ२३ । तीऽ३संगिरम् ॥ मर्यइव । युवतिभाऽ२३इः । साऽ३मर्षति ॥
सोमः कला । शेशतयाऽ२३ । मनाऽ३पाऽ५थाऽ६५६ ।

(दी.३। पा.१२। मा.७)१४(ठे । ११०२)

(५५७-२)

प्रोयासीदिन्दुरिन्द्रस्यनिः । कृताम् । कृताऽ२३४५म् ॥ सखाऽ३१२३४ ।
सख्युर्नप्रमिनातिसम् । गिराङ्गिराम् ॥ मर्याऽ३१२३४ः । इवयुवतिभिस्सम ।
षताइषताइ ॥ सोमाऽ३१२३४ः । कलशेशतया । मनाऽ३पाऽ५थाऽ६५६ ॥

(दी.७। प.१२। मा.९)१५(छो । ११०३)

(साम-तन्त्र-सूत्राणि) (१०९९)११(११०१)१३ (११०३)१५(पृथक् सूत्राणि न सन्ति) (११००)१२ तिस्रः प्र ५.७.४; (११०२)१४ बेर्लशु ७.७.७;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५५७-३) ॥ प्रवद्धार्गवम् । भृगुर्जगतीन्द्रसोमौ ॥

२र १र २ १ — १ २ र १ २ १ —
प्रोअयासाइत् । इन्दुरिन्द्रा । स्याऽ२निष्कृताम् ॥ सखासख्युः । नप्रमिना । ताऽ२इ-
१ २ १ २ १ — १ २र १ २र १
सङ्गिराम् ॥ मर्यइवा । युवतिभाइः । साऽ२मर्षताइ ॥ सोम४कला । शेशतया ।
— १र २ १ १ १
माऽ२नापथाऽ३१उ ॥ वाऽ२३४५ ॥ (दी.६ ।प.१३ । मा.१२)१६(गा । ११०४)

(५५७-४) ॥ तंत्रम् । विरूपो जगतीन्द्रसोमौ ॥

२र १र २ १ २र १ २र ३ ५ ३ २ ३ ५र
प्रोअयासाइत् । इन्दुरिन्द्रा । स्यानिष्कृताऽ२३म् ॥ सखासख्युः । नप्रामिना ।
३ २ ३ ५ २ १ २ १ २र १ २ र २ ३ ५
तिसंगाऽ२३४इराम् ॥ मर्यइवा । युवतिभाइः । सामर्षतायेऽ३ ॥ सोम४कला ।
३र २ ३५र ३ २ ४
शेशातया । मनाऽ३पाऽ५थाऽ६५६ ॥ (दी.९। प.१२। मा.१०)१७(थौ । ११०५)

(५५७-५) ॥ यामम् । यमो जगतीन्द्रसोमौ ॥

— १ र र अ ४ २ ३ ५ १ र
आऽ२इ । इया । प्रोअयासाइदिन्दुरिन्द्राऽ२३ । स्याऽ३निष्कृतम् ॥ सखाय-
अ ४ २ ३ ५ १ अ ४ २ ३ ५
सख्यूर्नप्रमिनाऽ२३ । तीऽ३संगिरम् ॥ मर्यइवायुवतिभाऽ२३इः । साऽ३मर्षति ॥
— १ र २ २ ४
आऽ२इ । इया । सोम४कलाशेऽ१शतयाऽ२३ । मनाऽ३पाऽ५थाऽ६५६ ॥

(दी.४। प.१२। मा.९)१८(थो । ११०६)

(५५८-१) ॥ दास (वात्स) शिरसी द्वे । द्वयोर्दसशिरा जगतीसोमः ॥

२ १ २ ४र २ र १ २ ४र
धर्तादाइवाऽ३ । ओवाऽ५ए ॥ पवतेकृत्विऽ३योरासाऽ३ । ओवाऽ५ए ।
२ १ २ ४र २र र १ २ ४र
दक्षोदाइवाऽ३ । ओवाऽ५ए ॥ नामनुमादिऽ३योनृभाऽ३ । ओवाऽ५ए ॥
२ १ २ ४र २र र १ २ ४र
हराइःसार्जाऽ३ । ओवाऽ५ए ॥ नोअतियोनऽ३सात्वाभाऽ३ । ओवाऽ५ए ।
२ १ २ ४र २ १ २ ४र
वृथापाजाऽ३ । ओवाऽ५ए ॥ सिकृणुषाइनदाइषूवाऽ३ । ओवाऽ५ए ।
४
होऽ५इ ॥ डा ॥ (दी.१३। प.१८। मा.१५)१९(डु । ११०७)

(५५८-२)

५ र र ४ ५ २ १ २ ३र न २ २ १र
धर्त्ताऔहोहोहाइ ॥ दिवः । पवतेका । औहोऽ३हाऽ३ । हा । त्वियोरसो ।
र २ ३र न २ २ १र २ १र २
दक्षोदेवा । औहोऽ३हाऽ३ । हा । नामनुमा । दियोनृभाइः । हराइःसार्जा ॥
३र न २ २ १र २ १ र २ ३र न २
औहोऽ३हाऽ३ । हा । नोअतियो । नसत्वभाइः ॥ वृथापाजा । औहोऽ३हाऽ३ ।
२ १ २ ३र न २ २ ३ र २ १ २र न २ २
हा ॥ सिकृणूषा । औहोऽ३हाऽ३ । हाइ । नदीषुवा । औहोऽ३हाऽ३ । हाऽ३४ ।
५र र २ १र २
औहोवा ॥ एऽ३ । नदीषुवाऽ१ ॥ (दी.१८ । प.२८ । मा.१०)२०(डौ ।११०८)

(साम-तन्त्र-सूत्राणि) (११०४)१६ (११०६)१८ (११०७)१९ (पृथक् सूत्राणि न सन्ति) (११०५)१७ वृणी ४.६.४; (११०८)२० न ८.२.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५५९-१) ॥ यामानि त्रीणि, (ऐड़यामम्) त्रयाणां यमो जगती सोमेन्द्रौ ॥

२ र १ २र १ २र र १
वृषामातीऽ२३ । नाम्पवाताऽ२३इ । एऽ३ । विचक्षणएऽ३ ॥ सोमोआह्नाऽ२३म् ।
२ १ २ २ र २र र १ २र १
प्रतराइताऽ२३ । एऽ३ । उषसान्दिवएऽ३ ॥ प्राणासाइन्धूऽ२३ । नांकला-
२ २ २ १ २ र १
शाःऽ२३ । एऽ३ । अचिक्रददेऽ३ ॥ इन्द्रस्याहाऽ२३ । दियावाइशाऽ२३न् ।
२ २ र १
एऽ३ । मनीषिभिरेऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी. १०। प.१८। मा.१०)२१(बौ । ११०९)

(५५९-२)
१ २र र १र २ ५ ३ १ १ १ १र २र १२र १ २र
वृषामतीनाम्पव । ताइवाऽ१इचाऽ२३४ । क्ष । णाऽ२३४५ः ॥ सोमोअह्नाम्प्रतरी ।
१ २ ५ ३ १ १ १ २र १र २र र १ २
तोषाऽ१साऽ२३४म् । दि । वाऽ२३४५ः ॥ प्राणासिन्धूनांकल । शाःआऽ१-
५ ३ १ १ १ १ २ १र र २
चाऽ२३४इ । क्र । दाऽ२३४५त् ॥ आइन्द्रस्यहार्दियावि । शान्माऽ१-
५ १ १ १
नाऽ२३४इ । षिभाऽ२उ । वाऽ३४५ ॥ (दी.१३। प.१६। मा.१२)२२(टा । १११०)

(५५९-३)
१ — १ — १र र २ १ २ १र — १ — १ र र
वृषाऽ२मताऽ२इ । नाम्पवतेविचक्षाऽ२३णाः ॥ सोमोऽ२अह्नाऽ२म् । प्रतरीतो-
२ १र २ १र — १ — १र र २ १ २
षसान्दाऽ२३इवाः ॥ प्राणाऽ२सिन्धूऽ२ । नांकलशाःअचिक्राऽ२३दात् ॥
१ — १ — १ र २ १र २ १
इन्द्राऽ२स्यहाऽ२ । दियाविशन्मनीषाऽ२३इभाऽ३४३इः ॥ ओऽ२३४५इ ॥ डा ॥

(दी.११। प.१०। मा.१२)२३(ङा । ११११)

(५६०-१) ॥ मरुतान्धेनु । मरुतो जगतो जगती सोमः ॥
१ ५र ४५र४५र र ४ ५ २ १र र
त्राऽ२३४इः । अस्मैसप्तधेनवोदुदौ । होह्लाइराइ ॥ सत्यामाशिरम्परमाइ ।
२ र १ — १ र र २ १ २ ३ ५
वियोमानीऽ२ । चत्वार्यन्याभुवना । निनिर्णाइजाऽ२३इ ॥ चारूणाऽ२३४इचा ॥
२र१ २र १ २ ४
क्रेयदृतैः। आवाऽ३र्द्धाऽ५ताऽ६५६ ॥ (दी.११। प.१०। मा.९)२४(ञो । १११२)

(५६१-१) ॥ इन्द्रस्यापामीवम् । इन्द्रो जगतीन्द्रसोमौ ॥
२ १ २ र ४ २ ३ ५ २ १ २र र ४ २र ३ ५
इन्द्रा । यसोमसुषुताऽ३४पाऽ३रिस्रव ॥ अपा । मीवाभवतुराऽ३क्षाऽ३सासह ॥
२र १ २ ४ २र ३ ५ २ १ २
माताइ । रससस्यमत्सताऽ३द्वाऽ३याविनः ॥ द्रवाइ । णस्वन्तइहस ।
३ २ ४
तुवाऽ३इन्दाऽ५वाऽ६५६ः ॥ (दी.६। प.९। मा.६)२५(घू । १११३)

(साम-तन्त्र-सूत्राणि) (११०९)२१ एभघोषरे ६.८.६; (१११०)२२ (११११)२३ (१११२)२४ (१११३)२५
(पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५६१-२) ॥ वायोरभिक्रन्दम् ॥ वायुर्जगतीन्द्रसोमौ ॥

इन्द्रायसोमसुषुतःपर्यो । होइस्त्रावा ॥ अपामीवाभवतुरक्षसाऽ१साऽ३हा ।
मातेरसस्यमत्सतद्वयाऽ१वीऽ३नो । द्राऽ२३४वी । णाऽ२३४स्वा ॥ ताइहसाऽ३ ।
हाऽ२३ । तुवाऽ३इन्दाऽ५वाऽ६५६ः ॥ (दी.८। प.९। मा.४)२६(ढी । १११४)

(५६२-१) ॥ यामानि त्रीणि । त्रयाणां यमो जगती सोमश्येनौ ॥

असाविसो । मोअरुषोऽ२३४ । वृषाहराइः ॥ राजेवदा । स्मोअभिगाऽ२३४ः ।
अचिक्रदात् ॥ पुनानोवा । रामतियाऽ२३४इ । षिअव्ययाम् ॥ श्येनोनयो ।
निंघृतवाऽ२३ । तमाऽ५सदात् । होऽ५इ ॥ डा ॥

(दी.११। प.१४। मा.११)२७(घ । १११५)

(५६२-२)

आसावीऽ२३४सो । मोअरूऽ२३४षाः । वार्षाहरायेऽ३ः ॥ राजेवाऽ२३४दा ।
स्मोअभीऽ२३४गाः । आचिक्रदाऽ२३त् ॥ पूनानोऽ२३४वा । रामातीऽ३४ये ।
षीअव्ययाऽ२३म् ॥ श्येनोनाऽ२३४यो । निंघार्त्ताऽ२३४वा । तमाऽ३ । साऽ२-
दाऽ२३४औहोवा ॥ देऽ३ । दिवीऽ२३४५ ॥ (दी.६। प.१५। मा.९)२८(ङो । १११६)

(५६२-३)

असाविसोमोअरुषोवृषाह । राइः ॥ राजेवदस्मोअभिगाअचिक्र । दात् ॥
पुनानोवारमत्यष्येव्य । याम् ॥ श्येनोनयोनिंघृत । वा । तमाऽ३ ।
साऽ२दाऽ२३४औहोवा । एऽ३ । दिवीऽ२३४५ ॥

(दी.१८। प.१२। मा.८)२९(ठै । १११७)

(५६३-१) ॥ मरुतांधेनु । मरुतो जगतीसोमः ॥

प्रादे ॥ वमच्छामधुम । तआऽ२इन्दवाः । आसिष्याऽ२३४दा । तगावआ ।
नधाऽ२इनवाः । बर्हिषाऽ२३४दाः । वचनावाऽ२ । तऊऽ२धभाइः ॥
पारिस्रूऽ२३४ताम् ॥ उस्रियानिर्णिजन्धाइरायेऽ३ ॥ धाइराऽ३४औहोवा ॥
धाऽ३इराऽ२३४५इ ॥ (दी.८। प.१३। मा.१६)३०(डू । १११८)

(साम-तन्त्र-सूत्राणि) (१११४)२६ (१११५)२७ (१११६)२८ (१११७)२९ (पृथक् सूत्राणि न सन्ति)
(१११८)३० रयिन् षूष्णायाः ५.७.९; बोधु ६.९.३; इत् १०.५.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५६४-१) ॥ काक्षीवतानि (शार्ङ्गाणि) त्रीणि । अञ्जतः कक्षीवाञ्जगती सोमः ॥

अञ्जताइ । वियञ्जताइ । समञ्जाताऽ२इ ॥ क्रतुꣳरिहा । तीमधुवा । भियञ्जाताऽ२इ ॥ सिन्धोरुच्छ्ववा । सेपतया । तमुक्षाणाऽ२म् ॥ हिरण्यपा । वाꣳपशुमा । प्सूगृभ्णताऽ३१उवाऽ२३४५ ॥ (दी.५। प.१२। मा.६)३१(फू। १११९)

(५६४-२) ॥ व्यञ्जतः कक्षीवान् ॥

अञ्जाऽ३हो । तेऽ३होइ । वियञ्जतेऽ३साऽ३मञ्जताइ ॥ क्रतूꣳऽ३होइ । रिहाऽ३हो । तिमधुवाऽ३भीऽ३अञ्जताइ ॥ सिन्धोऽ३होइ । उच्छ्वाऽ३हो । सेपतयाऽ३न्ताऽ३मुक्षणम् ॥ हिराऽ३हो । ण्यपाऽ३हो । वाꣳपशुम । प्सुगाऽ३भ्णाऽ५ताऽ६५६इ ॥ (दी.२ । प.१३ । मा.८)३२(जै । ११२०)

(५६४-३) ॥ समञ्जतः कक्षीवान् ॥

हावाञ्जा । ताऽ२३४इ । वियञ्जतेसमञ्जते । एहिया । एहियाऽ३४ ॥ हाउक्रातूम् । राऽ२३४इ । हन्तिमधुवाभियञ्जते । एहिया । एहियाऽ३४ ॥ हाउसाइन्धोः । ऊऽ२३४त् । श्वासेपतयन्तमुक्षणम् । एहिया । एहियाऽ३४ ॥ हाउहाइरा । ण्याऽ२३४ । पावाꣳपशुमप्सुगृभ्णते । एहिया । एहियाऽ३४ । हाउ । होऽ५इ ॥ डा ॥ (दी.९ प.२३। मा.१३)३३(दि । ११२१)

(५६५-१) ॥ अर्कपुष्पे द्वे । द्वयोरादित्यो जगती ब्रह्मणस्पतिः ॥

पवित्रन्तेविततंब्रह्मणस्पतेऽ३ । हुवेऽ२३ । हुवेऽ२३ । होवाऽ३हाऽ३ । हाइ ॥ प्रभुर्गात्राणिपरियेषिविश्वताऽ२३ः । हुवेऽ२३ । हुवेऽ२३ । होवाऽ३हाऽ३ । हाइ ॥ अतप्ततनूर्न्नतदाऽ२मोअश्नुतेऽ३ । हुवेऽ२३ । हुवेऽ२३ । होवाऽ३हाऽ३ । हाइ ॥ शृतासइद्वहन्तःसन्तदाऽ२शत । हुवेऽ२३ । हुवेऽ२३ । होवाऽ३हाऽ३ । हाऽ३४ । औहोवा ॥ अर्कोदेवानाऽ२म्परमेवियोऽ२माऽ२३४५न् ॥

(दी.१७। प.२२। मा.७)३४(छे । ११२२)

(साम-तन्त्र-सूत्राणि) (१११९)३१ (११२०)३२ (११२१)३३ (पृथक् सूत्राणि न सन्ति) (११२२)३४
गिगादौ १०.६.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५६५-२)
२ १ २र १ २ १ २ १ २र १ — १ र २र १ २र
पवित्रन्तेविततंब्रह्मणस्पतेऽ३ । हुवाइ । औहोवाऽ२ ॥ प्रभुर्गात्राणिपरियेषिवि-
१ १ २र १ — १ २ र १ विर १र २ १
श्वता२३ः । हुवाइ । औहोवाऽ२ ॥ अतप्ततनूर्नतदाऽ२मोअश्नुतेऽ३ । हुवाइ ।
२र १ — १र२ १ २ १ विर १ २र १ ३ ५र र
औहोवाऽ२ ॥ श्रृतासइद्वहन्तःसन्तदाऽ२शत । हुवाइ । औ । होऽ२ । वाऽ२३४ । औहोवा ॥
२ १ २ र १र २ १र विर ३ १ १ १
अर्कस्यदेवा४परमेवियोऽ२माऽ२३४५न् ॥ (दी.१९।प.१६।मा.८)३५(तै। ११२३)

पञ्चत्रिंशन्नवमः, नवमः खण्डः ॥९॥ दशतिः ॥७॥ इति जागतम् ॥

॥ इति ग्रामे गेय-गाने षोडशः प्रपाठकः ॥१६॥

(५६६-१) ॥ पदे द्वे । द्वयोर्वसिष्ठ उष्णिगिन्द्रः ॥
५ २ १ २ ३र ५ १ २ १अ २ ३र ५
इन्द्रमच्छा ॥ सुताइमा । औहोऽ२३४वा । वृषणंय । तूहरया । औहोऽ२३४वा ॥
२ १ २र १ २ ३ २ १ २ १ २ १
श्रुष्टाइजाता । सइन्दवाः ॥ सुवर्वाऽ२३इदाऽ३४३ः । ओऽ२३४५इ ॥डा ॥

(दी.३। प.११। मा.७)१(टे । ११२४)

(५६६-२)
५ २ १ २ १ २ २ १ २ १अ — १ २ २
इन्द्रमच्छा ॥ सुताइमाऽ३इ । ताईऽ३माइ । वृषणंय । तूहरयाऽ२ः । हाराऽ३याः ।
र र र १अ — १ २ २ १ २ ५र र
श्रुष्टेजाताऽ३साइन्दवाऽ२ः ॥ आइन्दाऽ३वाऽ३ः ॥ सुवराऽ३४ । औहोवा ॥
२ र १ १ १ १
विदोविऽ३दाऽ२३४५ः ॥ (दी.६। प.११। मा.११)२(क । ११२५)

(५६६-३) ॥ अनुपदे द्वे । द्वयोर्वसिष्ठ उष्णिगिन्द्रः ॥
४ ५ ४ २ १ २ — १ — १ २ १अ —
इन्द्रम् । इन्द्राम् ॥ अच्छऽ३सूताऽ१इमेऽ२ । आइमेऽ२ । वृषणंय । तूहरयाऽ२ः ।
१ — २ र र र १अ — १ १ २ ५र र
रायाऽ२ः । श्रुष्टेजाताऽ३साइन्दवाऽ२ः ॥ दावाऽ२३ः ॥ सुवराऽ३४ । औहोवा ॥
२ १ १ १ १
विदोऽ३विदाऽ२३४५ः ॥ (दी.५। प.१२। मा.१०)३(फौ । ११२६)

(५६६-४)
३ ४ ३ ४ ३र४३र ४५ २ २ ३ २ १ २ १ २
इन्द्रमच्छसुताइमेवृषणंयन्तुहा । होऽ३४३ । रयआ ॥ श्रूष्टाउवा । जाताउवाऽ३४ ॥
३ ४ ५ २ ३ २
सइन्दवःसुवा । हो ॥ विदओऽ३४५इ ॥ डा ॥

(दी.२। प.९। मा.७)४(झे । ११२७)

(साम-तन्त्र-सूत्राणि) (११२३)३५(११२६)३(११२७)४ (पृथक् सूत्राणि न सन्ति) (११२४)१ न ष्टे ६.९.६; (११२५)२ घायाः सस्वरयोर्मे १०.८.१;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५६६-५) ॥ पौष्कलम् । प्रजापतिरुष्णिगिन्द्रः ॥

इन्द्रमाऽ३च्छसु । ताँईऽ२३४माइ ॥ वृषाणंया । तूहाराऽ२३४याः ॥ श्रुष्टाइजाता । सईऽ२न्दाऽ२३४५वाऽ६५६ः ॥ सुवर्विदाऽ२३४५ः ॥

(दी.१। प.७। मा.७)५(खे । ११२८)

(५६७-१) ॥ ऐषिराणि पञ्च । इषिर उष्णि गिन्द्रः ॥

प्रधन्वासौहोइ । औऽ३होऽ२३४वा । मजागृविः ॥ इन्द्रायेन्दौहोइ । औऽ३होऽ-२३४वा । परिस्रव ॥ द्युमन्तꣳशौहोइ । औऽ३होऽ२३४वा । ष्ममामर ।सुवर्विदौहोइ। औऽ३होऽ२३४५वाऽ६५६ ॥ ऊऽ२३४पा ॥ (दी.९। प.१२। मा.५)६(थ्वु । ११२९)

(५६७-२)

प्रधन्वासौहो । वाऽ३हो । मजागृवीऽ२ः ॥ इन्द्रायेन्दौहो । वाऽ३होइ । परिस्त्रावाऽ२ ॥ द्युमन्तꣳशौहो । वाऽ३हो । ष्ममाभाराऽ२ ॥ सुवर्विदौहो । वाऽ३होऽ२ । वाऽ२३४औहोवा । ऊऽ२३४पा ॥

(दी.११। प.१३। मा.३)७(ग्वि । ११३०)

(६६७-३)

औहौहोइ । प्रधन्वासोऽ२ । औहौहो । मजागृवीऽ२ः ॥ औहौहोइ । इन्द्रायाइन्दोऽ२ । औहौहोइ । परिस्त्रावाऽ२ ॥ औहौहोइ । द्युमन्ताꣳशूऽ२ । औहौहो । ष्ममाभाराऽ२ ॥ औहौहोइ । सुवः । वाऽ२इ । दाऽ२३४ ।औहोवा ॥ ऊऽ२३४पा ॥ (दी.१९।प.१८। मा.९)८(ह्वो । ११३१)

(५६७-४)

हुवाऽ२इ । हुवाऽ२इ । हुवाऽ२३होइ । प्रधन्वासोऽ२ । मजागृवीऽ२ः ॥ इन्द्रायाइन्दोऽ२ । परिस्त्रावाऽ२ ॥ द्युमन्ताꣳशूऽ२ । ष्ममाभाराऽ२ ॥ सुवर्वाइदाऽ२म् । हुवाऽ२इ । हुवाऽ२इ । हुवाऽ२३होऽ२ । वाऽ२३४औहोवा ॥ ऊऽ२३४पा ॥ (दी.५। प.१५। मा.१०)९(म्वौ । ११३२)

(साम-तन्त्र-सूत्राणि) (११२८)५ विदः २.४.३; द्व्यक्षरे ४.२.३ (११२९)६ द्रकाद्रि २.१.४; (११३०)७ (११३१)८ (११३२)९ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५६७-५)
२ १ ४र ५र १ ^ ३ ५ १ २ ^ १
प्रधन्वाऽ२३सोमजागृवीः ॥ इन्द्राऽ२याऽ२३४इन्दो । ओइ । पाऽ३राइ-
२ ^ २ १ ^ ३ ५ १ अ ^ ३
स्राऽ३वा । द्युमाऽ२न्ताऽ२३४ॅशू ॥ ओ । ष्ममाऽ२भाऽ२३४५राऽ६५६ ॥
२ १ १ १ १
सुवर्विदाऽ२३४५म् ॥ (दी. २। प.८। मा.५)१०(जु । ११३३)

(५६८-१) ॥ शौक्तानि पञ्च । शुक्तिरुष्णिक्सोमः ॥
२ र १ — १र र २ १र २
सखाऽ३याआऽ२ । निषीदता ॥ पुनानाऽ२३या । प्रगायता ॥ शिशुन्नाऽ२३या ॥
र १ — १ २ ^ १
ज्ञैॱपराइभूऽ२ । षताश्राऽ२३याऽ३४३इ । ओऽ२३४५इ ॥ डा ॥
(दी.५। प.९। मा.४)११(भी. । ११३४)

(५६८-२)
४ ५ ४ ५ २ ^ ३ ५ १ ^ ३ ५ १ ^ ३ ५र र
साखायाआ ॥ निषीदाऽ२३४ता । पुनाऽ२नाऽ२३४या । प्राऽ२गाऽ२३४औहोवा ।
३ ५ २ १ २ १ २र ३ २ १ १ ^ ३ ५र र
याऽ२३४ता ॥ शिशून्नया । ज्ञैॱपरिभूऽ२३ ॥ षाऽ२ताऽ२३४औहोवा ॥
२
श्रियेऽ१ ॥ (दी.५। प.९। मा.३)१२(भि । ११३५)

(५६८-३)
४ ५र ४र ५र ५ २ र १र र र —
सखायआनि । षीदाऽ६ता ॥ पुनानायप्रगायाता ॥ शिशुन्नयज्ञैॱपराऽ२इ ॥
१र २ ^ १ २ १
भूषाऽ२३ताऽ३ । श्राऽ२३याऽ३४३इ । ओऽ२३४५इ ॥ डा ॥
(दी.८। प.८। मा.४)१३(डी । ११३६)

(५६८-४)
५र र ४ ५र ४र ५र ५ २ र १र २ र१र २ ^ ४ ५ ४ ५
ओहाइ । सखायआनि । षीदाऽ६ता ॥ पुनानौहोइ । पुनानौहोयेऽ३ । याप्रायाप्रा ॥
२र१ र २र १ र २ ^ ४ ५ ४ ५ २ १ र २ १ र २
गायतौहोइ ॥ गायतौहोयेऽ३ । शाइशूॅशाइशूम् ॥ नयज्ञौहोइ । नयज्ञौहोयेऽ३ ।
४ ५ ३ २ ५र र २ २र ३ २
पारी । पाराऽ३४औहोवा ॥ एऽ३ । भूषतश्रियेऽ१ ॥
(दी.१८। प.१५। मा.९)१४(णो । ११३७)

(५६८-५)
५ र ३ २^३ ५ २ १ २ ^ ३ ५ २ र १र विर ^
सखा । यआओऽ२३४वा । निषाइ । दाताओऽ२३४वा । पुनानायप्रगाऽ२यत ॥
१ २^३ ५ १ र २ १ २ ३ ५ २
शाइशाओऽ२३४वा ॥ नयज्ञैॱपरिभूऽ३ । षाताओऽ२३४वा ॥ श्रियेऽ१ ॥
(दी.५। पा.९। मा.७)१५(भे । ११३८)

(साम-तन्त्र-सूत्राणि) (११३३)१० (पृथक् सूत्राणि न सन्ति) (११३७)१४ द्वितीयमभ्या ७.२.२; वार्षे पिनः १२.७.१;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५६९-१) ॥ कार्णश्रवसानि त्रीणि । त्रयाणां कर्णश्रवा उष्णिक्सोमः ॥

ताऽ२३४म्वः । साऽ२३४खा ॥ योमदाऽ२३या । पूनानम । भिगायाऽ२३ता ॥
शाइशुन्नह । व्यैःस्वदयाऽ२३ ॥ तगूर्तिभाऽ३४३इः । ओऽ२३४५इ ॥ डा ॥

(दी.५। प.१० । मा.५)१६(मु । ११३९)

(५६९-२)

ओइतंवस्सखा । योम । दायाओऽ२३४वा । पुनानममिगाऽ३ । आ । ओऽ२३४वा ।
यताओऽ२३४वा । शिशुन्नहव्यैःस्वदयाऽ३ । आ । ओऽ२३४वा । तगाओऽ२३४वा ।
तीऽ२३४भीः ॥ (दी.३। प.१२ । मा.५)१७(ठु । ११४०)

(५६९-३)

तंवःसखायोमदाऽ६या ॥ पुनानममिगाऽ२यत । शाइशुन्नहाऽ३ । व्यैःस्व ।
दयाऽ३ ॥ ताऽ२३गूऽ३ ॥ ताऽ३४५इभोऽ६हाइ ॥

(दी.५। प.७। मा.३)१८(फि । ११४१)

(५७०-१) ॥ वाचस्सामनी द्वे । द्वयोर्वागुष्णिक्सोमः ॥

प्राणा ॥ शाऽ२३४इशूः । महाऽ२३४इनाम् । हिन्वाऽ२नाऽ२३४र्त्ता ।
स्याऽ३दाइधीऽ३तीम् ॥ वाइश्वापरि । प्रियाभुवाऽ२३त् ॥ अधद्विताऽ३४३ ।
ओऽ२३४५इ ॥ डा ॥ (दी.२। प.१०। मा.९)१९(जो । ११४२)

(५७०-२)

प्राणाप्राणा ॥ शाइशूऽ२ःशाइशूऽ२ः । महाऽ३१उवायेऽ३ । नाऽ२३४५म् ।
हिन्वन्नार्त्तस्यदाऽ३१उवायेऽ३ । धीऽ२३४तीम् । विश्वापारिप्रियाऽ३१उवाऽ२३ ।
भूऽ२३४वात् ॥ अधौऽ२ । हौऽ२ । हुवायेऽ३ ॥ द्वाऽ२इताऽ२३४औहोवा ॥
ऊऽ३२३४पा ॥ (दी.३। प.१३। मा.११)२०(ड्ल । ११४३)

(५७०-३) ॥ इन्द्रसामनी द्वे । द्वयोरिन्द्रउष्णिक्सोमः ॥

प्राणाशिशूः ॥ महाऽ२इनाम् । औहोऽ३वा । हिन्वन्नृतस्यदीधितिम् ॥
वाइश्वाउवा । पाराउवा ॥ प्रियाऽ२भुवत् । अधाउवाऽ३ ॥ एऽ३ । द्विताऽ१ ॥

(दी.५। प.१०। मा.९)२१(मो । ११४४)

(साम-तन्त्र-सूत्राणि)(११३९)१६ (११४१)१८ (११४२)१९(११४४)२१(पृथक् सूत्राणि न सन्ति)
(११४०)१७ तमृचि जारिण्योः ७.७.१०; (११४३)२० बेः ५.१०.१०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५७०-४)

५र र　२ ^ ४ ५ १ २ १　२र ३२र ३ न २

प्राणा । होऽ३इ । इयाहाइ ॥ शाइशुर्महाइ । नाऽ२३म् । आउहाउ । होऽ३वा ।

१ र २र ३ २र३ न २ १ र २र ३२र ३

हिन्वन्नृतस्यदीधिताइम् । आउहाउ । होऽ३वा ॥ विश्वापा । याउहाउ ।

न २ १ १^ ३ ५र र १२३ २

होऽ३वा ॥ प्रियाऽ२३ । भूऽ२वाऽ२३४औहोवा ॥ अधद्विताऽ१ ॥

(दी.१२ । प.१६। मा.१४)२२(ची । ११४५)

(५७०-५)　　॥ मरुतां प्रेङ्खम् । मरुत उष्णिक्सोमः ॥

५र र ३ २^ ३ ५ ३ २ २ १र १ २ ^ १ २ ^

प्राणा । हहोइ । शाऽ२३४इशूः । हहोऽ३इ । महीनाऽ२३म् । होवाऽ३होयेऽ३४ ॥

५ ३ २^ ३ ५ ३ २ ^ २ १र १ २ ^ १

हिन्वन् । हहोइ । आऽ२३४र्त्ता । हहोऽ३ । स्यदीधिताऽ२३इम् । होवाऽ३हो-

२ ^ ५ र ३ २^ ३ ५ ३ २ ^ २ १र १ २

येऽ३४ ॥ विश्वा । हहोइ । पाऽ२३४री । हहोऽ३इ । प्रियाभुवाऽ२३त् । होवा-

^ १ २ ^ १ ४ २ ५

ऽ३होयेऽ३ ॥ आऽ२३धाऽ३ । द्वाऽ३४५इतोऽ६हाइ ॥

(दी.६। प.२०। मा.१४)२३(ङी । ११४६)

(५७१-१)　　॥ प्राजापत्ये द्वे । द्वयोः प्रजापतिरुष्णिगिन्द्रसोमौ ॥

१ ^ ३ २^३ ५ १ र र ^ ३ २^३ ५

पवस्वदाऽ२इ । ववीताऽ२३४याइ ॥ आइन्दोधाराऽ२ । भिरोजाऽ२३४सा ।

१र २^३ ५ १ २र १ ४ ४

आकालशाम् । माधूमाऽ२३४न्त्सो ॥ मनएमानाऽ२३ः ॥ सदाऽ५ए । होऽ५इ ॥

डा ॥

(दी.४ । प.१०। मा.८)२४(नै । ११४७)

(५७१-२)

५ २ १र र २ ३ ४र ५ ५ १ २ २

पवस्वदा ॥ ववीतयाइ । इन्दोधाऽ२३राऽ३४ । भिरोजसाऽ६ए । आकाऽ३हा ।

१ — १ २ ^ २ १ २ १ ५ ४ ॥ ५

लाशाऽ२म् ॥ माधूऽ३हाइ । मान्त्सोऽ२३ ॥ मनोऽ२३४वा । साऽ५दोऽ६हाइ ॥

(दी.३। प.१०। मा.५)२५(णु । ११४८)

(५७२-१)　　॥ सुज्ञाने द्वे । द्वयोरिन्द्र उष्णिक्सोमः ॥

५र २ र १ २ १ — र १ २ र १ — १

सोमःपुना ॥ नऊर्मिणा । अव्यंवाराऽ२म् । विधावताइ ॥ अग्रेवाचाऽ२ः ॥ पव ।

^ ३ ५र र १ २ र १ १ १ १

माऽ२नाऽ२३४औहोवा ॥ कनिक्रददेउपाऽ२३४५ ।

(दी.७।प.८।मा.६)२६(जू।११४९)

(साम-तन्त्र-सूत्राणि) (११४६)२३ कण्ठ्ये १०.६.१०; (११४५)२२ (११४७)२४ दुषे ५.१०.८; (१४८)२५ (११४९)२६(पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५७२-२)

५र २र १ २ १ ३ ५र र १ र २र
सोम॒पुना ॥ नऊर्मिणोवाऽ३ । ओऽ२ । वाऽ२३४ । औहोवा । अव्यंवारंविधावति ॥
३ २ १ २ १ ३ ५र र २र १ २र
अग्रेऽ३ । होवाऽ३ । होऽ२ । वाऽ२३४ । औहोवा । वाच॒पवमानः ॥
३ २ १ २ १ ३ ५र र ३ ५
कनाऽ३ । होवाऽ३ । होऽ२ । वाऽ२३४ । औहोवा ॥ क्रोऽ२३४दात् ॥

(दी.१२। प.१८। मा.३)२७(जि । ११५०)

(५७२-३) ॥ द्यौते द्वे । द्युतउष्णिक्सोमः ॥

४र ५ र ४ १ र २१र २ १ र र २ १ र
सोम॒पुनानऊ ॥ मिणा । अव्यंवारंविधावाऽ२३ती ॥ अग्रेवाचाः ॥ पवमानाः ।
२ ४ ५ ३ १ १ १
काऽ३निक्र ॥ दाऽ२३४५त् ॥ (दी.७। प.७। मा.४)२८(छी । ११५१)

(५७२-४)

२र र र ३ ५र २ र र ३ ५र २ र र
सोम॒पुनाऊर्मिणाऽ२३४ऐही ॥ अव्यंवारंविधावताऽ२३४ऐही ॥ अग्रेवाच॒-
र ३ ५र ४ ५ २ ५ ५ ४
पवमानाऽ२३४ऐही ॥ कानी । क्रददेऽ३४ । हियाऽ६हा । होऽ५इ ॥ डा ॥

(दी.११। प.८। मा.५)२९(गु । ११५२)

(५७२-५) ॥ आतीषादीये द्वे । द्वयोः प्रजापतिरुष्णिक्सोमः ॥

३र ४ ५ र ३ २ ३ ५ १ २र १ २ १ न
सोम॒पुना । नऊ३२र्मीऽ२३४णा ॥ अव्यंवारम् । विधावति ॥ अग्राऽ३२इ ।
३ ५ १ न ३ ५ ३ २ ४
वाऽ२३४चाः ॥ पवाऽ३२ । माऽ२३४नाः ॥ कनाऽ३इक्राऽ५दाऽ६५६त् ॥

(दी.३। प.९। मा.७)३०(ढे । ११५३)

(५७२-६)

३र ४ ५ र २ ३ ४र ५ ५ १ र २ २ २ ३
सोम॒पुना । हो । नऊर्मिणाऽ६ए ॥ अव्यंवारंविधाऽ१वाऽ३ती । अग्रेवाऽ२३४५ ।
३ २ १ २ १ ३ ५र र २ ३ १ १ १
चाऽ२३४५ः ॥ पवमाऽ२३नाऽ३ः ॥ काऽ२नाऽ२३४औहोवा ॥ क्रददेऽ२३४५ ॥

(दी.६। प.९। मा.५)३१(घु । ११५४)

(५७३-१) ॥ सोमसामानि चत्वारि । चतुर्णां सोम उष्णिक्सोमः ॥

२ १ ४र ५र १ र र अ
प्रपुनाऽ२३नायवेधसाइ ॥ होइ । होइ । सोमायवचाउच्यातऽ२इ ॥
१ अ १र २ १
भृतिन्नभरामतिभाऽ२इः ॥ जुजोषाऽ२३ताऽ३४३इ । ओऽ२३४५इ ॥ डा ॥

(दी.५। प.८। मा.९)३२(बो । ११५५)

(साम-तन्त्र-सूत्राणि) (११५०)२७ (११५१)२८ (११५२)२९ (११५५)३२ (पृथक् सूत्राणि न सन्ति) (११५३)३० इण्याम् ६.३.५; (११५४)३१ ग्रेस्तेनायाः ५.३.६; वि १०.१०.३;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५७३-२)
प्रपुनानौहोऽ५यवेधसाइ ॥ सोमाऔऽ३होऽ३४ । यवचउच्यताइ ॥ भृताऔऽ३-
होऽ३४ । नभरामतिभाइः ॥ जुंजाऽ३१उवाऽ२३ ॥ षाऽ२३४ते ॥
(दी.५ । प.७। मा.८)३३(फै । ११५६)

(५७४-१)
गोऽ४मन्नः । होइ । इन्दोअश्ववाऽ६दे ॥ सूतःसुदक्षधाऽ१नीऽ३वा । शुचिंचवा-
ऽ२३४५ ॥ णमधिगोऽ२३४औहोवा ॥ षूऽ२३४धा । रया । औऽ३होवा ।
होऽ५इ ॥ डा ॥ (दी.३। प.११। मा.५)३४(टु । ११५७)

(५७५-१)
हावास्मा ॥ भ्याऽ२३४न्त्वा । वासूवीऽ२३४दाम् । अभाऽ२इवाऽ२३४णीः ।
अनाओऽ२३४वा । षाऽ२३४ता ॥ गोभिष्टेव ॥ णमभिवाऽ२३ ॥ सयाम-
सिहोऽ२३४५इ ॥ डा ॥ (दी.३। प.१०। मा.५)३५(णु । ११५८)

(५७६-१) ॥ यशाꣳसि त्रीणि । त्रयाणां सोमउष्णिक् सोमः ॥
पवतेहा ॥ र्यतोहरिः । औऽ३होऽ३१इ । औऽ२होऽ२३४वा । आतिह्वराऽ२ꣳ-
सिरꣳहिया । औहोऽ३१इ । औऽ२होऽ२३४वा ॥ अभ्यर्षस्तोतृभ्योवा ।
औऽ३होऽ३१इ । औऽ२होऽ२३४वा ॥ राऽ२वाऽ२३४औहोवा ॥
यशोयशाऽ२३४५ः ॥ (दी.१०। प.१२। मा.६)३६(फू । ११५९)

(५७६-२)
पवाऽ३ । पवतेहा ॥ र्यतोहरिः । औहोइ । औऽ३होइ । औहोइ ।आतिह्वराऽ२ꣳ-
सिरꣳहिया । औहोइ । औऽ३होइ । औहोइ ॥ अभ्यर्षस्तोतृभ्योवा । औहोइ ।
औऽ३होइ । औहोऽ३ ॥ राऽ२वाऽ२३४औहोवा ॥ यशोयशाऽ२३४५ः ॥
(दी.१५। प.१६। मा.११)३७(प । ११६०)

(साम-तन्त्र-सूत्राणि) (११५६)३३(११५७)३४(११५८)३५(११६०)३७ (पृथक् सूत्राणि न सन्ति)
(११५९)३६ नऌः४.५.८;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५७६-३)

पवतेहर्यतः । हरीऽ३ः । आऽ२३४ । तिह्वराꣳसिर । हिया ॥ अभ्यर्षाऽ२३४ । स्तोतृ ॥ भ्योवाऽ३इ ॥ राऽ२वाऽ२३४औहोवा ॥ याऽ२३४शाः ॥

(दी.६। प.१०। मा.५)३८(ङु । ११६१)

(५७७-१) ॥ भारद्वाजम् । भरद्वाज उष्णिक् सोमः ॥

परिकोऽ३शंमधुश्चुताम् ॥ सोमꣳपुनानोअर्षति । होयेऽ३ ॥ अभिवाऽ२३४५ ॥ णीर्ऋषीणाꣳस । प्तानाओऽ२३४वा ॥ षाऽ२३४ता ॥

(दी.६। प.७। मा.३)३९(खि । ११६२)

एकोनचत्वारिंशत्, दशमः खण्डः ॥१०॥ दशतिः ॥८॥

॥ इत्यौष्णिहम् ॥

॥ इति ग्रामे गेय-गाने सप्तदशस्यार्द्धः प्रपाठकः ॥

(५७८-१) ॥ वासिष्ठम् । वसिष्ठः कुकुप् सोमः ॥

पावा ॥ स्वमाधुमा । तामाओऽ२३४वा । ईऽ२३४न्द्रा । यसोमक्रतुवित्त-मोमदाऽ३ः ॥ ओइ । माहाओऽ२३४वा ॥ द्युक्षतमोमदाऽ२३४५ः ॥

(दी.३। प.८। मा.५)१(ङु । ११६३)

(५७८-२) ॥ सफे द्वे । द्वयो र्देवाः ककुप् इन्द्रसोमौ ॥

पाऽ३४ । वस्वम । धुमत्ताऽ६माः ॥ आइन्द्राऽ२ । यसोमाऽ२ । क्रतुवाइत्ताऽ३-मोऽ३ । माऽ३दाः ॥ महिद्युक्षाताऽ३मोऽ३ ॥ माऽ३४५दोऽ६हाइ ॥

(दी. नास्ति । प.९। मा.५)२(लु । ११६४)

(५७८-३)

पवस्वमधुमा । इहा ॥ तमः । इन्द्रायसोमक्रतुवित्तमोमाऽ२३दाः । इहा ॥ महाइद्यूऽ२३क्षा । इहा ॥ तमोमाऽ२३दाऽ३४३ः । ओऽ२३४५इ ॥ डा ॥

(दी.५। प.१०। मा.५)३(मु । ११६५)

(साम-तन्त्र-सूत्राणि) (११६१)३८ (११६३)१(११६४)२ (पृथक् सूत्राणि न सन्ति) (११६२)३९ अभि णि ४.८.९; (११६५)३ दिञु ८.३.६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५७८-४) ॥ वासिष्ठम् । वसिष्ठः ककुप् सोमेन्द्रौ ॥

पवस्वमा । एऽ५ । धुमा ॥ तमाः । इन्द्रायसोऽ३ । हा । औऽ३हो । माक्रातूवीऽ२३दाऽ३ । हा । औऽ३होऽ३४ । तमोऽ३४मदाः ॥ महायेऽ३ ॥ द्यूऽ२क्षाऽ२३४औहोवा ॥ तमोमदाऽ२३४५ः ॥

(दी.५। प.१४। मा.४)४(भी । ११६६)

((५७८-५) ॥ सफम् । देवाः ककुप् सोमः ॥

पवस्वाऽ३मधु । मत्ताऽ२३४माः ॥ इन्द्रायसोमाऽ२ । क्रतुवाइत्ताऽ३मोऽ३ । माऽ३२३४दाः ॥ महाइ ॥ द्युक्षाताऽ३मोऽ३ । माऽ३४५दोऽ६हाइ ॥

(दी.१। प.८। मा.५)५(गु । ११६७)

(५७९-१) ॥ ऐषिराणि चत्वारि । चतुर्णामिषिरः ककुप् सोमः ॥

अभाइ । द्युम्नाऽ३म्वृऽ३हद्यशः ॥ इषाः । पतेदिदीहिदेऽ३वाऽ३देवयुम् ॥ विको । शम्म ॥ ध्यमाऽ३०यूऽ५वाऽ६५६ ॥ (दी.३। प.७। मा.४)६(ठी । ११६८)

(५७९-२)

अ । भ्येद्यूम्नाम् ॥ बृहाद्याऽ१शाऽ२ः । इषास्पताइ । दीदीहाऽ२३४इदे । वदाइवाऽ२३४यूम् ॥ विकौवाओऽ२३४वा ॥ शम्मध्यमाऽ३१उवाऽ२३ ॥ यूऽ२३४वा ॥

(दी. नास्ति । प.९। मा.८)७(लै । ११६९)

(५७९-३)

अभिद्युम्नम्बृहत् । इहा ॥ यशः । इषस्पतेदिदीहिदेवदेवाऽ२३यूम् ॥ विकौहोवा-ऽ३हाइ ॥ शम्माऽ२ध्यमंयुव । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

(दी.७। प.९। मा.५)८(झु । ११७०)

(५७९-४)

अभिद्युम्नंबृऽ६हद्यशाः ॥ इषस्पताइ । दिदीहिदाइ । वादेवयूम् ॥ विकोशम्मध्य-माऽ२३ःहोइ ॥ यूऽ२३४वा । एहियाऽ६हा । होऽ५इ ॥ डा ॥

(दी.५। प.९। वि.६)९(भू । ११७१)

(साम-तन्त्र-सूत्राणि) (११६६)४ आहि ६.१.५; (११६७)५ (११६८)६ (११७०)८ (११७१)९ (पृथक् सूत्राणि न सन्ति) (११६९)७ आनीव्यम् ५.१०.९;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५८०-१) ॥ कार्णश्रवसानि त्रीणि । त्रयाणां कर्णश्रवा ककुबश्वः ॥

५र र र १ ३ ५र र ३ ५ १२१ र २१विर
आसोतापा ॥ राऽ२इषाऽ२३४औहोवा । चाऽ२३४ता । अश्वन्नस्तोममप्तुरा-

१ २ २ १२ २ ५र र
ऽ२ॱरजस्तुरम् ॥ ओयेऽ३ । वनाऽ३ ॥ ओयेऽ३ । प्रक्षाऽ३४ । औहोवा ॥

२ १ ३ १११
उदप्रुताऽ२३४५म् ॥ (दी.९। प.१०। मा.४)१०(नी । ११७२)

(५८०-२)

५र र र २ १ — — — — १२१ र २
आसोतापा ॥ रिषि । चताऽ२ । ऊऽ२ । हाऽ२इ । ऊऽ२ । अश्वन्नस्तोमम ।

१ — — — — १ — — —
प्तुराऽ२म् । ऊऽ२ । हाऽ२इ । ऊऽ२ । रज । स्तुराऽ२म् । ऊऽ२ । हाऽ२इ ।

— १ — — — १ ३ २
ऊऽ२ ॥ वन । प्रक्षाऽ२म् । ऊऽ२ । हाऽ२इ । ऊऽ२ ॥ उद ।

१ ३ ५र र २ ५
प्रूऽ२ताऽ२३४औहोवा ॥ ऊऽ३२३४पा ॥ (दी.६।प.२४। मा.८)११(घ्लै । ११७३)

(५८०-३)

५र र र १ २ ३ ५ ३ २ ३
आसोतापा ॥ रि । षाइ । चता । अश्वान्नस्तो । मामप्तूऽ२३४राम् । रजास्तू-

५ ४ १ २ २ १ २ ५
ऽ२३४राम् ॥ वनोहाइ ॥ प्राक्षामूऽ३दा । हुम्मायेऽ३ ॥ प्रूऽ२३४ताम् ॥

(दी.३ । प.११। मा.५)१२(टु । ११७४)

(५८०-४) ॥ वाचस्सामानि त्रीणि । त्रयाणां वाक्ककुबश्वः ॥

५र र र र ५ १ २ ३ ५ १ र २१विर १
आसोतापारीऽ६षिश्चता ॥ आश्वाओऽ२३४वा । नस्तोममप्तुराऽ२ॱरजस्तुरा-

१ १ २ ३ ५ २ १२१३ १११
ऽ२३म् ॥ होइ । वानाओऽ२३४वा ॥ प्रक्षमुदप्रुताऽ२३४५म् ॥

(दी.६। प.६। मा.५)१३(कु । ११७५)

(५८०-५)

३र २ ३र४र ५ १र अ — १ २ र १ अ
आसोऽ३४औहोवा ॥ तापराइषिश्चाताऽ२ । आश्वन्नस्तो । मामप्तूराऽ२म् ।

३ २ ३ ५ ४ १ २ ५
रजास्तूऽ२३४राम् ॥ वनोहाइ ॥ प्राक्षमुदाऽ३१उवाऽ२३ ॥ प्रूऽ२३४ताम् ॥

(दी.५। प.८। मा.७)१४(बे । ११७६)

(४८०-६)

३र ४र५र २ ३ ४ ५ ५ १ २ र १ अ — १ २
आसोतापा । हो । रिषिश्चताऽ६ए ॥ आश्वन्नस्तो । मामप्तूराऽ२म् । राजस्तुरम् ॥

१ अ १ ४ २ ५
वानप्राक्षाऽ२३म् ॥ ऊऽ२३दाऽ३ । प्रूऽ३४५तोऽ६हाइ ॥

(दी.४। प.९। मा.५)१५(धु । ११७७)

(साम-तन्त्र-सूत्राणि) (११७२)१०अप्तुरंनवतावृजि ३.२.४; (११७३)११ (११७४)१२ (११७५)१३ (११७७)१५ (पृथक् सूत्राणि न सन्ति) (११७६)१४ वि ५.३.१०;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५८१-१) ॥ कौल्मलबर्हिषे द्वे । द्वयोः कुल्मलबर्हिः ककुप् वृषभः ॥

एताम् ॥ ऊत्याम् । मदाऽ२च्यूऽ२३४ताम् । सहास्त्रधा । रांवृषभाऽ३म् ।
दिवोऽ२दूऽ२३४हाम् ॥ विश्वाऽ२होऽ१इ । होइ ॥ वाऽ२३सूऽ३ । नाऽ२इबा-
ऽ२३४औहोवा ॥ भ्राऽ२३४ताम् ॥ (दी.२। प.११। मा.१०)१६(चौ । ११७८)

(५८१-२)

एतामूत्याम् ॥ मदाऽ३१उवाऽ२३ । च्यूऽ२३४ताम् । सहस्त्रधारंवृषभन्दिवो-
दुहाऽ२३म् ॥ वाइश्वावासू ॥ निबाऽ३१उवायेऽ३ ॥ भ्राऽ२३४ताम् ॥
(दी.२। प.७। मा.७)१७(छे । ११७९)

(५८१-३) ॥ सादन्तीयम् (शङ्कु) प्रजापतिः ककुप् वृषभः ॥

एतमुत्यम् । एऽ५ । मदा ॥ च्युताम् । सहस्त्रधारंवृषभंदिवोदूऽ२३हाम् ॥
वाइश्वाऽ२वासूऽ२३ ॥ निबोऽ२३४वा । भ्राऽ५तोऽ६हाइ ॥
(दी.३। प.८। मा.५)१८(ड्डु । ११८०)

(५८१-४) ॥ कौल्मलबर्हिषाणि त्रीणि । त्रयाणां कुल्मलबर्हिः ककुप् वृषभः ॥

एतमुत्यम् । ओहाइ । मदच्युतम् । ओहाइ ॥ साहस्त्राऽ२३४धा । रंवार्षाऽ२३४भाम् ।
दिवोदुहमोऽ२३४हाइ ॥ विश्वाऽ२होऽ१इ ॥ वाऽ२३सूऽ३ । नाऽ२इबा-
ऽ२३४औहोवा ॥ भ्राऽ२३४ताम् ॥ (दी.४। पा.११। मा.१०)१९(तौ । ११८१)

(५८१-५)

एतामुत्यंमदाच्युताम् ॥ साहस्त्रधा । रा०वृषाभाऽ२म् । दिवोऽ२ । दुहमोइ ॥
विश्वावसूनिवाऽ२३होइ ॥ भ्रातमाऽ३१उवाऽ२३ ॥ ऊऽ३२३४पा ॥
(दी.३। प.८। मा.५)२०(ड्लु । ११८२)

(५८१-६)

एताऽ३४म् । उत्यम्मदा । च्यूताम् ॥ सहस्त्रधारऽ२०वृ । षभम् । दिवोऽ२३१२३ ।
दूऽ२३४हाम् ॥ विश्वावसूनिबाऽ३ओयेऽ३ ॥ भ्राऽ२३४ताम् । एहियाऽ६हा ॥
होऽ५इ ॥ डा ॥ (दी.६। प.१२। मा.७)२१(खे । ११८३)

(साम-तन्त्र-सूत्राणि) (११७८)१६ एवत् जरायाः ५.८.६; (११७९)१७ आतृतीयाच्चतुर्थे ३.३.५; खिद्वुरुलघोः ७.२.१; (११८२)२० च्यु ७.२.८; द्वितीयम् ७.२.९; (११८०)१८(११८१)१९(पृथक् सूत्राणि न सन्ति)(११८३)२१ धारंपि ३.१.६;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५८२-१) ॥ लोमनी द्वे (दीर्घम्) द्वयोर्भरद्वाजः ककुप् सोमः ॥

४ ५ १र र २ १ —१ — र र १ २
सासू । न्वेयोवसूऽ२३नाम् । योराऽ२यामाऽ२ । नेतायइडाऽ२३नाम् ॥
१ २ १ २ १ ५ ५
मावोवचाꣳसिपरिचक्ष्याणिवोऽ२३चाऽ३म् ॥ हाउहाउहाउ । आइही । (त्रिः) । आइहीऽ२ । (त्रिः) । आइहिहाऽ२इ । (द्विः) । आइहिहाइ । सुम्नेष्विद्वोअन्तमामदाऽ२इमाउवाऽ३ ॥ ईऽ२३४५ ॥

(दी. २१ । प. २५ । मा.३६)८(ङू । १९४)

(११४-१) ॥ वसिष्ठ व्रते द्वे ॥ द्वयोर्वसिष्ठास्त्रिष्टुबिन्द्रः ॥

हाउहाउहाउ । ऊऽ२ । (त्रिः)। षि । (त्रिः)। इयाहाउ । (त्रिः) । उदुब्रह्मा । णीऽ३ऐर । तश्रवस्या ॥ इन्द्रꣳसमा । येंऽ३मह । यावसिष्ठा ॥ आयोविश्वा । नीऽ३श्रव । साततानाा ॥ उपश्रोता । मईव । तोवचाꣳसी । हाउहाउहाउ । ऊऽ२ । (त्रिः) । षि । (त्रिः) । इयाहाउ । (द्विः)। इयाऽ३हाउ । वाऽ३ ॥ ईऽ२३४५ ॥

(दी. १६। प.३४। मा.१४)९(घ्री। १९५)

(११४-२)

हाउहाउहाउ । ऊऽ२ । (त्रिः) । षि । (त्रिः) । इयो । (त्रिः) । इयोवा । (त्रिः)। इयोवाहाइ । (त्रिः)। उदुऽ२ । (द्विः) । उदु । उदोवा । (त्रि) । उदोवाहाइ । (त्रिः)। ब्रह्मा । णीऽ३ऐर । तश्रवस्या । स्या । स्या। स्योवा । (त्रिः)। स्योवाहाइ । (त्रिः) । इन्द्रऽ२म् । (द्विः) । इन्द्रम् । इन्द्रोवा। (त्रिः)। इन्द्रोवाहाइ । (त्रिः) । समा । येंऽ३मह । यावसिष्ठा । ष्ठा । ष्ठा । ष्ठोवा । (त्रिः)। ष्ठोवाहाइ । (त्रिः) ॥ आयोऽ२ । (द्विः) । आयः। आयोवा । (त्रिः) । आयोवाहाइ । (त्रिः)। विश्वा । नीऽ३श्रव । साततानाा । ना । ना । नोवा । (त्रिः) । नोवाहाइ । (त्रिः) ॥ उपऽ२ । (द्विः) । उप । उपोवा । (त्रिः)। उपोवाहाइ । (त्रिः) । श्रोता । मईव । तोवचाꣳसी । सी । सी । सोवा । (त्रिः) । सोवाहाइ । (त्रिः) । हाउहाउहाउ । ऊऽ२ । (त्रिः) । षि । (त्रिः) । इयो । (त्रिः) । इयोवा । (त्रिः) । इयोवाहाइ । (द्विः) । इयोवाऽ३हाउ । वाऽ३ ॥ ईऽ२३४५ ॥

(दी. १५६। प. ११४। मा. ४२)१०(घ्रा । १९६)

॥ दश तृतीयः खण्डः ॥३॥

(साम-तन्त्र-सूत्राणि) (१९४)८ (१९५)९(१९६)१०(पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(११५-१) ॥ इन्द्रस्य सञ्जयम् । इन्द्रस्त्रिष्टुबिन्द्रः ॥

२र र र १ र र २ १ २ १र र र २ १

हाउहाउहाउ । विश्वाधनानिसंजित्यवृत्रहाभूर्यासुतिः । होइ । (द्वे-त्रिः)।

२ १र २र र १ २ १र र २र१र र २ र १

उरुंघोषंचक्रेलोकम् । होइ । (द्वे-त्रिः)। वृत्रमेभ्योलोकेभ्योनुनुदानः । होइ ।

२ १ २ १ २र३ ४ ५ २ १र २ १

(द्वे-त्रिः)। इन्द्रन्नरो । नेऽ३मधि । ताहवन्ताइ ॥ यत्पारियाः । युनज ।

२ ३ ४ ५ २र१र २ १ २ ३ ४र ५ २र१र २१र

ताइधियस्ताः ॥ शूरोनृषा । ताऽ३श्रव । सश्चकामाइ ॥ आगोमताइ । व्रजेभ ।

२र ३ ४ ५ २र र र १ र र २ १ २ १र र र २ १

जातुवन्नाः । हाउहाउहाउ । विश्वाधनानिसंजित्यवृत्रहाभूर्यासुतिः । होइ ।

२ १ र २र र १ २ १ र र २र१र र २ र १

(द्वे-त्रिः)। उरुंघोषंचक्रेलोकम् । होइ । (द्वे-त्रिः)। वृत्रमेभ्योलोकेभ्योनुनुदानः ।

२ १ र र२र१र र २ र १ ^ ३ ५र र २र

होइ ।(द्वे-द्विः) वृत्रमेभ्योलोकेभ्योनुनुदानः । होऽ२ । वाऽ२३४औहोवा ॥ ए ।

१ २ १र २ १ २र १ २र १ २ १र २ १ २र

वृत्रंजघन्वाँ अपतद्ववारयत्तमः । (द्वे-द्विः)। ए । वृत्रंजघन्वाँ अपतद्ववा-

१ १ १ १ □

रयत्तमाऽ२३४५ः । (दी.११०। प. ५७। मा.५५)११(फु । १९७)

(११६-१) ॥ यशस्साम । अगस्त्ययशः ज्योतिष्मतीजगतीद्यावापृथिव्यौ ॥

२ १ र२र १र र २ १र २ १ र २र १र

हाउहाउहाउवा । यशोमाद्यावापृथिवी ॥ हाउहाउहाउवा । यशोमेन्द्रबृहस्पती ॥

२ १ र २ २ १ र २र१ २ र

हाउहाउहाउवा । यशोभगस्यविन्दतु ॥ हाउहाउहाउवा । यशोमाप्रतिमुच्यताम् ॥

२ १ र २ १ २ १ २ १र र

हाउहाउहाउवा । यशःस्वियस्स्यास्सँसदः ॥ हाउहाउहाउवा । अहंप्रवदितास्याम् ।

२ १ २ १

हाउहाउहाउवा ॥ अश्वमिष्टयेऽ३हस् ॥ (दी.१५।प.१४। मा.२५)१२(भु । १९८)

(११७-१) ॥ प्रजापतेस्त्रयास्त्रिंशत् सम्मितम् । प्रजापतिर्विराडिन्द्रः ॥

२ ^ २ १र २ र ३ ५ १

एऽ३१ । (चतुः)। प्रवोमहाइ । महेवृधाइभराऽ२३४ध्वाम् । क्षौ । (चतुः)।

२ ^ २ १र २ ३ ५ १

एऽ३१ । (चतुः) प्रचेतसाइ । प्रसुमताइङ्कृणूऽ२३४ध्वाम् । क्षौ । (चतुः)।

२ ^ २ १ र २ ३ ५ १

एऽ३१ । (चतुः)। विशःपूर्वाइः । प्रचरचर्षणाऽ२३४इप्राः । क्षौ । (चतुः) ।

२ ^ २ ^ ३ ५र र २र १ र २र १

एऽ३१ । (द्विः)। एऽ३१२ । आऽ२३४ । औहोवा ॥ ए । व्रतमेसुवरेशकुनः ॥

(दी.९। प.३७। मा.११)१३(थ । १९९)

(११८-१) ॥ प्रजापतेश्चतुस्त्रिंशत् सम्मितम् । प्रजापतिस्त्रिष्टुबिन्द्रः ॥

१र र र र २र १ २ १

एऽ२ । (पंचकृत्वः)। योवा । (पंच)। योवाहाइ । (पंच)। इन्द्रन्नरो । नेऽ३मधि ।

२र ३ ४ ५ १र र र र २र १र न २

ताहवन्ताइ । एऽ२ । (पंच)। योवा । (पंच)। योवाहाइ । (चतुः)। योवाऽ३हाउ ।

१ १र र १र र२र

वा । क्षौ । (त्रिः)। एऽ२ । (पंच)। योवा । (पंच)। योवाहाइ । (पंच)।

(साम-तन्त्र-सूत्राणि) (१९७)११(१९८)१२ (पृथक् सूत्राणि न सन्ति)(१९९)१३ स्पर्शादिः ५.२.२;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्पारियाः । युनज् । ताइधियस्ताः । एऽ२ । (पंच)। योवा । (पंच)। योवाहाइ । (चतुः)। योवाऽ३हाउ । वा । क्षौ । (त्रिः) । एऽ२ । (पंच)। योवा । (पंच)। योवाहाइ । (पंच)। शूरोनृषा । ताऽ३श्रव । सश्चकामाइ । एऽ२ । (पंच) । योवा । (पंच)। योवाहाइ । (चतुः)। योवाऽ३हाउ । वा । क्षौ । (त्रिः)। एऽ२ । (पंच)। योवा । (पंच)। योवाहाइ । (पंच)। आगोमताइ । व्रजेभ । जातुवन्नाः । एऽ२ । (पंच)। योवा । (पंच)। योवाहाइ । (चतुः)। योवाऽ३हाउ । वा ॥ ए । व्रतमेसुवरेशकुनः ॥ (दी.२०४। प. १४७। मा. ४८)१४(थै । २००)

(११९-१) ॥ जमदग्नेर्व्रतम् । जमदग्निर्बृहतीन्द्रः ॥

हाउहाउहाउ । हहाउ । (त्रिः)। हहहाउ । (त्रिः)। कपाऽ२३उ । (त्रिः)। हाऽ३ओऽ२३ । (द्विः)। हाऽ३१उवाऽ२ । अभित्वाशूरनोऽ३ । आउ । वाऽ२३ । नूऽ२३४माः । ईडा । (त्रिः)। ज्योतिष्पतस्स्वः पतान्तरिक्षंपृथिवीपञ्चप्रदिश- ऋषीन्देवान्वर्णम् ॥ अदुग्धाइवधाऽ३१उवाऽ२३इ । नाऽ२३४वाः । ईडा । (त्रिः)। ज्योतिष्पतस्स्वः पतान्तरिक्षंपृथिवीपञ्चप्रदिशऋषीन्देवान्वर्णम् ॥ ईशानमस्यजगस्सुवाऽ३१उवाऽ२३ । दृऽ२३४शाम् । ईडा । (त्रिः)। ज्योतिष्पतस्स्वः पतान्तारिक्षंपृथिवीपञ्चप्रदिशत्रऋषीन्द्रेवान्वर्णम् ॥ ईशानमिन्द्रताऽ३१उवाऽ२३ । स्थूऽ२३४षाः । ईडा । (त्रिः) । ज्योतिष्पतस्स्वः पतान्तरिक्षंपृथिवीपञ्चप्रदिशत्रऋषीन्द्रेवान्वर्णम् ।(त्रिः) । हाउहाउहाउ । हहाउ ।(त्रिः)। हहहाउ ।(त्रिः) । कपाऽ२३उ । (त्रिः)। हाऽ३ओऽ२३ । (द्विः)। हाऽ३१उवाऽ२ ॥ ए । व्रतमेसुवरेशकुनः ॥

(दी.६४ । प.५४ । मा.४९)१५(धो । २०१)

(१२०-१) ॥ युग्यश्च दशस्तोभम् । जगदग्निस्त्रिष्टुबिन्द्रः ॥

हाउहाउहाउ । ओहा । (त्रिः) । हाओवा । (त्रिः) । ऊऽ२ । (त्रिः) । ओऽ२ । हाउवाक् । (त्रिः) । आयुर्यन् । (त्रिः) । एआयुः । (त्रिः) । आयुः । (त्रिः) ।

(साम-तन्त्र-सूत्राणि) (२००)१४ (पृथक् सूत्राणि न सन्ति) (२०१)१५ रे फिस्वरे १३.५.२; (२०२)१६ न हाउवाग्घविर्दुघानाम् १३.६.२;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वयाः । (द्विः) । वयः । इन्द्रन्नरोनेमधिताहवाऽ२न्ताइ ॥ यत्पार्यायुनजते-
धियाऽ२स्ताः ॥ शूरोनृषाताश्रवसश्चकाऽ२माइ ॥ आगोमतिव्रजेभजातुवाऽ२न्नाः ।
हाउहाउहाउ । ओहा । (त्रिः) । हाओवा । (त्रिः) ऊऽ२ । (त्रिः) । ओऽ२ ।
(त्रिः) हाउवाक् । (त्रिः) । आयुर्यन । (त्रिः) । एआयुः । (त्रिः) । आयुः ।
(त्रिः) । वयाः (द्विः) । वाऽ२ । याऽ२३४ । औहोवा ॥ ए । आयुर्द्धा-
अस्मभ्यंवर्चोधादेवेभ्याऽ२३४५ः ॥ (दी. ९५ । प.६४ । मा. ५९)१६(भो । २०२)

(१२१-१) ॥ वार्त्रघ्नम् । इन्द्रस्त्रिष्टुबिन्द्रः॥

वृत्रहत्यायहोइ । (त्रिः)। अधृष्णवेहोइ ।(त्रिः)। अपूरवेहोइ । (द्विः)। अपूरावाऽ२इ ।
पृथिवीश्चाहोइ । (त्रिः) । विवर्त्तयाहोइ । (द्विः) । विवर्त्तायाऽ२ । अन्तरिक्षꣳहोइ ।
(त्रिः) । सुधारयाहोइ । (द्विः) । सुधारायाऽ२ । दिवंवेपाहोइ । (त्रिः) ।
अवेपयोहोइ । (द्विः) अवेपायाऽ२ः । होइ । (द्विः) । हुवेऽ२ । हाऽ३१उवाऽ२ ।
इन्द्रऽ२ । (द्विः) । इन्द्र । स्यनू । (द्विः) । स्यनूऽ३ । आउ । वाऽ२ ।
वीर्याणि । प्रवा । (द्विः) । प्रवाऽ३१उ । वाऽ२३ । चाऽ२३४५म् ॥ यानिऽ२ ।
(द्विः) । यानि । चका । (द्विः) । चकाऽ३१उ । वाऽ२ । रप्रथमा । निवा ।
(द्विः) । निवाऽ३१उ । वाऽ२३ । ज्रीऽ२३४५ ॥ अहऽ२न् । (द्विः) । अहन् ।
अहाइम् । (द्विः) । अहाऽ३१उ । वाऽ२ । अन्वपः । तता । (द्विः) ।
तताऽ३१उ । वाऽ२३ । दाऽ२३४५ ॥ प्रवऽ२ । (द्विः) । प्रव । क्षणाः । (द्विः)।
क्षणाऽ३१उ । वाऽ२ । अमिनत्पा । र्वता । (द्विः) र्वताऽ३१उ । वाऽ२३ । नाऽ२३४५म् ।
वृत्रहत्यायहोइ । (त्रिः) अधृष्णवेहोइ । (त्रिः) । अपूरवेहोइ । (द्विः) ।
अपूरावाऽ२इ । पृथिवीश्चाहोइ । (त्रिः) । विवर्त्तयाहोइ (द्विः) । विवर्त्तायाऽ२ ।
अन्तरिक्षꣳहोइ । (त्रिः) । सुधारयाहोइ । (द्विः) । सुधारायाऽ२ । दिवंवेपाहोइ ।
(त्रिः)। अवेपयोहोइ । (द्विः)। अवेपायाऽ२ः । होइ । (द्विः)। हुवेऽ२ । हा३१उवाऽ२ ॥
ए । वृत्रहासपत्नहा । (द्वे-त्रिः) ॥ (दी.८५। प. १२१ । मा. ७६)१७९(पू । २०३)

(साम-तन्त्र-सूत्राणि) (२०३)१७ नन्दाया अभौ १३.७.१०; सोमꣳहवि ८.६.४; नन्दायाः मन् १३.१०.१०;
इदं सामतं० भाष्यानुसारेण ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१२२-१) ॥ प्रजापतेश्चाष्टानिधनम् । प्रजापतिर्वृहतीन्द्रः ॥

अभिप्रघ्ना । तमोजसा । तमोजासाऽ२ । (त्रीणि-त्रिः) । तमोजसा । सुवोजासाऽ२ । (द्वे-द्विः)। तमोजसा । सुवो । जाऽ२ । साऽ२३४ । औहोवा । असिप्राणएअसि । (त्रिः) । एअसि । (त्रिः) । सत्यमित्थावृषाऽ२इदाऽ२३४सी । एअसि । (द्विः) । ए । आऽ२ । साऽ२३४ । औहोवा । इडाङ्गच्छसूर्यङ्गच्छे । डाङ्गच्छसूर्यङ्गच्छे । डाङ्गच्छसूर्यङ्गच्छ ॥ अभिप्रघ्ना । तमोजसा । तमोजासाऽ२ । (त्रीणि-त्रिः) । तमोजसा । सुवोजासाऽ२ । (द्वे-द्विः) । तमोजसा । सुवो । जाऽ२ । साऽ२३४ । औहोवा । असिचक्षुरेअसि । (त्रिः)। एअसि । (त्रिः)। वृषजूतिर्नोऽ२वाऽ२३४इता । एविता । (द्विः) । ए । वाऽ२इ । ताऽ२३४ । औहोवा । अन्तरिक्षंगच्छनाकेविभाहि ॥ अभिप्रघ्ना । तमोजसा । तमोजासाऽ२ । (त्रीणि-त्रिः) । तमोजसा । सुवोजासाऽ२ । (द्वे-द्विः) । तमोजसा । सुवो । जाऽ२ । साऽ२३४ । औहोवा । असिश्रोत्रमेअसि । (त्रिः) । एअसि ।(त्रिः)। वृषाह्युग्रश्शृण्विषेपराऽ२वाऽ२३४ती । एवति । (द्विः) । ए । वाऽ२ । ताऽ२३४ । औहोवा । स्वर्गच्छज्योतिर्गच्छ । (त्रिः) ॥ अभिप्रघ्ना । तमोजसा । तमोजासाऽ२ । (त्रीणि-त्रिः)। तमोजसा । सुवोजासाऽ२ ।(द्वे-द्विः) । तमोजसा । सुवो । जाऽ२ । साऽ२३४ । औहोवा । असिज्योतिरेअसि । (त्रिः)। एअसि । (त्रिः) । वृषोअर्वावताऽ२इश्रूऽ२३४ताः । एश्रुतः । (द्विः) । ए । श्रूऽ२ । ताऽ२३४ । औहोवा ॥ अतिज्योतिर्विभाह्येअति । (द्विः) । अतिज्योतिर्विभाह्येअतीऽ२३४५ ॥ (दी. १४६ । प.१३६ । मा.४०)१८(कौ । २०४)

(१२३-१) ॥ इन्द्रस्य राजनम् । इन्द्रस्त्रिष्टबिन्द्रः॥

हिम् । (त्रिः) । हो । (त्रिः) । हꣳ । (त्रिः) । ओहा । (त्रिः) । औहोइ । (त्रिः) । इन्द्रन्नरो । नेऽ३मधि । ताहवन्ताइ । (त्रीणि-त्रिः) । वयोबृहत् । (त्रिः) । विभ्राष्टयेविधर्मणे । (त्रिः) । यत्पारियाः । युनज । ताइधियस्ताः । (त्रीणि-त्रिः)। सत्यमोजः । (त्रिः)। रजस्सुवः ।(त्रिः)। शूरोनृषा । ताऽ३श्रव ।

(साम-तन्त्र-सूत्राणि) (२०४)१८ तदाद्यन्त एङ्ष्टानिघने १३.९.६; त्र्यङो विश्रुमतः १३.९.७; उञु रसंधि ९.७.२; सि रेफिणि ९.७.३;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सश्वकामाइ । (त्रीणि-त्रिः) । भद्रः सुधा । (द्विः) । भद्रः सुधे । षमूर्जम् । इषमूर्जम् । (द्विः) ॥ आगोमताइ । व्रजेभ । जातुवन्नाः । (त्रीणि-त्रिः)। बृहद्यशः । (त्रिः)। दिविदधेऽ३हस् । (द्विः) । दिविदधेऽ३ । हाउवा ॥ वागीडासूवोबृहद्भा२३४५ः ॥ (स्व. ६६। प.७७। वि.४६)१९(खू । २०५)

(१२३-२) ॥ रौहिणम् । इन्द्रस्त्रिष्टुबिन्द्रः ॥

हाउहाउहाउ । आइही । (त्रिः) । आइहिया । (त्रिः) । आसाउ । (त्रिः) । आयाम् । (त्रिः) । नामाः । (त्रिः)। किट् । (द्विः)। इन्द्रन्नरोनेमधिताहवाऽ२न्ताइ ॥ यत्पार्यायुनजतेधियाऽ२स्ताः ॥ शूरोनृषाताश्रवसश्चकाऽ२माइ ॥ आगोमतिव्रजेभजातुवाऽ२न्नाः । मनाऽ२३होइ । प्राणाऽ२३होइ । चक्षूऽ२३होंइ । श्रोत्राऽ२३ःहोइ । घोषाऽ२३होइ । व्रताऽ२३ःहोइ । भूताऽ२३ःहोइ । पानाऽ२३ःहोइ । चित्ताऽ२३ःहोइ । धीताऽ२३ःहोइ । सुवाऽ२३होंइ । ज्योताऽ२३इहोंऽ२ । वाऽ२३४औहोवा ॥ ऊऽ२३४५ ॥

(दी.२६ । प.३६ । मा.३७)२०(र्को २०६)

॥ दश चतुर्थः खण्डः ॥४॥

॥ इति (ग्रामे) आरण्यकगाने चतुर्थः प्रपाठकः ॥

(१) ॥ त्रीणि अग्नेरिलांदं पञ्चानुगानम्, इरान्नं वा । अग्न्यनुष्टुबात्मा ॥

हाउहाउहाउ । ऊऽ२ । (त्रिः)। हुऊऽ२ । (त्रिः) ॥ इयाहाउ । (द्विः) । इयाऽ३हाउ । वाऽ३ ॥ इट्(स्थि)इडाऽ२३४५ ॥(दी.३। प.१२। मा.१०)१(ठौ ।२०७)

(१२४-१) ॥ (तत्र द्वितीय मिदम्) ॥

हाउहाउहाउवा । अग्निरस्मिजन्मनाजातवेदाः । इडा । सुवः । इडा ॥
हाउहाउहाउवा । घृतंमेचक्षुरमृतंमआसन् । इडा । सुवः । इडा ॥
हाउहाउहाउवा ॥ त्रिधातुरर्क्कोरजसोविमानः । इडा । सुवः । इडा ॥
हाउहाउहाउवा ॥ अजस्त्रंज्योतिर्हविरस्मिसर्वम् । इडा । सुवः । इडा ॥

(दी.१९। प.२०। मा.२१)२(न ।२०८)

(साम-तन्त्र-सूत्राणि) (२०५)१९ जः स्रोः १३.५.४; वाग्लघु ८.५.८; (२०६)२० (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१२५-१) ॥ अग्नेरिलांदम् पंचानुगानम् । अग्निस्त्रिष्टबग्नि:(तत्र तृतीयमिदम्)॥

हाउहाउहाउ । पात्यग्निर्विपोअग्रंपदंवे:। हाऽ३१उवाऽ२३ । सूऽ२३४वा: । इह । हाऽ३१उवाऽ२३ । ज्योऽ२३४५ती:॥ हाउहाउहाउ । पातियह्वश्चरण-ऽसुरियास्या । हाऽ३१उवाऽ२३ । सूऽ२३४वा: । इह । हाऽ३१उवाऽ२३ । ज्योऽ२३४ती: । । हाउहाउहाउ । पातिनाभासप्तशीर्षाणमाग्नि: । हाउ३१उवाऽ२३ । सूऽ२३४वा: । इह । हाऽ३१उवाऽ२३ । ज्यो२३४ती: ॥ हाउहाउहाउ । पातिदेवानामुपमादमार्ष्व: । हाऽ३१उवा२३ । सूऽ२३४वा: । इह । हाऽ३१उवाऽ२३ । ज्योऽ२३४ती: ॥

(दी.२८। प.२८। मा.३२)३(डा । २०९)

(१२६-१) ॥ (तत्र चतुर्थ मिदम्) ॥

इयाऽ२ । (त्रि:) । इयाहाउ । (त्रि:) । इन्द्रन्नरो । नेऽ३मधि । ताहवन्ताइ । हवन्तेऽ३ । हऽहऽहऽहऽहऽ । (द्वे-त्रि:) ॥ हवन्ते । (त्रि:) ॥ यत्पारियाः । युनज । ताइधियस्ताः । धियस्ताऽ३ः । हऽहऽहऽहऽह । (द्वे-त्रि:)। धियस्ताः । (त्रि:)। शूरोनृषा । ताऽश्रव । सश्चकामाइ । चकामेऽ३ । हऽहऽहऽहऽहऽ ॥ (द्वे-त्रि:) । चकामे । (त्रि:) ॥ आगोमताइ । व्रजेभ । जातुवन्नाः । तुवन्नाऽ३ः । हऽहऽहऽहऽहऽ । (द्वे-त्रि:) । तुवन्नः । (त्रि:) । इयाऽ२ । (त्रि:) । इयाहाउ । (द्वि:)। इयाऽ३हाउ । वा ॥ ए । व्रतमेसुवरेशकुनः॥

(दी. ५१। प.६३ । मा.२६)४(गू । २१०)

(१२७-१) ॥ अग्नि: पंक्तिरिन्द्रः ॥

भ्राजाऔहोहोहाइ । त्यग्नेसमिधानादीऽ१दिवाऽ२: ॥ जिह्वाऔहोहोहाइ । चरत्यन्ताराऽ१सानीऽ२ ॥ सत्वाऔहोहोहाइ । नोअग्नेपयसावसूऽ३वीत् ॥ रयिंवर्चोदृशौहोऽ३ । हुम्माऽ२ । दा । औऽ३होवा । होऽ५इ ॥ डा ॥

(दी.१३ । प.१२ । मा.१०)५(ठौ । २११)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१) ।। देवव्रतातिन त्रीणि । द्वयो रुद्रोऽनुष्टुप् रुद्रः । तृतीयस्य विश्वेदेवा अनुष्टुबिन्द्रः (रुद्रः) ।।

१ २ १ २ १ २ १ २१ २
अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वक्षपताइ । धनपताऽ२इ ।
— १ २ १ र २ १र र र २ १र २ १र २ १ २र १ २र १र
नाऽ२माः ।। मन्युनावृत्रहासूर्येणस्वराड्यज्ञेनमघवादक्षिणास्यप्रिया-
२ १र र २र १ २र र १ र २१र २ र १ २ १ र २ १ २ १र
तनूराज्ञाविशंदाधार । वृषभस्त्वष्टावृत्रेणशचीपतिरन्नेनगयक्षपृथिव्यासृ-
२ १र र २र १ २ र र १ र र २ १र २ र र १र
णिकोग्निनाविश्वंभूतम । भ्यभवोवायुनाविश्वाक्षप्रजाअभ्यपवथावषट्कारे-
र २ १र र र २ र १र २र र १र र र २र र र १ २
णार्द्धभाक्सोमेनसोमपाःसमित्यापरमेष्ठी । येदेवादेवाः । दिविषदः ।
१ र र २र र र र १र २र १ २ १र र २र र र १ २
स्थतेभ्योवोदेवादेवेभ्योनमः । येदेवादेवाः । अन्तारिक्षसदः ।
१ र र २र र र र १र २र १ २ र र २र र र र १ २ १ र र
स्थतेभ्योवोदेवादेवेभ्योनमः । येदेवादेवाः । पृथिवीषदः । स्थतेभ्यो-
२र र र र१र २र १ २ र र २र र र १ २ १र र २र र र र१र २र १ २
वोदेवादेवेभ्योनमः । येदेवादेवाः । अप्सुषदः । स्थतेभ्योवोदेवादेवेभ्योनमः ।
र र २र र र १ २ १ र र २र र र१र २र १ २ १र र२र र र
येदेवादेवाः । दिक्षुसदः । स्थतेभ्योवोदेवादेवेभ्योनमः । येदेवादेवाः ।
र र १ २ १र र २र र र र १र २र१२ १ २ १र २१ २र १ र २ १ २र
आशासदः । स्थतेभ्योवोदेवादेवेभ्योनमः । अवज्यामिवधन्वनोवितेमन्युन्नया-
१ र २ १ २ १ २ १ २ १ र
मसिमृडतान्नइह ।। अस्मभ्यम् । इडाऽ२३भा ।। यइदंविश्वंभूतम् ।
२ १ ५
युयोऽ३आउ । वाऽ२३ ।। नाऽ२३४माः ।। (दी.१२६। प.३७। मा.३२)६(खा। २१२)

(२)

१ २ १ २ १ २ १ २१ २ —
अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वक्षपताइ । धनपताऽ२इ ।
— १ २ १ २र र १र २ १ र २र १ २र र १ २
नाऽ२माः ।। नमउत्ततिभ्यश्चोत्तन्वानेभ्यश्चनमोनीषंगिभ्यश्चोपवीतिभ्यश्च-
१ र २ १ र२र १ २ १ २ र १ २ १ २ १ २
नमोस्यद्भ्यश्चप्र । तिदधानेभ्यश्चनमक्षप्रविध्यद्भ्यश्चप्रव्याधिभ्यश्चनमःत्सरद्भ्यश्च-
र १ २१ २ १र २ र १ २ १ २ १ २ र १ २
त्सारिभ्यश्चनमःश्रि । तेभ्यश्चश्रायिभ्यश्चनमस्तिष्ठद्भ्यश्चोपतिष्ठद्भ्यश्च-
१ र २१र २ १र २ १ २ १र २ १ २र १ २ १र २ १ २र १ र
नमोयतेचवियतेचनमक्षपथेचविपथायच । अवज्यामिवधन्वनोविते-
२ १ २र १ र २ १ २ १ २ १ २ १ र
मन्युन्नयामसिमृडतान्नइह ।। अस्मभ्यम् । इडाऽ२३भा ।। यइदंविश्वभूतम् ।
२ १ ५
युयोऽ३आउ । वाऽ२३ ।। नाऽ२३४माः ।। (दी.२६। प.१९। मा.१५)७(धु । २१३)

(३)

१ २ १ २ १ २ १ २१ २ —
अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वक्षपताइ । धनपताऽइ ।
— १ र र२१ र २ र र १र २र र १र २ १ २र १
नाऽ२माः । नमोन्नायनमोन्नपतयएकाक्षायचावपन्नादायचनमोनमः ।
२ १र २र १र१ २ १र २ १ २र१ २ १ २ र १ र २ १ २ १ २ र
रुद्रायतीरसदेनमःस्थिरायस्थिरधन्वनेनमक्षप्रतिपदायचपटरिणेचनमस्त्रियम्बकायचक ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ र २ १ २र र १र २ र र १र २ १ २ १र २ १र २ १
पर्दिनेचनमआश्रायेभ्यश्चप्रत्याश्रायेभ्यश्चनम४क्रव्येभ्यश्चविरिम्फेभ्यश्चनमः-
२ १र २ १२र १ २ १र २ १ २र १र२ १ २र १र २ १ २ १ २
संवृतेचविवृतेच । अवज्यामिवधन्वनोवितेमन्युन्नयामसिमृडतान्नइह ॥ अस्मभ्यम् ।
१ २ १ र २ १ ५
इडाऽ२३भा ॥ यइदंविश्वंभूतम् । युयोऽआउ । वाऽ२३ ॥ नाऽ२३४माः ॥

(दी.३५। प.१९। मा.१६)८(भू । २१४)

(१२८-१) ॥क्रतुष्ठायज्ञायज्ञीयम् । प्रजापतिर्बृहत्यृतवः ॥

३ ४ २ ४ ५ १र २ २ २ १र २
वाऽ५सन्तः । ईऽ३न्नूऽ३रन्तायाः ॥ ग्रीष्मइन्नुराऽ१न्तीऽ३याः । वर्षाण्यनुशाऽ३ ।
१ २ २ १र ^ ३ २ १ १ १
हिम् ॥ राऽ३दाः ॥ हेमन्तश्शिशिरइन्नुराऽ२न्तियाउ ॥ वाऽ२३४५ ॥

(दी. ३ । प. ८ । मा. ८)९(डै । २१५)

(१२९-१) ॥ अजितस्य जितिसाम । अजितो बृहतीन्द्रः ॥

२र र र १ २
हाउहाउहाउ । हुप् । (त्रिः)। बिबिबिबिबीऽ३ । (त्रिः) । हीऽ२ । (त्रिः) ।
१ र २र र र १ २र र १ र
हाउहाउहाउवा । अभित्वाशूरनोनुमोहस् ॥ अदुग्धाइवधेनवोहस् ।
र र २ १ २ १ र र २ १ र २र र र १
ईशानमस्यजगतस्वर्दृशꣳहस् । ईशानमिन्द्रतस्थुषोहस् । हाउहाउहाउ । हुप् ।
२ र १
(त्रिः)। बिबिबिबिबीऽ३ । (त्रिः) । हीऽ२ । (त्रिः)। हाउहाउहाउवा ॥ एअस् ।
२र१ २र१ २र१ ३ १ १ १
एफट् । एमृस् । एहस् । ईऽ२३४५ ॥ (दी.२२ । प.३१। मा.२८)१०(च्रौ । २१६)

(१२०-१) ॥ सोम व्रतम् । सोमस्त्रिष्टुप्सोमः ॥

१र २ ^ १ २ ३४र ५ २ १ २ १
ईऽ२ । (त्रिः) । सन्तेपया । सीऽ३समु । यन्तुवाजाः ॥ संवृष्णिया । नीऽ३अभि ।
२र ३ ४र ५ २र १र २ १ २र ३ ४र ५ २ १ २ १
मातिषाहाः ॥ आप्यायमा । नोऽ३अमृ । तायसोमा ॥ दिविश्रवा । सीऽ३उत्त ।
२र ३ ४ ५ १ ^ ३ ५र र १
मानिधिष्वा । ईऽ२ । (द्विः) । ईऽ२ । आऽ२३४औहोवा ॥ हꣳ ॥

(दी.११। प.२०। मा.६)११(ङू । २१७)

(१३१-१) ॥ दीर्वतमसोऽर्कः । दीर्घतमास्त्रिष्टुप्सोमः सूर्यो वा ॥

१ र ३ २ १ ३ २ १
आयाउ । (त्रिः)। अक्रान्त्समुद्रः प्रथमाइविधर्मान् । विधर्मान् । (द्विः) ।
२ १ र ३ ३र१ ३ ३र१ र र ३र २ १
जनयन्प्राजाभुवनास्यगोपाः । स्यगोपाः (द्विः) । वृषापावित्रेअधिसानोअव्याइ ।
३र २ १ २ १ र र र र ३र २ १
नोअव्याइ । (द्विः) । आयाउ । (त्रिः) । बृहत्सोमोवावृधेसुवानोअद्राइ ।
३र २ १ २र २ २र र १र १ १ १
नोअद्राइ । नोअद्राऽ३१उवाऽ२३ ॥ एऽ३ । धेस्वानोअद्रीऽ२३४५ः ॥

(दी. २० । प. २० । मा. २८)१२(मै । २१८)

द्वादश पञ्चमः खण्डः ॥५॥

(साम-तन्त्र-सूत्राणि) (२१६)१० (२१७)११(२१८)१२(पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१३२-१) ॥ पुरुषव्रतानि पञ्च । पुरुषोऽनुष्टुप्पुरुषः ॥ (पुरूषसूक्तम्)

उहुवाहाउ । (त्रिः) । सहस्रशीर्षा४पुरूऽ२३षाः ॥ सहस्राक्षःसहस्राऽ२३पात् ॥ सभूमिंᳲसर्वतोवाऽ२३त्वो ॥ अत्यतिष्ठद्दशाङ्गुऽ२३लाम् । उहुवाहाउ । (द्विः) । उहुवाऽ३हाउ । वाऽ३ ॥ इट्(स्थि)इडाऽ२३४५ ॥

(दी.६। प.१२। मा.१०)१३(खौ । २१९)

(१३३-१) *

उहुवौहोवाऽ२ । (त्रिः) । त्रिपादूर्ध्वउदैत्पुरूऽ२३षाः ॥ पादोस्येहाभवत्पूऽ२३नाः ॥ तथाविष्वङ्व्यक्राऽ२३मात् ॥ अशनानशनेआऽ२३भी । उहुवौहोवाऽ२ । (द्विः) । उहुवौ । होऽ२ । वाऽ२३४ । औहोवा । ईऽ२३४डा । उहुवौहोवाऽ२ । (द्विः) । उहुवौ । होऽ२ । वाऽ२३४ । औहोवा । सूऽ२३४वाः । उहुवौहोवाऽ२ । (द्विः)। उहुवौ । होऽ२ । वाऽ२३४ । औहोवा ॥ ऊऽ२३४५ ॥

(दी.३७ । प. २८ । मा.६)१४(जू । २२०)

(१३४-१) *

इयौहोवाऽ२ । (त्रिः) पुरुषएवेदᳲसाऽ२३र्वाम् ॥ यद्भूतंयच्चभावाऽ२३याम् ॥ पादोस्यसर्वाभूताऽ२३नी ॥ त्रिपादस्यामृतंदाऽ२३इवी । इयौहोवाऽ२ । (द्विः) । इयौ । होऽ२ । वाऽ२३४ । औहोवा । ईऽ२३४डा ।इयौहोवाऽ२ । (द्विः)। इयौ । होऽ२ । वाऽ२३४ । औहोवा । ज्योऽ२३४तीः । इयौहोवाऽ२ ।(द्विः)। इयौ । होऽ२ । वाऽ२३४ । औहोवा ॥ ईऽ२३४५ ॥

(दी. ३७ । प. २८ । मा.५)१५(ज्रु । २२१)

(१३५-१) *

हाउहाउहाउ । तावानस्य । महाऽ२३इमाऽ३ ॥ हाउहाउहाउ । ततोज्यायाᳲश्चपूरूऽ२३षाऽ३ः ॥ हाउहाउहाउ । उतामृतत्वस्येशाऽ२३नाऽ३ः ॥ हाउहाउहाउ । यदन्नेनातिरोहाऽ२३तीऽ३ । हाउहाउहाउ । वाऽ३ ॥ इट्(स्थि)इडाऽ२३४५ ॥ (दी. २३ । प. १२ । मा.१९)१६(ठो । २२२)

(साम-तन्त्र-सूत्राणि) (२२०)१४ (पृथक् सूत्राणि न सन्ति) (२१९)१३ वात् ११.१०.२; (२२१)१५ (२२२)१६ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१३६-१) *
२
२   १ र२ १र   २र   १र २र १   २१र   २
हाउहाउहाउवा । ततोविराडजायत ॥ हाउहाउहाउवा । विराजोअधिपूरुषः ॥
१ २र १र   २   १र र२ १ र२ १
हाउहाउहाउवा । सजातोअत्यरिच्यत ॥ हाउहाउहाउवा । पश्चाद्भूमिमथोपुरः ।
२   ३   १ १ १
हाउहाउहाउवाऽ३ ॥ ईऽ२३४५ ॥ (दी.११ । प. १० । मा. १९)१७(ड्रो । २२३)

(१३७-१) ॥ पुरुषव्रतं । पुरुषो गायत्रीश्वपुरुषः, विश्वे देवा वा ॥
२र   र   र   १ २ १ २   १ २ १ २   १   २
हाउहाउहाउ । अस्मीनस्मिन् । (त्रिः)। नृम्णाइनृम्णम् । (त्रिः) । निधाइमाहे ।
र   १ २   र र   १   २
(त्रिः)। कयानश्चित्रऽ३आभूऽ१वाऽ२त् ॥ ऊतीसदावृऽ३धाःसाऽ१खाऽ२ ॥
र   १ २   २र र   र   १ २ १ २
कयाशचिष्ठऽ३यावाऽ१र्त्ता२३ ॥ हाउहाउहाउ । अस्मीनस्मिन् । (त्रिः) ।
१ २   १ २   १   २   १   १   ३
नृम्णाइनृम्णम् । (त्रिः) । निधाइमाहे । (२) । निधाऽ२३इ । माऽ२ । हाऽ२३४ ।
५र र   १   र ३   १ १ १
औहोवा ॥ सुवर्ज्योतीऽ२३४५ः ॥

(दी.१४ । प.२७ । मा.३३)१८(थि । २२४)

(१३८-१) ॥ द्यौर्व्रतम् । द्यौःज्योतिष्मती जगती द्यावापृथिव्यौ ॥
१   २र १   २ र र र र   र   १ २
हुवाइ । (त्रिः) । रूपम् । मन्येवांद्यावापृथिवीसुऽ३भोजाऽ१साऽ२उ ॥
२र   र र   १ २   र र   र   १   २
येअप्रथेथाममितममिऽ३योजाऽ१नाऽ२म् ॥ द्यावापृथिवीभवऽ३ताꣳस्योऽ१नाऽ२इ ॥
र र   १ २   १   २र १   ३   ५र र
तेनोमुञ्चतऽ३माꣳहाऽ१साऽ२ः । हुवाइ । (त्रिः) । रूपाऽ२ । वाऽ२३४औहोवा ॥
२र   र १
ए । रूपम् । (द्वे-त्रिः) ॥ (दी. २३ । प. १९ । मा.१६)१९(दू । २२५)

(१३७-१) ॥ अन्तरिक्षवतम् । अन्तरिक्षं गायत्रीन्द्रः ॥
१   २र १   २ र   १ २   र र र
वाक् । (द्विः) । वागीयम् । कयानश्चित्रऽ३आभूऽ१वाऽ२त् ॥ ऊतीसदा-
१ २   र   १ २   १   २र १
वृऽ३धाःसाऽ१खाऽ२ ॥ कयाशचिष्ठऽ३यावाऽ१र्त्ताऽ२ ॥ वाक् । (द्विः) । वागीयाऽ२ ।
३   ५र र   २र   १ २र   १ र २र ३   १ १ १
वाऽ२३४औहोवा ॥ ए । अन्तरिक्षेसलिलल्लेलायाऽ२३४५ ॥

(दी.१३ । प.१२ । मा.८)२०(ठै । २२६)

(१३८-१) ॥ पृथिवीव्रतम् । पृथिवीज्योतिष्मतीजगतीद्यावापृथिव्यौ ॥
२   १र   २   १   २ र   र र र   २ र र र र र
प्रतिष्ठासिप्रति । ष्ठा । (द्वे-त्रिः)। वर्च्चोसिमनोसिऐही । मन्येवांद्यावा-
र   र   र र र   र   र र   र   र र र   र र   र
पृथिवीसुभोजसावैही ॥ येअप्रथेथाममितमभियोजनामैही । द्यावापृथिवी-

---

(साम-तन्त्र-सूत्राणि) (२२३)१७ (२२४)१८ (२२५)१९(२२६)२० (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र र र र　र र　र र र　१र　२　१
भवतꣳस्योनाऐही ॥ तेनोमुञ्चतमꣳहसाऐही । प्रतिष्ठासिप्रति । ष्ठा । (द्वे-त्रिः) ।
२　र　र　र　२　र　र१
वर्च्चोसिमनोसिऐहीऽ३ । हाउवा ॥ ए । भूतम् । (द्वे-त्रिः) ॥

(दी.४७।प.२५।मा.९)२१(ञो । २२७)

(१३९-१)　॥ ऋश्यसाम (व्रतम्) कश्यपोऽनुष्टुबिन्द्रः ॥
२ र　१ र　१र र　२　२　२　१र　२ ^
हरीतइन्द्रश्मश्रूणी । उतोतेहरिताऽ१उहा३री ॥ तन्त्वास्तुवन्तिकाऽ३ ।
४ ५　२ १र र　२　४ ५　१　र२　१　२ १ २　१　२
वायाः ॥ परुषासोवनाऽ३ । गावाः । ऋश्यासइन्द्रभुङ्ङतिमघवन्निन्द्रभुङ्ङति-
१　२ १　र　२ र ३　१ १ १
भुङ्ङतिप्रभुङ्ङतीन्द्रस्तसरपूताऽ२३४५ः ॥ (दी.९। प.७। मा.६)२२(थू । २२८)

॥ दश षष्ठः खण्डः ॥

॥ इति आरण्यकगाने पञ्चमस्यार्द्धः प्रपाठकः ॥

॥ दिशां व्रतम् । दिशोऽनुष्टुबात्मा । (कश्यपगायत्रीन्द्रः) ॥

(१४०-१)
२र　र　र　१　२ १　र१र　२र १र　२र १र
हाउहाउहाउ । अहमन्नम् । (त्रिः) । अहमन्नादो । हमन्नादो । हमन्नादो ।
२र　१　२र　१　२र　र　र　१　२र१　२　१
हंविधारयो । (द्विः) । हंविधारयः । हाउहाउहाउ । यद्वर्च्चोहिरण्य । स्या ॥
२र१　२र१र२　१　२ १ २ १　२र१　र　२र१　२र　१
यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम । साइ ।
२र　र　र　१　२ १　२र १र　२र १र
हाउहाउहाउ । अहमन्नम् । (त्रिः) । अहमन्नादो । हमन्नादो । (द्विः)।
२र　१र　२र　१　२　र　२ १　२ १　२र१र
हंविधारयो । (द्विः)। हंविधारयः । हाउहाउहाउ । वा । ए ।अहमन्नमहमन्नादो-
२र　१　२र　१　र ३　१ १ १
हंविधारयः। (द्वे-त्रिः) । ए । अहꣳसुवर्ज्योतीऽ२३४५ः ॥

(दी. ५३ । प.३९ । मा.२६)१(द्रू । २२९)

(१४०-२)
२र　र　र　१　२र　१　२र　१　२र　१　२ १　२र १
हाउहाउहाउ । अहꣳसहो । हꣳसहो । (द्विः) । हꣳसासहिः । अहꣳसासहिः ।
२ १　र२र१र　र २र१र　र २ र　१　२र　र　र
(द्विः) । अहꣳसासहानो । हꣳसासहानो । हꣳसासहानः । हाउहाउहाउ ।
१　२र१　२　१　२र१ २र१र २　१　२ १　२ १　२र१
यद्वर्च्चोहिरण्य । स्या ॥ यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥
१र २र१　२र　१　२र　र　र　१　२र　१　२र
तेनमासꣳसृजाम । साइ । हाउहाउहाउ । अहꣳसहो । हꣳसहो । (द्विः) ।

(साम-तन्त्र-सूत्राणि) (२२७)२१ (२२८)२२ (२२९)१ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २र १ २ १ २र १ २ १ र २ र १र र २ र १र
हꣳसासहिः । अहꣳसासहिः ।(द्विः)। अहꣳसासहानो । हꣳसासहानो ।
र २ र १ २ र १ २र १ २र १ २ १ र २ र १
हꣳसासहानः । हाउहाउहाउ । वा ॥ ए । अहꣳसहोहꣳसासहिरहꣳसासहानः ।
२र १ र ३ १ १ १
(द्वे-त्रिः) । ए । अहꣳसुवर्ज्योतीऽ२३४५ः ॥

(दी.६२। प.३९ । मा.२६)२(झू । २३०)

(१४०-३)
२र र र १ २र १ २र १ २र र र १ २र १ २
हाउहाउहाउ । अहंवर्च्चो । हंवर्चो । हंवर्च्चः । हाउहाउहाउ । यद्वर्च्चोहिरण्य ।
१ २र १ २र१ र २ १ २ १ २ १ २र १ र २र १ २र
स्या ॥ यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम ।
१ २र र र १ २र १ २र १ २
साइ । हाउहाउहाउ । अहंवर्च्चो । हंवर्च्चो । हवर्च्चः । हाउहाउहाउ । वा ॥
र १ २र १ र ३ १ १ १
ए । अहंवर्च्चः । (द्वे-त्रिः) । ए । अहꣳसुवर्ज्योतीऽ२३४५ः ॥

(दी.२६ । प.२७। मा.२०)३(खौ । २३१)

(१४०-४)
२र र र १ र २र १ र २र १र २र र र १ २र १ २
हाउहाउहाउ । अहंतेजो । हंतेजो । हंतेजः । हाउहाउहाउ । यद्वर्च्चोहिरण्य ।
१ २र १ २र १ र २ १ २ १ २ १ २र १ १र २र १ २र
स्या ॥ यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम ।
१ २र र र १ र २र १ र २र १र र २ र
साइ । हाउहाउहाउ । अहंतेजो । हंतेजो । हंतेजः । हाउहाउहाउ । वा । ए ।
१र २र १ र ३ १ १ १
अहंतेजः । (द्वे-त्रिः) । ए । अहꣳसुवर्ज्योतीऽ२३४५ः ।

(दी.३५ । प.२७ । मा.२०)४(फौ । २३२)

(१४०-५)
२र र र १ २र १ र २र १ र २र
हाउहाउहाउ । दिशन्दुहे । (त्रिः)। दिशौदुहे । (त्रिः) । दिशोदुहे । (त्रिः) ।
१ र २र र र र १ २र १ २ १ २र १ २र १ र २
सर्वादुहे । (त्रिः) । हाउहाउहाउ । यद्वर्च्चोहिरण्य । स्या ॥ यद्वावर्च्चोगवामु ।
१ २ १ २ १ २र १ १र २र १ २र १ २र र र
ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम । साइ । हाउहाउहाउ ।
१ २र १ र २र १ र २र
दिशन्दुहे । (त्रिः) दिशौदुहे । (त्रिः) । दिशोदुहे । (त्रिः) । सर्वादुहे । (त्रिः) ।
र १ २र १ र २र १ र २र १ र २र
हाउहाउहाउ । वा ॥ ए । दिशन्दुहेदिशौदुहेदिशोदुहेसर्वादुहे । (द्वे-त्रिः) ।
र १ र ३ १ १ १
ए । अहꣳसुवर्ज्योतीऽ२३४५ः ॥ (दी. ८५ । प.४५ । मा.१५)५(मु । २३३)

(साम-तन्त्र-सूत्राणि) (२३०)२ (२३१)३ (२३२)४ (२३३)५ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१४०-६)

२र र र १ र २ १ २ १ र २
हाउहाउहाउ । मनोजयित् । (त्रिः) । हृदयमजयित् । (त्रिः) । इन्द्रोजयित् ।
१ २र २र र र १ २र १ २ १
(त्रिः) । अहमजैषम् । (त्रिः)। हाउहाउहाउ । यद्वर्च्चोहिरण्य । स्या ॥
२र१ २र १ र २ १ २ १ २ १ २र १ २र १ २र १
यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम । साइ ।
२र र र १ र २ १ २ १ र २
हाउहाउहाउ । मनोजयित् । (त्रिः) हृदयमजयित् । (त्रिः) । इन्द्रोजयित् ।
१ २र र १ र २ १ २
(त्रिः) । अहमजैषम् । (त्रिः) हाउहाउहाउ । वा ॥ ए । मनोजयिद्धृदयमजयि-
१ र २ १ २र र १ र ३ १११
दिन्द्रोजयिदहमजैषम् । (द्वे-त्रिः) । ए । अहꣳसुवर्ज्योतीऽ२३४५ः ॥

(दी. ४९ । प. ४५ । मा.४२)६(ना । २३४)

(१४०-७) (॥ प्रजापतेर्हृदयं । कश्यपोऽनुष्टुप्प्रजापतिः ॥)

२र र र १ र२ र र र १ २र १ २
हाउहाउहाउ । वयः । (त्रिः) । वयोवयः । (त्रिः) । हाउहाउहाउ । यद्वर्च्चोहिरण्य ।
१ २र१ २र१ र २ १ २ १ २ १ २र १ र २र १ २र
स्या ॥ यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम ।
१ २र र र १ र२
साइ । हाउहाउहाउ । वयः । (त्रिः) वयोवयः (त्रिः) । हाउहाउहाउ । वा ॥
र १र र२ र १ र ३ १११
ए । वयोवयोवयः (द्वे-त्रिः) । ए । अहꣳसुवर्ज्योतीऽ२३४५ः ॥

(दी.३४ । प. ३३ । मा. ३०)७(दौ । २३५)

(१४०-८)

२र र र र१ २र१ र २ र र र
हाउहाउहाउ । रूपम् ॥ (त्रिः) । रूपꣳरूपम् । (त्रिः)। हाउहाउहाउ ।
१ २र १ २ १ २र१ २र १ र २ १ २ १ २ १ २र१
यद्वर्च्चोहिरण्य । स्या ॥ यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥
१र २र १ २र १ २र र र र१ २र१ र २
तेनमासꣳसृजाम । साइ । हाउहाउहाउ । रूपम् । (त्रिः)। रूपꣳरूपम् ।
र र १ २र १ र २ र
(त्रिः)। हाउहाउहाउ । वा । ए । रूपꣳरूपꣳरूपम् । (द्वे-त्रिः) । ए ।
१ र ३ १११
अहꣳसुवर्ज्योतीऽ२३४५ः॥ (दी.४९ । प.३३ । मा.३०)८(दौ । २३६)

(१४०-९)

१ २ — १ २ र १र र २
हिहियऊऽ२ । (त्रिः) । उदपप्तम् । (त्रिः)। ऊर्ध्वानभाꣳस्यकृषि । (त्रिः)।
१ २र १ २ र र र १ २र १ २
व्यद्यौत्सम् । (त्रिः) । अततनम् । (त्रिः) । हाउहाउहाउ । यद्वर्च्चोहिरण्य ।
१ २र१ २र १ र २ १ २ १ २ १ २र१ १र २र १ २र
स्या ॥ यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साइ । हिहियऊऽ२ (त्रिः)। उदपप्तम् । (त्रिः) । ऊर्ध्वानभाꣳस्यकृषि । (त्रिः) । व्यद्यौत्सम् । (त्रिः) । अततनम् । (त्रिः) । हाउहाउहाउ । वा । ए । उदपप्तमूर्ध्वानभाꣳस्कृषिव्यद्यौत्समततनम् । (द्वे-त्रिः) । एऽ३ । पिन्वस्वाऽ२३४५ ॥

(दी.५०। प.४९ । मा.३५)९(भु । २३७)

(१४०-१०)
हाउहाउहाउ । प्रथे । (त्रिः) । प्रत्यष्ठाम् । (त्रिः) । हाउहाउहाउ । यद्वर्च्चोहिरण्य । स्या ॥ यद्वावर्च्चोगवामु । ता ॥ सत्यस्यब्रह्मणोव । चाः ॥ तेनमासꣳसृजाम । साइ । हाउहाउहाउ । प्रथे । (त्रिः)। प्रत्यष्ठाम् । (त्रिः)। हाउहाउहाउ । वा । ए । प्रथेप्रत्यष्ठाम् । (द्वे-त्रिः)। ए । अहꣳसुवर्ज्योतीऽ२३४५ः ॥

(दी.४०। प.३३। मा.२४)१०(वी । २३८)

॥ दश सप्तमः खण्डः ॥७॥

॥ कश्यपव्रतं दशानुगानम् । कश्यपो गायत्रीन्द्र ॥

(१४१-१)
हाउहाउहाउ । हाऽ२इ । ऊऽ२ । (द्वे-त्रिः) । काह्वह्वह्वह्वह्व । (त्रिः) । हाऽ२इ । ऊऽ२ । ऊऽ२ । * ऊऽ२ । (चत्वारि-त्रिः) । काह्वह्वह्वह्वह्व । ऊऽ२ । (द्वे-त्रिः) । हाउहाउहाउ । यस्येदमारजोयूऽ२जाः ॥ तुजेजनेवनꣳसूऽ२वाः ॥ हाउहाउहाउ । हाऽ२इ । ऊऽ२ । (द्वे-त्रिः) । काह्वह्वह्वह्वह्व । (त्रिः) । हाऽ२इ । ऊऽ२ । ऊऽ२ । *ऊऽ२ । (चत्वारि-त्रिः) । काह्वह्वह्वह्वह्व । ऊऽ२ । (द्वे-त्रिः) । हाउहाउहाउ । आइन्द्रस्यर ॥ तियाऽ३म्बृऽ५हाऽ६५६त् ॥ नमःसुवरिडाऽ२३४५ ॥

(दी.१७। प.६३ । मा.२८)११(जै । २३९)

॥ काश्यपग्रीवा कश्यपोनुष्टबिन्द्रः ॥

(१)
हाउहाउहाउ ॥ अहोअहो । अहो । आहोआहो । आहो ॥ एहोएहो ॥ एहो । वाऽ३ । हाउवाऽ३ ॥ प्रजाभूतमजीजनेऽ३ । इट्(स्थि)इडाऽ२३४५ ॥

(दी.६ । प.११ । मा.८)१२(कै । २४०)

---

* करुणाश्रुतिचिह्नमिदम् ॥ *॥ क्रुष्ट मिदम् ॥*

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१४२-१) ॥ कश्यपं व्रतं दशानुगानम् । कश्यपस्त्रिस्टुबिन्द्रः ॥

२र र र १ २ र र र
हाउहाउहाउ । फाल्फल्फल्फल्फल्फल् । (त्रिः)। हाउहाउहाउ ।
१ रर र —१ रर र —१ र र र र
इन्द्रन्नरोनेमधिताहवाऽ२न्ताइ ॥ यत्पार्यायुनजतेधियाऽ२स्ताः ॥ शूरोनृषाता-
—१ र र र र —१ २र र र १
श्रवसश्चकाऽ२माइ ॥ आगोमतिव्रजेभजातुवाऽ२न्नाः । हाउहाउहाउ । फाल्फल्-
२ १ १११
फल्फल्फल्फल् । (त्रिः) । हाउहाउहाउ । वा ॥ मनःसुवरिडाऽ२३४५ ॥

(दी.२३ । प.१६ । मा.५२)१३(टा । २४१)

(१४३-१)
२र र र १ र२रररर र र र
हाउहाउहाउ । हाउहौहौहौहौहौ । (त्रिः) । हाउहाउहाउ ।
१र र र —१ रर र —१ २१र र
योनोवनुष्यन्नभिदातिमाऽ२र्त्ताः ॥ उगणावामन्यमानस्तुरोऽ२वा ॥ क्षिधीयुधा-
र र — १ २१र र — १ २र र र
शवसावातमाऽ२इन्द्रा ॥ अभीष्यामवृषमणस्त्वोऽ२ताः । हाउहाउहाउ ।
१ र२रररर र१ १११
हाउहौहौहौहौहौ । (त्रिः) । हाउहाउहाउ । वा ॥ एवयःसुवरिडाऽ२३४५ ॥

(दी. ५२ । प.१६ । मा.२१)१४(च । २४२)

(१) ॥ प्रजापतेर्हृदयं कश्यपोऽनुष्टुप्प्रजापतिः ॥

२र र र १र र र२र १
हाउहाउहाउ । इमाः । (त्रिः)। प्रजाः । (त्रिः) । प्रजापते । होइ । (द्वे-द्विः) ॥
र२र — र १ २ र १ २
प्रजापते । हाऽ३१उ । वाऽ२ ॥ ए । हृदयम् । (द्वे-द्विः) । ए । हृदयाऽ३१उ ।
— १रर २र १ १११
वाऽ२ ॥ प्रजारूपमजीजनेऽ३ । इट्(स्थि)इडाऽ२३४५ ॥

(दी.२१ । प.२३ । मा.१६)१५(गू । २४३)

(१) ॥ इडानां संक्षारः । (षष्ठः) ॥ कश्यपोऽनुष्टुप्प्रजापतिः ॥

२र र र १र र
हाउहाउहाउ । इडा । (त्रिः)। सुवः ॥ (त्रिः)। ज्योतिः । ज्योतिः ॥
३र २ ५रर २र १र र ३ १११
ज्योताऽ३४ । औहोवा ॥ ए ॥ इडासुवर्ज्योतीऽ२३४५ः॥

(दी.१४ । प.१३ । मा.९)१६(दो । २४४)

॥ कश्यपव्रतं दशामुगानम् ॥ कश्यपस्त्रिष्टुबिन्द्रः ॥

(१४४-१)
२र र र १ २ १ २ १ २ १ २ ^ २र र र
हाउहाउहाउ । आइही । (३) । ओहा । ओहा । ओहाऽ३ । हाउहाउहाउ ।
१ —१ र — ११ २र१
सहस्तन्नइन्द्रध्योऽ२जाः । आयाऽ२उ । *ऊ । आयाउ ॥ (त्रीणि-त्रिः) ।
र र र —१ र — ११ २र१
ईशेह्यस्यमहतोविराऽ२प्शाइन् । आयाऽ२उ । *ऊ । आयाउ ॥ (त्रीणि-त्रिः) ।

(साम-तन्त्र-सूत्राणि) (२४१)१३ (२४२)१४ (२४३)१५ (२४४)१६ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रतुन्ननृम्णꣳस्थविरञ्चवाऽ२जाम् । आयाऽ२उ । *ऊ । आयाउ ॥ (त्रीणि-त्रिः) । वृत्रेषुशत्रून्सुहनाकृधाऽ२इनाः । आयाऽ२उ । *ऊ । आयाउ ॥ (त्रिः) । हाउहाउहाउ । आइही । (त्रिः) ओहा । ओहा । ओहाऽ३ । हाउहाउहाउ । वा ॥ ए । आयुर्धाअस्मभ्यंवर्च्चोधादेवेभ्याऽ२३४५ः ॥

(दी.४६। प.५९ । मा.५१)१७(घ । २४५)

(१४५-१) ॥ गवां व्रते द्वे गावस्त्रिष्टुप् गावः ॥

हाउहाउहाउ । (त्रिः) । तेमन्वतप्रथमन्नामगो । नाम् । (त्रिः) । हाउहाउहाउ । त्रिस्सप्तपरमन्नामजा । नान् । (त्रिः) । हाउहाउहाउ । ताजानतीरभ्यनूषता । क्षाः ।(त्रिः) । हाउहाउहाउ । आविर्भूवन्नरूणीर्यशसागा । वाः । (त्रिः) । हाउहाउहाउ । वा ॥ ए । दुघाः । (द्वे-द्विः) । ए । दुघाऽ२३४५ः ॥

(दी.२७। प.२८। मा.३०)१८(जौ । २४६)

(१४६-१) ॥ सभासत्साम् । गावस्त्रिष्टुब्गावः ॥

हाउहाउहाउवा । सहर्षभास्सहवत्साउदेत ॥ हाउहाउहाउवा । विश्वारूपाणिविभ्रतीर्द्व्यूध्नीः ॥ हाउहाउहाउवा । उरूःपृथुरयंवोअस्तुलोकः ॥ हाउहाउहाउवा । इमाआपःसुप्रपाणाइहस्त । हाउहाउहाउवा । अश्वमिष्टयेऽ३हस् ॥

(दी.१५ । प.१०। मा.२२)१९(मा । २४७)

(१४७-१) ॥ कश्यप पुच्छम् दशमम । कश्यपस्त्रिष्टुबिन्द्रोऽग्निर्वा ॥

हाउहाउहाउ । वाग्घहहहह । (त्रिः) । ऐहीऽ२ । (त्रिः) । ऐहिहाउवाक् । (त्रिः) । हाहाउ । (त्रिः) । हाउहाउहाउवा । प्रजातोकमजीजनेहस् । इहाऽ२३४५ । हाउहाउहाउ । वाग्घहहहह । (त्रिः) । ऐहीऽ२ । (त्रिः)। ऐहिहाउवाक् । (त्रिः) । हाहाउ । (त्रिः) । आयाउ । (त्रिः) । अग्निरस्मिजन्मनाऔऽ३हो । हाऽ२इया । औऽ३हो । हाऽ२इया । औऽ३होऽ३ ॥ हाउहाउहाउ । वाग्घहहहह । (त्रिः) । ऐहीऽ२ । (त्रिः) ऐहिहाउवाक् । (त्रिः) । हाहाउ । (त्रिः)। हाउहाउहाउवा । इहप्रजामिहरयिꣳरराणोहस् । इहाऽ२३४५ । हाउहाउहाउ । वाग्घहहहह ।(त्रिः)।

(साम-तन्त्र-सूत्राणि) (२४५)१७ (२४६)१८ (२४७)१९ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऐही२ । (त्रिः) । ऐहिहाउवाक् । (त्रिः) हाहाउ । (त्रिः) । आयाउ । (त्रिः) ।
जातवेदाऔऽ३हो । हाऽ२इया । औऽ३हो । हाऽ२इया । औऽ३होऽ३ ।
हाउहाउहाउ । वाग्घहहहह । (त्रिः)। ऐहीऽ२ । (त्रिः)। ऐहिहाउवाक् । (त्रिः)।
हाहाउ । (त्रिः) । हाउहाउहाउवा । रायस्पोषायसुकृतायभूयसेहस् । इहाऽ२३४५ ।
हाउहाउहाउ । वाग्घहहहह । (त्रिः) । ऐहीऽ२ । (त्रिः) । ऐहिहाउवाक् ।
(त्रिः) । हाहाउ । (त्रिः) । आयाउ । (त्रिः) । घृतम्मेचक्षुरमृतंमआसानौऽ३हो ।
हाऽ२इया । औऽ३हो । हाऽ२इया । औऽ३होऽ३ । हाउहाउहाउ । वाग्घहहहह ।
(त्रिः) । ऐहीऽ२ । (त्रिः) । ऐहिहाउवाक् । (त्रिः) । हाहाउ । (त्रिः) ।
हाउहाउहाउवा । आगन्वाममिदंबृहद्धस् । इहाऽ२३४५ । हाउहाउहाउ ।
वाग्घहहहह । (त्रिः)। ऐहीऽ२ । (त्रिः)। ऐहिहाउवाक् । (त्रिः) । हाहाउ ।
(त्रिः)। आयाउ । (त्रिः) । त्रिधातुरर्कोरजसोविमानाऔऽ३हो । हाऽ२इया ।
औऽ३हो । हाऽ२इया । औऽ३होऽ३ ॥ हाउहाउहाउ । वाग्घहहहह । (त्रिः) ।
ऐहीऽ२ । (त्रिः)। ऐहिहाउवाक् । (त्रिः) । हाहाउ । (त्रिः) । हाउहाउहाउवा ।
इदंवाममिदंबृहद्धस् । इहाऽ२३४५ । हाउहाउहाउ । वाग्घहहहह । (त्रिः) ।
ऐहीऽ२ । (त्रिः) । ऐहिहाउवाक् । (त्रिः)। हाहाउ । (त्रिः) । आयाउ । (त्रिः) ।
अजस्त्रंज्योताइरौऽ३हो । हाऽ२इया । औऽ३हो । हाऽ२इया । औऽ३होऽ३ ॥
हाउहाउहाउ । वाग्घहहहह ।(त्रिः)। ऐहीऽ२ । (त्रिः) । ऐहिहाउवाक् । (त्रिः) ।
हाहाउ । (त्रिः)। हाउहाउहाउवा । चराचरायबृहतइदंवाममिदंबृहद्धस् ।
इहाऽ२३४५ । हाउहाउहाउ । वाग्घहहहह । (त्रिः) ऐहीऽ२ ।(त्रिः)।
ऐहिहाउवाक् ।(त्रिः) । हाहाउ । (त्रिः) । आयाउ । (त्रिः) हविरस्मिसर्वामौऽ३हो ।
हाऽ२इया । औऽ३हो । हाऽ२इया । औऽ३होऽ३ । हाउहाउहाउ । वाग्घहहहह ।
(त्रिः) ऐहीऽ२ । (त्रिः) ऐहिहाउवाक् । (त्रिः)। हाहाउ। (त्रिः)। हाउहाउहाउवा ॥
एयशोक्रान्भूतमततनत्प्रजाउसमचूकुत्पशुभ्योहस् । इहाऽ२३४५ ॥

(दी. १९१ । प.२३८ । मा.२२१)२०(ग । २४८)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१) ॥ आनडुदृते द्वे । प्रजापतिरनुष्टुबिन्द्रः ॥

१ — १ र र

इतीऽ२इति । (त्रिः) । इतिमात्राचरतिवत्सकाऽ२इति । (द्विः) ॥ इतिमात्रा-

१ ३ ५र र र १ र १

चरतिवत्सकाऽ२३ः । आऽ२इ । ताऽ२३४ । औहोवा ॥ ए । इति । ए । इति ।

२र १ ३ १ १ १

ए । इतीऽ२३४५ । (दी. ११ । प.१५ । मा.७)२१(ङे । २४९)

(२) ॥ अभिनिह्वमेतदनडुदृतं वा ॥

२ १ २ १ — २ १ २ १ —

स्वयःस्कुन्वाइ । स्वयःस्कुन्वाऽ२इ । स्वयःस्कुन्वाइ । स्वयःस्कुन्वाऽ२इ ।

१ २ १ ३ ५र र २र १ र

स्वयःस्कुन्वाइ । स्वयम् । स्कूऽ२ । न्वाऽ२३४ । औहोवा ॥ ए । स्कुन्वे ।

२र १ र २र १ १ १ १

ए । स्कुन्वे । ए । स्कुन्वाऽ२३४५इ ॥

(दी.७। प.१५ । मा.७)२२(ञे । २५०)

(वाचोव्रतपर्वणि ८४ सामानि)

॥ द्वादशाष्टमः खण्डः ॥८॥

॥ इति आरण्यकगाने पञ्चमः प्रपाठकः ॥५॥

॥ इति (वाचो) व्रतपर्वनाम तृतीयं पर्व समाप्तम् ॥

॥ इति पञ्चमं गानं समाप्तम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ शुक्रिय-पर्व

(१४८-१) ॥ अग्नेर्व्रतम् । अग्निर्गायत्र्यग्निः ॥

हाउहाउहाउ । भ्राजाओवा (त्रिः)। अग्निर्मूर्द्धादिऽ३वाः२काऽ१कूऽ२त् ॥ पतिः२पृथीवी-ऽ३याआऽ१याऽ२म् ॥ अपाꣳरेताꣳसिऽ३जाइन्वाऽ१तीऽ२३ ॥ हाउहाउहाउ । भ्राजाओवा ।(द्विः)।भ्राजाऽ३ओऽ५वाऽ६५६ ॥ ए । विश्वस्यजगतोज्योतीऽ२३४५ः ॥

(दी.३६ । प. १३ । मा.१७)१(गे । २५१)

(१४९-१) ॥ वायोर्व्रतम् । वायुरत्यष्टिःसोमः ॥

भ्राजा । (द्विः) । भ्राजाऽ३१उ । वाऽ२ । अयारुचाहरिण्यापुनानः ॥ विश्वाद्वेषाꣳ-सितरतिसयुग्वभिः । सूरोनसयुग्वभिः । धारापृष्ठस्यरोचते । पुनानोअरुषोहरिः॥ विश्वायद्रूपापरियास्यृक्वभिः ॥सप्तास्येभिर्ऋक्कभिः। भ्राजा । (द्विः)। भ्राजाऽ३१उ । वाऽ२ ॥ ए । विश्वस्मैजगतेज्योतिः । ज्योऽ२ताऽ२३४ओहोवा॥ इट्(स्थि)-इडाऽ२३४५ ॥

(दी.३४ । प. १९। मा.१२)२(धा । २५२)

(१५०-१) ॥ महावैश्वानर व्रते द्वे । वैश्वानरो जगती वैश्वानरः ॥

हाउहाउहाउ । ओहा । (द्विः) । ओहाइ । वयोहोइ । (त्रिः) । पयोहोइ । (त्रिः)। चक्षुर्होइ ।(त्रिः)। श्रोत्रꣳहोइ । (त्रिः) । आयुर्होइ । (त्रिः) । तपोहोइ । (त्रिः)। वर्चोहोइ । (त्रिः)। तेजोहोइ । (त्रिः)। सुवर्होइ । (त्रिः)। ज्योतिर्होइ । (त्रिः)। प्रक्षस्यवृष्णोअरुषस्यनूमाऽ२३हाः ॥ प्रनोवचोविदथाजातवेदाऽ२३साइ ॥ वैश्वानरायमतिर्न्नव्यसेशूऽ२३चीः ॥ सोमइवपवतेचारुरग्राऽ२३याऽ३इ । हाउहाउ-हाउ । ओहा ।(द्विः)। ओहाइ । वयोहोइ । (त्रिः)। पयोहोइ । (त्रिः)। चक्षुर्होइ। (त्रिः)। श्रोत्रꣳहोइ ।(त्रिः)। आयुर्होइ । तपोहोइ ।(त्रिः)। वर्चोहोइ ।(त्रिः)। तेजोहोइ । (त्रिः) । सुवर्होइ । (त्रिः) । ज्योतिर्होइ (द्विः) । ज्योतिर्होऽ२ । वाऽ२३४औहोवा ॥ ए । अग्निःसमुद्रमाक्षयत् । ए । अग्निर्मूर्धामवद्दिवः । ए । आयुर्द्धा-अस्मभ्यंवर्चोधादेवेभ्याऽ२३४५ः ॥

(दी. १०० । प. ७९ । मा. १०८)३(मै । २५३)

(साम-तन्त्र-सूत्राणि) (२५१)१ थि ८.५.१०; (२५२)२ उणोष्ठ्येन्तस्थि १३.३.३०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१५१-१) ॥ वैश्वानरो बृहती वैश्वानरः ॥

२ २र १ २र १ २र १र र
ओऽ३१म् । (त्रिः) । आयूः । (त्रिः) । ज्योतीः । (त्रिः) । ज्योतोवा । (त्रिः) ।
२र १र र २ र १र न २ १ २र र १र २ १ २र
ज्योतोवाहाइ । (द्विः) । ज्योतोवाऽ३हाउ । वा । इहस्वर्वैश्वानरायप्रदिशो-
१र २ १ २ १ र २ १ २ १ २ १ २ १र र
ज्योतिर्बृहत् । इन्दुरिडासत्यम् । सत्यम् । सत्यम् । सत्योवा । (त्रिः) ।
२ १र र २ १र न २ १ २र र १र २ १ २र १र २१
सत्योवाहाइ । (द्विः) । सत्योवाऽ३हाउ । वा । इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत् ।
२र र र र १र र २ १र र २
कायमानोवनातुवाम् । तुवाम् । तुवाम् । तुवोवा । (त्रिः) । तुवोवाहाइ । (द्विः)।
१र न २ १ २र र १र २ १ २र १र २ १ र २र१ २ १र
तुवोवाऽ३हाउ । वा । इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत् ॥ द्यौर्भूतंपृथिवी ।
२ १र २ १र र २ १र र २ १र न २
पृथिवी । (द्विः) । पृथिव्योवा । (त्रिः) । पृथिव्योवाहाइ । (द्विः)। पृथिव्योवाऽ३हाउ ।
१ २र र १र २ १ २र १र २१ २ र र
वा । इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत् । यन्मातृरजगन्नपाः । अपाः । अपाः ।
१र र २ १र र २ १र न २
अपोवा । (त्रिः)। अपोवाहाइ । (द्विः) । अपोवाऽ३हाउ । वा ।
१ २र र १र २ १ २र १र २१ २ १र २ १र२ १र २ १र २र१र र
इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत् ॥ सहस्तेजआपः । आपः । आपः । आपोवा ।
२र १र र २ र १र न २ १ २र र
(त्रिः) आपोवाहाइ । (द्विः) । आपोवाऽ३हाउ । वा । इहस्वर्वैश्वा-
१र २ १ २र १र २ १ २ र र र
नरायप्रदिशोज्योतिर्बृहत् । नतत्तेअग्नेप्रमृषेनिवर्तनाम् । तनाम् । तनाम् ।
१र र २ १र र २ १र न २
तनोवा (त्रिः) । तनोवाहाइ । (द्विः) । तनोवाऽ३हाउ । वा ।
१ २र र १र २ १ २र १र २ १ र र र र
इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत् ॥ उषादिशोज्योतिः । ज्योतिः । ज्योतिः ।
२र १र र २र १र र २ र १र न २
ज्योतोवा । (त्रिः)। ज्योतोवाहाइ । (द्विः) । ज्योतोवाऽ३हाउ । वा ।
१ २र र १र २ १ २र १र २१ २ र र र
इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत् । यद्दूरेसन्निहाभुवाः । भुवाः । भुवाः ।
१र र २ १र र २ १र न २
भुवोवा । (त्रिः) । भुवोवाहाइ । (द्विः) । भुवोवाऽ३हाउ । वा ।
१ २र र १र २ १ २र १र २१ २ २र१
इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत् । ओऽ३१म् । (त्रिः)। आयूः ।(त्रिः) ।
२र १ २र १र र २र १र र २ २र १र न २
ज्योतीः ।(त्रिः)। ज्योतोवा ।(त्रिः) । ज्योतोवाहाइ । (द्विः) । ज्योतोवाऽ३हाउ ।
१र २र १ १ १ १
वा ॥ घर्मोमरुद्भिर्भुवनेषुचक्रदत् । इट्(स्थि)इडाऽ२३४५ ॥

(दी. २२० । प. १२३ । मा. ८२)४(वा । २५४)

(साम-तन्त्र-सूत्राणि)(२५३)३ (पृथक् सूत्राणि न सन्ति) (२५४)४ तमः पृ थौ १३.२.२; रुदोभिः १३.५.१०; आपस्सगि १३.६.६;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१५२-१)　॥ सूर्यस्य भ्राजा भ्राजे द्वे, (भ्राजम्) । द्वयोः सूर्यों गायत्र्यग्निः ॥

भ्राजा ।(द्विः)। भ्राजाऽ३१उ । वाऽ२ । अग्नआयूंःषिपवसे ॥ आसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनाम् ॥ भ्राजा ।(द्विः)। भ्राजाऽ३१उ । वाऽ२ ॥ ए । भ्राज । (द्वे-त्रिः) ॥

(दी. २१ । प. १७ । मा. ५)५(खु । २५५)

(१५३-१)　॥ आभ्राजम् ॥

आ । भ्राज । (द्वे-त्रिः) । अग्निर्मूर्द्धादिऽ३वा४काऽ१कूऽ२त् ॥ पतिः४पृथीविऽ३-याआऽ१याऽ२म् ॥ अपांःरेतांःसिऽ३जाइन्वाऽ१तीऽ२ ॥ आ । भ्राज । (द्वे-द्विः) । आ । भ्राजाऽ३उवा ॥ ए । आभ्राज । (द्वे-त्रिः) ॥

(दी. २१ । प. २१ । मा. ५)६(कु । ३५६)

(१५४-१)　॥ वायोर्विकर्णभासे द्वे, वायुर्जगती सूर्यः ॥

हाहाउ । (त्रिः) । इडा । (त्रिः) । हस् । (त्रिः) ऋतम्मे । (त्रिः) ।विभ्राड्बृहत्पिबतु-सोमियाऽ२म्माधूऽ२ । आयुर्द्दधद्यज्ञपतावावाऽ२इह्रुताऽ२म् ॥ वातजूतोयोअभिरक्षता-ऽ२इत्मानाऽ२ ॥ प्रजाःपिपर्तिबहुधाविराऽ२जातीऽ२ । हाहाउ । (त्रिः) इडा ॥ (त्रिः) । हस् । (त्रिः) । ऋतम्मे । (त्रिः) । औहोवाहाउ । वा ॥ फाऽ२श् । ऋतम्मे । (त्रिः) । औहोवाहाउ । वा ॥ फाऽ२ट् । ऋतम्मे । (त्रिः) । औहोवाहाउ । वा । भ्राऽ२ट् ॥

(दी.३४ । प.४३ । मा.२२)७(दा । २५७)

(१५५-१)　॥ भासम् । वायुः जगती वैश्वानरः ॥

हाउहाउहाउ । ओहा । (द्विः) । ओहाइ । इहौहो । (त्रिः) । इहियो । (त्रिः)। हिम् । (त्रिः) । हो । (त्रिः) हंः । (त्रिः) । इडा । (त्रिः) । ऋतम्मे । (त्रिः) । हस् । (त्रिः) । प्रक्षस्यवृष्णोअरुषस्यनूमाऽ२३हाः ॥ प्रनोवचोविदथाजा-तवेदाऽ२३साइ ॥ वैश्वानरायमतिनेव्यसेशूऽ२३चीः ॥ सोमइवपवतेचा-रुरग्नाऽ२३याऽ३इ । हाउहाउहाउ । ओहा । (द्विः) । ओहाइ । इहौहो । (त्रिः) । इहियो । (त्रिः) हिम् (त्रिः) हो । (त्रिः) । हंः (त्रिः) । इडा । (त्रिः)। ऋतम्मे । (त्रिः) । हस् । (द्विः) । हाऽ२३४ । औहोवा ॥ इहौहो ॥ भद्रम् ।

(साम-तन्त्र-सूत्राणि) (२५५)५ (पृथक् सूत्राणि न सन्ति) (२५६)६ पूर्वाद्वैव १३.७.४; त्रिरुक्तस्य शुक्रियेष्वरे १३.१०.३; (२५७)७ मे हसि च १३.३.४; डन् १३.१०.४; स्वारेविकर्णे १३.११.१;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र २र   १र २   १ र २र   २र १   र २र   १ २   १ र २र   १
इहौहो । श्रेयः । इहौहो । वामम् । इहौहो । वरम् । इहौहो । सुवम् ।
र २र   १ २   १ र २र   १ र २र   १ र २र   १र   २ र र
इहौहो । अस्ति । इहौहो । अभ्राजीत् । इहौहो । ज्योतिः । अभ्राजीत् ।
१ र २र   १र २   १   र २   १ १ १
इहौहो । दीदिवः । एऽ२३ । हियाहाउवाऽ३ ॥ भाऽ२३४५स् ॥

(दी. ७९ । प. ८३ । मा. ३६)८(दू । २५८)

(१) ॥ ऐन्द्रं महादियाकीर्त्यं दशानुगानं शिरोनाम प्रथमानुगानम् ॥

२र र र र   १र   र   ३र २   ५र र
हाउहाउहाउ । आयुः । (त्रिः) । ज्योतिः । (द्विः) । ज्योताऽ३४ । औहोवा ॥
२   १र र ३ १ १ १
एऽ३ । वाग्ज्योती२३४५ः ॥ (दी.१३ । प.१० । मा.९)९(णो । २५९)

(२) ॥ ग्रीवानाम द्वितीयानुगानम् ॥

२र र र ३   ५र र   २र   र   ५र र
एवाहियेवाऽ२३४औहोवा । हुं(स्थि)हुंहुं(स्थि)हुंहुंऽ३४ । औहोवा ।
२ र १   २   १   २   १   २ र १   २ र१   १ १ १
(त्रीणि-त्रिः)। हियेवा । हियग्नाइ । हिइन्द्रा । हिपूषान् । हिदेवाऽ२३४५ः ॥

(दी. ३० । प. १४ । मा.१३)१०(भि । २६०)

(३) ॥ स्कन्धोनाम तृतीयानुगानम् ॥

२ र र   १ २   १ २   र र र   र १ २
वयोमनोवयः प्राणाः । वयश्चक्षुर्वयःश्रोत्राम् । वयोघोषोवयोव्राताम् ।
१   र २   १ १ १
वयोऽ२३भूताउ । वाऽ३ ॥ ईऽ२३४५ ॥ (दी० ७ । ६ ।मा० ४) ११(त्री ।२६१)

॥ कीकसोनामचतुर्थानुगानम् ॥

२ र१   १   २ ^ ३   ५   २   ५र   १   २   ३   ५
(४) वयोमनाऽ२३ः । होइहौवाओऽ२३४वा । वयः प्राणाऽ२३ः । होइहौवाओऽ२३४वा।
२   १   १ २ ^ ३   ५   २ १र   १   २   ३   ५
वयश्चक्षूऽ२३ः । होइहौवाओऽ२३४वा । वयःश्रोत्राऽ२३म् । होइहौवाओऽ२३४वा।
२ र १र   १ २ ^ ३   ५   २ र१   १   २   ३   ५
वयोघोषाऽ२३ः । होइहौवाओऽ२३४वा । वयोव्रताऽ२३म् । होइहौवाओऽ२३४वा ।
२ र१र   १ २ ^ ३   ३   १ १ १
वयोभूताऽ२३म् । होइहौवाओऽ२३४५वाऽ६५६ ॥ ऊऽ२३४५ ॥

(दी. ८ । प. १५ । मा. २१)१२(र्ण । २६२)

(५) ॥ पक्षोनाम पञ्चमानुगानम् ॥

१ प   २र र र   २   १ प   २र र र
ऊऽ२र्क् । हाउहाउहाउ । होऽ३वाक् ॥ ऊऽ२र्क् । हाउहाउहाउ ।
२   २   १प   २र र र   २   २   १ विर   १   १विर   १
होऽ३वाक् । ऊऽ२र्क् । हाउहाउहाउ । होऽ३वाक् । धर्मोऽ२धर्मः । धर्मोऽ२धर्मः ।
१ विर   १
धर्मोऽ२धर्मः ॥

(दी.१२ । प. १२ । मा.१८)१३(छै । २६३)

(साम-तन्त्र-सूत्राणि) (२५८)८(२५९)९ (२६१)११ (२६२)१२(पृथक् सूत्राणि न सन्ति)(२६०)१० हुंग्मे ८.६.१; (२६३)१३ अचुधात् त्रीणि व्यन् १३.७.९; त्रयाणामचम् १३.९.९;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(६) ॥ तवश्यावीयम्, । पक्षोनाम षष्ठानुगानमपि ॥

१ २ १ २   १ र २   १ २   १वि
धर्मविधर्म । (त्रिः) । सत्यंगाय । (त्रिः) । ऋतंवद । (त्रिः)। हंवंवऽ२म्-
१वि १
वंवऽ२म्-वम् ॥ (त्रिः)॥ (दी.३ ।प.१२ ।मा.३)१४(ठि । २६४)

(१५६-७) ॥ महादिवाकीर्त्यं आत्मा नाम सप्तमानुगानम् ॥

२र र १र र   २र र १र र २   ५   ५
औहौहोवाहोइ । (द्विः) । औहौहोवाहाऽ३१उ । वाऽ२३ । भूऽ२३४वात् ।
२ १र २ १ २ र १   २र र १र र   २र र१र र   २र र१र र २
विभ्राड्बृहत्पिवतुसोम्यंम । ध्वौहौहोवाहोइ । औहौहोवाहोइ । औहौहोवाहाऽ३१उ ।
५   १र२ १ २ २ १   २र १   २   २र र १र र
वाऽ२३ । जाऽ२३४नात् । आयुर्दधद्यज्ञपतावविह्रुतम् ॥ औहौहोवाहोइ ।
२र र१र र २   ५   १र २र र १र   २
(द्विः)। औहौहोवाहाऽ३१उ । वाऽ२३ । वाऽ२३४र्द्धात् । वातजूतोयोअभि-
१ २ १ र   २र र १र र   २र र १र र र २
रक्षतित्मना ॥ औहौहोवाहोइ । (द्विः)। औहौहोवाहाऽ३१उ । वाऽ२३ ।
५   २ १र २ १र र २   र र १र र
काऽ२३४रात् । प्रजाःपिपर्तिबहुधाविराजति । औहौहोवाहोइ । (द्विः) ।
र र १र र २   र १र २र १र २ र ३ १ १ १
औहौहोवाहाऽ३१उ । वाऽ२ ॥ ए । अभ्राजीज्योतिरभ्राजीऽ२३४५त् ॥

(दी. ७७ । प. ३० । मा. २२)१५(ञा । २६५)

(८) ॥ ऊरूनाम अष्टवमानुगानम् ॥

१र   २ १ २   ५   २   ५र र
भूमिः । (त्रिः) । अन्तरिक्षम् । (त्रिः) । द्यौः । (द्विः) । द्याऽ३४ । औहोवा ॥
२ ^   २र १र   १ १ १
एऽ३ । भूतायाऽ२३४५ ॥ (दी. ७। प. १२ । मा. ८)१६(छै । २६६)

(९) ॥ ऊरूनाम नवमानुगानम् ॥

१   २ १ २   १र   ३र २   ५र र
द्यौः । (त्रिः) । अन्तरिक्षम् । (त्रिः) । भूमिः । (द्विः) । भूमाऽ३४ । औहोवा ॥
२   १र ३ १ १ १
एऽ३ । आयुषेऽ२३४५ ॥ (दी.६ । प.१२ । मा. ८)१७(खै । २६७)

(१०) ॥ पुच्छंनाम दशमानुगानम् ॥

२र र र   १र   ३र २   ५र र   ३   १ १ १
हाउहाउहाउ । ज्योतिः । (द्विः) । ज्योताऽ३४ । औहोवा ॥ ईऽ२३४५ ॥

(स्व. ८। प.६ । मा.५)१८(टू । २६८)

(१) ॥ एकविशत्यनुगाने आदित्यव्रतम् । एतत्साम सुपर्णमित्याचक्षते ॥

१ र २र१र र २   १   र र२र   १   र २   १ र२
सन्त्वाभूतान्यैरयन् । होइ ॥ सन्त्वाभव्यान्यैरयन् । होइ ॥ सन्त्वाभविष्यदैरयत् ।
१   र २र   १   र२र१ र २   १
होइ ॥ सन्त्वाभुवनमैरयत् । होइ ॥ सन्त्वाभूतमैरयत् । होइ ॥

(दी. १४ । प. १० । मा. १०)१९(नौ । २६९)

॥ इवि आरण्यकगाने षष्ठस्यार्द्धः प्रपाठकः ॥

(साम-तन्त्र-सूत्राणि) (२६९)१९ धनायाम् १३.१०.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१५७-१५९-१) ॥ आदित्यव्रतम् ॥

उवीऽ२उवि । उविहोऽ२उवि । (द्वे-त्रिः) । इतीऽ२इति । इतिहोऽ२इति । (द्वे-त्रिः)। असीऽ२असि । असिहोऽ२असि । (द्वे-त्रिः) । अरूरुचोदिवंपृथिवीम् । असीऽ२असि । असिहोऽ२असि । (त्रीणि-त्रिः) । पतिर । स्यपामोषधीनाऽ३म् । ओइ । पताइराऽ२३४सी । (चत्वारि-त्रिः) । चाइ । त्रंदेवानामुदगादनीकम् ॥ वाइश्वेषान्देवानाꣳसमिदजस्त्रंज्योतिराततऽ२म् । होइ । (द्वे-त्रिः) । आयुर्यन् । (त्रिः) । अवः । (त्रिः) । चक्षुर्मित्रस्यवरुणस्याग्नेः ॥ सुवस्सꣳ-सर्पसꣳसार्पा ।(त्रिः)। जनावनꣳसुवाऽ२ःसुवः । जनाऽ२वनाऽ२म् । सुवाऽ२ःसुवः । (त्रीणि-त्रिः) आप्राद्यावापृथिवीआन्तरीऽ२३क्षाऽ३म् । सृपिप्रसृपीऐही । (त्रिः) । अस्तोषतस्वभानवाऐही । विप्रानविष्ठयामताऐही । ग्रावाणोबर्हिषिप्रियाऐही । इन्द्रस्यरꣳहियंबृहादैही । इन्द्राऽ२ । स्यराऽ२ । हियाऽ२म् । बृहदिन्द्र-स्यरꣳहियंबृहादैही । (चत्वारि-त्रिः)। सूर्यआत्माजगतस्तास्थुषाऽ२३श्चाऽ३ । अन्तश्चरतिरोचनाऐही । (त्रिः) । अस्यप्राणादपानताऐही । (त्रिः) । व्यख्यन्महिषोदिवामैही । (त्रिः)। प्रोएतिप्रोएति । (त्रिः) । प्रो । एति । (द्वे-द्विः) । प्रोऽ२३ । एताऽ३४औहोवा ॥ एऽ३ । देवादिवाज्योतीऽ२३४५ः ॥

॥ **प्रथमः खण्डः** ॥ (दी. १६३। प.१०७। मा८९)१(ठो । २७०)

(१६०-१) ॥ गन्धवाप्सरसां आनन्दप्रतिनन्दौ द्वौ । द्वयोस्सूर्यो गायत्री सूर्यः ॥

उविऽ२ । (त्रिः) । हिंगिऽ२ । (त्रिः) । हिंगिगि । (त्रिः) । आयङ्गौःपृश्निरक्रमीदैही । (त्रिः)॥ असदन्मातरंपुराऐही (त्रिः) ॥ पितरंचप्रयन्त्स्वाऐही । (त्रिः) । उविऽ२ । (त्रिः)। हिंगिऽ२ । (त्रिः) । हिंगिगि । (त्रिः) ॥

(दी.३६ । प.२७ । मा.६)२(खू । २७१)

(१६०-२)

उवी । (त्रिः) । हिंगी । (त्रिः) । हिंगिगी । (त्रिः)। आयङ्गौःपृश्निरक्रमीदैही ॥ असदन्मातरंपुराऐही ॥ पितरंचप्रयन्त्स्वाऐही ॥ उवी । (त्रिः) । हिंगी ।(त्रिः) । हिंगिगी । (त्रिः) ॥ (दी. १२ । प. २७ । मा.२)३(चा । २७२)

(साम-तन्त्र-सूत्राणि)(१७०)१नान्तमौ द्वारशालायाम् १३.१०.१; (२७१)२ (२७२)३ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१६१-१६२-१) ॥ सौर्यातीषङ्गः । उदुत्यंगायत्रीचित्रंत्रिष्टुप्सूर्यः ॥

हाउहाउहाउ । भ्राजाओवा । (त्रिः) । उदुत्यआ । (त्रिः) । चित्रंन्देवानामुदगादनीऽ२३कांऽ३म् ॥ हाउहाउहाउ । भ्राजाओवा । (त्रिः) । तवेदसम् । (त्रिः)। चक्षुर्मित्रस्यवरुणास्यआऽ२३ग्राऽ३इः ॥ हाउहाउहाउ । भ्राजाओवा ।(त्रिः)। देवंवहा । (त्रिः) । आप्राद्यावापृथिवीआन्तरीऽ२३क्षाऽ३म् ॥ हाहाउहाउ । भ्राजाओवा । (त्रिः) तिकेतवः । (त्रिः) । सूर्यआत्माजगतस्तास्थुषाऽ२३श्चा३ ॥ हाउहाउहाउ । भ्राजाओवा । (त्रिः) । दृशेविश्वा । (त्रिः) । सूर्यआत्माजगतस्तास्थुषाऽ२३श्चाऽ३ ॥ हाउहाउहाउ । भ्राजाओवा । (त्रिः) । यसूर्यम् । (द्विः) । यसूऽ२३रियाउ । वाऽ३ ॥ एऽ३ ॥ देवादिवाज्योती२३४५ः ॥

(दी. १३६ । प. ५० । मा.५४)४(ङी । २७३)

(१) ॥ इन्द्रस्य सधस्थम् । इन्द्रोऽनुष्टुप्सूर्यः ॥

हाउहाउहाउ । सहोभ्राज । (द्विः) । सहोभ्राजा । पोभ्राजा । (द्विः) पोभ्राज । अभ्राजीत् । (त्रिः) । व्यभ्राजीत् ।(त्रिः)। अदिद्युतत् । (त्रिः) । अदिद्युतद्विश्वंभूतꣳ-सहोबृऽ२हात् ॥ अदिद्युतदभ्राट्प्राऽ२भ्राट् ॥ अदिद्युतद्धर्मोअरुरूऽ२चात् ॥ अदिद्युतद्घर्म्मउषसोअरोचाऽ२याः । हाउहाउहाउ । सहोभ्राज । (द्विः) । सहोभ्राजा । पोभ्राजा । (द्विः) । पोभ्राज । अभ्राजीत् । (त्रिः) । व्यभ्राजीत् । (त्रिः) । अदिद्युतत् । (द्विः) । अदिद्युताऽ३त् । हाउवा ॥ ए । अदिद्युतद्घर्मो-अरूरुचदुषसांदिविसूर्योविभातीऽ२३४५ ॥ (दी.७४ । प.३९मा.३३)५(धि । २७४)

(१६३-१) ॥ मरुतां भूतिसाम । मरुतो गायत्री सूर्यः ॥

औहोऔहोवा । होइ । (द्वे-द्विः) । औहोऔहोवा । हाऽ३१उ । वाऽ२३ । भूऽ२३४वात् । अन्तश्चरतिरोचना ॥ औहोऔहोवा । होइ । (द्वे-द्विः) । औहोऔहोवा । हाऽ३१उ । वाऽ२३ । जाऽ२३४नात् । अस्यप्राणादपानती ॥ औहोऔहोवा । होइ । (द्वे-द्विः) । औहोऔहोवा । हाऽ३१उ । वाऽ२३ । वाऽ२३४र्द्धात् । व्यख्यन्महिषोदिवम् ॥ औहोऔहोवा । होइ । (द्वे-द्विः) ।

(साम-तन्त्र-सूत्राणि) (२७३)४ (पृथक् सूत्राणि न सन्ति) (२७४)५ खिट् तौ तुडि १३.१.८; ज ९.७.५;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र र र र र र २ ५ १र र र र र र
औहोऔहोवा । हाऽ३१उ । वाऽ२३ । काऽ२३४रात् । औहोऔहोवा । होइ ।
र र र र र र २ ५ १र र र र र र
(द्वे-द्विः)। औहोऔहोवा । हाऽ३१उ । वाऽ२३ । भूऽ२३४तीः । औहोऔहोवा ।
र र र र र र २ १ र २र १र २ र र
होइ । (द्वे-द्विः) । औहोऔहोवा । हाऽ३१उ ॥ वाऽ२ । अभ्राजीज्ज्योतिरभ्राजीत् ।
१र र र र र र र र र र र र २
औहोऔहोवा । होइ । (द्वे-द्विः)। औहोऔहोवा । हाऽ३१उ । वाऽ२३ ॥
२ १ र र र२ र ३ १११
एऽ३ । सर्वान्कामानशीमहीऽ२३४५ ॥

(दी. १२१ । प.६०। मा.४९)६(ञो । २७५)

(१६४-१) ॥ सार्पराज्ञ्यानि त्रीणि । प्रजापतिर्गायत्री सूर्यः ॥

२ १ २र ३र २र ३र र २र र र र र
हाउहाउहाउवा । ईन्दूः । भ्राजाओवा । (त्रिः) । आयङ्गौः४पृश्निरक्रमीदैही ॥
१ २र ३र २र ३र र २ र र र र
हाउहाउहाउवा । ईडा । भ्राजाओवा । (त्रिः) । असदन्मातरंपुराऐही ॥
१ २र ३र २र ३र र २ र र र
हाउहाउहाउवा । सात्यम् । भ्राजाओवा । (त्रिः) । पितरंचप्रयन्त्स्वाऐही ॥
१ २
हाउहाउहाउवा ॥ दीयौः ॥

(दी.४८।प.२०।मा.२६)७ (णू। २७६)

(१६५-१)
१ २र ३र २र ३र र २ र र र र
हाउहाउहाउवा । भूतम् । भ्राजाओवा । (त्रिः)। अन्तश्चरतिरोचनाऐही ॥
१ २र ३र २र ३र र २ र र र र र र
हाउहाउहाउवा । पृथिवी । भ्राजाओवा ।(त्रिः)। अस्यप्राणादपानताऐही ॥
१ २र ३र २र ३र र २ र र र र
हाउहाउहाउवा । साहः । भ्राजाओवा ।(त्रिः)। व्यख्यन्महिषोदिवामैही ॥
१ २
हाउहाउहाउवा ॥ तेजः ॥ (दी.५१। प.२०। मा.२६)८(ङ्का २७७)

(१६६-१)
१ २र ३र २र ३र र २ र र र र र
हाउहाउहाउवा । आपः । भ्राजाओवा ।(त्रिः)। त्रिंशद्धामविराजताऐही ॥
१ २र ३र २र ३र र २र र र र र र
हाउहाउहाउवा । ऊषा । भ्राजाओवा ।(त्रिः)। वाक्पतङ्गायधीयताऐही ॥
१ २र ३र २र ३र र २ र र र र
हाउहाउहाउवा । (त्रिः) । दीशः । भ्राजाओवा । (त्रिः) । प्रतिवस्तोरहद्युभाऐही ॥
१ २
हाउहाउहाउवा । ज्योतिः ॥ (दी.५१ । प.२०। मा.२७)९(ङे । २७८)

(साम-तन्त्र-सूत्राणि) (२७५)६ न नि १३.२.१०; आवचु धान् १३.९.१; आदित्यव्रते कि च १३.२.९; (२७६)७ अन्धायाः १३.१०.६; अन्धायान्दी ९.७.१०; (२७७)८ अन्धायां वी १३.११.५; ती १०.४.१; (२७८)९ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१) ॥ सर्पस्य धर्मरोचनमिन्द्रस्य वा ॥ धर्मो (सर्पो)ऽनुष्टुप्सूर्यः ॥

२ १ र र २र १ २१र र र २र १ २ १र र २र

उद्यँल्लोकानरोचयः । होइ ॥ इमाँल्लोकानरोचयः । होइ ॥ प्रजाभूतमरोचयः ।

१ २र१ २र १ ३ ५र र २ १र र ३ १ १ १

होइ ॥ विश्वंभूतमरोचयः । होऽ२हाऽ२३४औहोवा ॥ घर्म्मोज्योतीऽ२३४५ः ॥

(दी.१६ । प.९। मा.९)१०(घो । २७९)

(१६७-६९-१) ॥ षडैन्द्राः परिधय ऋतूनां प्रथमं । इन्द्रो गायत्री सूर्यः ॥

२र र र ३र २र ३र र २ र १ २ १ २ र १

हाउहाउहाउ । भ्राजाओवा । (त्रिः)। दिदीहिविश्वतस्पृथुः । उदुत्यंजातऽ३वा-

२ र १ २ र र १ २

इदाऽ१साऽ२म् ॥ देवंहन्तिऽ३काइता१वाऽ२ः ॥ दृशेविश्वायऽ३सूराऽ१याऽ२म् ॥

र र १ २ र १ २

श्री ॥ अपत्येतायऽ३वोयाऽ१थाऽ२ । नक्षत्रायन्तिऽ३यात्कूऽ१भाऽ२इः ॥

र र १ २ १ २

सूरायविश्वऽ३चाक्षाऽ१साऽ२इ ॥ श्री ॥ अदृश्यन्नस्यऽ३काइताऽ१वाऽ२ः ॥

र १ २ र र १ २ २र र र

विरश्मयोजऽ३नाऽ२आऽ१नूऽ२ ॥ भ्राजन्तोअग्नऽ३योयाऽ१थाऽ२३ । हाउहाउहाउ ।

३र २र ३र र र २ ^ ४ ३ १ १ १

(त्रिः) । भ्राजाओवा । (द्विः) । भ्राजाऽ३ओऽ५वाऽ६५६ ॥ ईऽ२३४५ ॥

(दी.४०। प.१९। मा.२५)११(भ्रु । २८०)

॥ द्वितीयः खण्डः ॥२॥

(१६७-६९-२)

२र र र ३ २र ३र र २ र१ २ १ २ र १ २

हाउहाउहाउ । शुक्राओवा । (त्रिः) । दिदीहिविश्वतस्पृथुः । उदुत्यंजातऽ३वाइदा-

र १ २ र र १ २

ऽ१साऽ२म् ॥ देवंवहन्तिऽ३काइताऽ१वाऽ२ः ॥ दृशेविश्वायऽ३सूराऽ१याऽ२म् ॥

र र १ २ र १ २

श्री ॥ अपत्येतायऽ३वोयाऽ१थाऽ२ ॥ नक्षत्रायन्तिऽ३यात्कूऽ१ऽभाऽ२इः ॥

र र १ २ १ २

सूरायविश्वऽ३चाक्षाऽ१साऽ२इ ॥ श्री ॥ अदृश्रन्नस्यऽ३काइताऽ१वाऽ२ः ॥

र १ २ र र १ २ २र र र

विरश्मयोजऽ३नाऽ२आऽ१नूऽ२ ॥ भ्राजन्तोअग्नऽ३योयाऽ१थाऽ२३ । हाउहाउहाउ ।

३ २र ३र र २ ^ ४ ३ १ १ १

शुक्राओवा । (द्विः) । शुक्राऽ३ओऽ५वाऽ६५६ ॥ ईऽ२३४५ ॥

(दी.३४ । प.१९। मा.२५)१२(ध्रु । २८१)

(साम-तन्त्र-सूत्राणि)(२७९)१० लस्तु १३.५.१; होशब्द आकार शब्दयोर्लोपिः १३.११.१५; (साम-तन्त्र-सूत्राणि) (२८०)११ (२८१)१२ (पृथक् सूत्राणि न सन्ति)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१७०-७२-३)

हाउहाउहाउ । भूताओवा । (त्रिः)। दिदीहिविश्वतस्पृथुः । तरणिर्विश्वऽ३-दार्शाऽ१त्ताऽ२ः ॥ ज्योतिष्कृदसिऽ३सूराऽ१याऽ२ ॥ विश्वमाभासिऽ३-रोचाऽ१नाऽ२म् ॥ श्री ॥ प्रत्यङ्देवाऽ३नाम्वाऽ१इशाऽ२ः ॥ प्रत्यङ्ङु-देषिऽ३मानूऽ१षाऽ२न् ॥ प्रत्यङ्विश्वःसुऽ३वार्दृऽ१शाऽ२इ ॥ श्री ॥ येनापावकऽ३चाक्षाऽ१साऽ२ ॥ भुरण्यन्तंजऽ३नाःआऽ१नूऽ२ ॥ त्वंवरुणऽ३पाश्याऽ१साऽ२३इ । हाउहाउहाउ । भूताओवा । (द्विः) । भूताऽ३ओऽ५वाऽ६५६ ॥ ईऽ२३४५ ॥ (दी.३७ । प.१९ । मा.२१)१३(झ । २८२)

(१७०-७२-४)

हाउहाउहाउ । तेजाओवा । (त्रिः)। दिदीहिविश्वतस्पृथुः । तरणिर्विश्वऽ३-दार्शाऽ१ताऽ२ः ॥ ज्योतिष्कृदसिऽ३सूराऽ१याऽ२ ॥ श्री ॥ विश्वमाभासि-ऽ३रोचाऽ१नाऽ२म् ॥ श्री ॥ प्रत्यङ्देवाऽ३नाम्वाऽ१इशाऽ२ः ॥ प्रत्यङ्ङुदेषिऽ३-मानूऽ१षाऽ२न् ॥ प्रत्यङ्विश्वःसुऽ३वार्दृऽ१शाऽ२इ ॥ श्री ॥ येनापावक-ऽ३चाक्षाऽ१साऽ२ । भुरण्यन्तंजऽ३नाःआऽ१नूऽ२ ॥ त्वंवरुणऽ३पाश्या-ऽ१साऽ२३इ । हाउहाउहाउ । तेजाओवा । (द्विः) । तेजाऽ३ओऽ५वाऽ६५६ ॥ ईऽ२३४५ ॥ (दी.३७ । प. १९। मा. २१)१४(झ २८३)

(१७३-७५-५)

हाउहाउहाउ । सत्याओवा । (त्रिः) । दिदीहिविश्वतस्पृथुः । उद्यामेषिर-ऽ३जाःपाऽ१र्थूऽ२ ॥ अहामिमानोऽ३आक्तुऽ१भाऽ२इः ॥ पश्यंजन्मानिऽ३-सूराऽ१याऽ२ ॥ श्री ॥ अयुक्तसप्तऽ३शून्ध्यूऽ१वाऽ२ः ॥ सूरोरथस्यऽ३-नाप्त्राऽ१याऽ२ः ॥ ताभिर्यातिस्वऽ३यूक्ताऽ१इभीऽ२ः ॥ श्री ॥ सप्तत्वाहरिऽ३-तोराऽ१थाऽ२इ ॥ वहन्तिदेवऽ३सूराऽ१याऽ२ ॥ शोचिष्केशंविऽ३चाक्षाऽ१णाऽ२३ । हाउहाउहाउ । सत्याओवा । (द्विः) । सत्याऽ३ओऽ५वाऽ६५६ ॥ ईऽ२३४५ ॥

(दी. ३६ । प. १९ । मा. २१)१५(घ्र । २८४)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१७३-७५-६)
हाउहाउहाउ । ऋताओवा । (त्रिः) । दिदीहिविश्वतस्पृथुः । उद्यामेषिर-ऽ३जाऽ४पाऽ१र्थूऽ२ ॥ अहामिमानोऽ३आक्तूऽ१भाऽ२इः ॥ पश्यंजन्मानिऽ३-सूराऽ१याऽ२ ॥ श्री ॥ अयुक्तसप्तऽ३शून्ध्यूऽ१वाऽ२ः ॥ सूरोरथस्यऽ३-नाप्त्राऽ१याऽ२ः ॥ ताभिर्यातिस्वऽ३यूक्ताऽ१इभीऽ२ः ॥ श्री ॥ सप्तत्वाहरिऽ३-तोराऽ१थाऽ२इ ॥ वहन्तिदेवऽ३सूराऽ१याऽ२ ॥ शोचिष्केशंविऽ३चाक्षाऽ१णाऽ२३ । हाउहाउहाउ । ऋताओवा । (द्विः) । ऋता३ओऽ५वाऽ६५६ ॥ ईऽ२३४५ ॥

(दी. ३६ । प.१९ । मा. २१)१६(ग्घ्र । २८५)

(१) ॥ वागादिपित्र्यंसाग (वाङ्मनः) । ऋतवोऽनुष्टुप्सूर्यः ॥
वाक् । मनःप्राणःप्राणोपानोव्यानश्चक्षुश्श्रोत्रंःशर्मवर्मभूतिःप्रतिष्ठा । आदित्य-ःपित्र्यम् ।(त्रिः)। आयुःपित्र्यम् । (त्रिः) ॥ (दी. १५ । प.८ । मा.७)१७(बे । २८६)

(१) ॥ चक्षुस्साम । मित्रावरुणौ गायत्री सूर्यः ॥
अन्तर्देवेषुऽ३रोचाऽ१साऽ२इ । (त्रिः) । अन्तश्चरतिऽ३रोचाऽ१नाऽ२ ॥ अस्यप्राणादऽ३पानाऽ१ताऽ२इ ॥ व्यख्यन्महिऽ३षोदाऽ१इवाऽ२म् ॥ अन्तर्देवेषुऽ३रोचाऽ१साऽ२इ । (द्विः) । अन्तर्देवेषुऽ३रोऽ२३ । चाऽ२ । साऽ२३४ । औहोवा ॥ एऽ३ । देवादिवाज्योतीऽ२३४५ः ॥

(दी.२०। प.१४ । मा.९)१८(भो । २८७)

(१७६) ॥ श्रोत्रंस्साम् । उदुत्यं गायत्रीचित्रंत्रिष्टुप्सूर्यः ॥
हाउहाउहाउ । भ्राजाभ्राज । (त्रिः)। आयूरायुः । (त्रिः) । उदुत्यंजा । (त्रिः) । तवेदसम् । (त्रिः) । चित्रन्देवानामुदगादनीऽ२३काऽ३म् ॥ हाउहाउहाउ । भ्राजाभ्राज । (त्रिः) । आयूरायुः । (त्रिः) । देवंवहा । (त्रिः) । चक्षुर्मित्रस्यवरुणास्य-आऽ२३ग्नाऽ३इः ॥ हाउहाउहाउ । भ्राजाभ्राज । (त्रिः) । आयूरायुः । (त्रिः) । तिकेतवः । (त्रिः) । आप्राद्यावापृथिवीआन्तरीऽ२३क्षाऽ३म् ॥ हाउहाउहाउ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र १ र २ र १ र २ १ र २ र १र र र
भ्राजाभ्राज । (त्रिः) । आयूरायुः । (त्रिः) । दृशेविश्वा । (त्रिः) । सूर्यआत्माजगत-
अ २ २र र र र १ र २ र १ र २
स्तास्थुषाऽ२३श्चाऽ३ । हाउहाउहाउ । भ्राजाभ्राज । (त्रिः) । आयूरायुः ।
१ र २ १ २ २
(त्रिः) । यसूर्यम् । (द्विः) । यसूऽ२३रियाउ । वाऽ३ ॥ एऽ३ ।
२र१र र र ३ १११
देवादिवाज्योतीऽ२३४५ः ॥

(दी.११३ । प. ६० । मा. ४७)१९(णो । २८८)

(१) ॥ इन्द्रस्य शिरस्साम । इन्द्रो गायत्री त्रिष्टुप्सूर्यः ॥

२र र र ३र २र ३र र २ र २
हाउहाउहाउ । भ्राजाओवा । (त्रिः) । उदुत्यंजा । (त्रिः) । हाउहाउहाउवा ।
१ २ १ र र अ २ २र र र ३र २र ३र र
आर्चिः । इन्द्रन्नरोनेमधिताहवाऽ२३न्ताऽ३इ ॥ हाउहाउहाउ । भ्राजाओवा ।
२ र १ २
(त्रिः) । तवेदसम् । (त्रिः) । हाउहाउहाउवा । शोचिः ।
र र र ३र २र ३र र २र र
हाउहाउहाउ । भ्राजाओवा । (त्रिः) । देवंवहा । (त्रिः) । हाउहाउहाउवा ।
१ २ १ र र अ २ २र र र ३र २र ३र र
तापः । यत्पार्यायुनजताइधियाऽ२३स्ताऽ३ः॥ हाउहाउहाउ । भ्राजाओवा ।
२ र १ २ र र र
(त्रिः) । तिकेतवः । (त्रिः) । हाउहाउहाउवा । हारः । हाउहाउहाउ ।
३र २र ३र र २ र र १ २
भ्राजाओवा । (त्रिः) । दृशेविश्वा । (त्रिः) । हाउहाउहाउवा । साहः ।
१र र र र र अ २ २र र र ३र २र ३र र
शूरोनृषाताश्रवसाश्वकाऽ२३माऽ३इ ॥ हाउहाउहाउ । भ्राजाओवा । (त्रिः) ।
२ र १ २ २र र र ३र २र ३र र
यसूर्यम् । (त्रिः) । हाउहाउहाउवा । नारः । हाउहाउहाउ । भ्राजाओवा ।
२ र र
(त्रिः) । दृशेविश्वा । (त्रिः) । हाउहाउहाउवा । भाऽ२ः ।
१र र र अ २ २र र र ३र २र ३र र
आगोमतिव्रजेभजातुवाऽ२३न्नाऽ३ः । हाउहाउहाउ । भ्राजाओवा । (त्रिः) ।
२ र २ १११
यसूर्यम् । (त्रिः) । हाउहाउहाउवाऽ३ ॥ ईऽ२३४५ ॥

(दी.१६४। प.७६। मा.९६)२०(त्रू । २८९)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi College Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१) ॥ आदित्यस्यात्मा । आदित्योऽनुष्टुबादित्यात्मा ॥

उन्नयामि । होइ ॥ (द्वे-त्रिः) । आदित्यंप्राञ्चंयन्तमुन्नयामि । होइ । (द्वे-त्रिः) । अहोरात्राण्यरित्राणि । होइ ।(द्वे-त्रिः) । द्यौर्नौर्हाउ । (त्रिः) । तस्यामसावादित्यईयतेहाउ (त्रिः) । तस्मिन्वयमीयमानईयामहेहाउ ॥(त्रिः)। ईयामहेहाउ । (द्विः) ॥ ईयामहेऽ३ । हाउवा ॥ प्रियेधामंःस्त्रियक्षरे । (द्विः) । प्रियेधामंःस्त्रियक्षरेऽ२३४५ ॥

(दी. ६५ । प. ३४ । मा. २७)२१(भे । २९०)

((शुक्रियपर्वणि ४० सामानि))

॥ दशतृतीयः खण्डः ॥३॥

॥ इति आरण्यकगाने षष्ठः प्रपाठकः ॥६॥

॥ इति शुक्रिय नाम षष्ठं पर्वं समाप्तम् ॥

॥अथ महानाम्न्यार्चिकः॥

(१) ॥ महानाम्नी । साम इन्द्रो विराडिन्द्रः, इन्द्रः शक्वरीन्द्रः ॥

एऽ२ । विदामघवन्विदाः ॥ गातुमनुशंःसिषः । दाइशाऽ३१उवाऽ२३ । ईऽ३४डा ॥ एऽ२ । शिक्षाशचीनाम्पताइ ॥ पूर्वीणाम्पुरूऽ२ । वसाऽ३१उवाऽ२३ । ईऽ३४डा । आभिष्ट्वमभाऽ२इ । ष्टिभिराऽ३१उवाऽ२३ । ईऽ३४डा । स्वर्न्नाःशूऽ२ः । हाऽ३१उवाऽ२३ । ईऽ३४डा । प्रा । चेतनप्रचेतया ॥ ईन्द्रा ॥ द्युम्नायनाऽ२इषाइ । इडा ॥ ईन्द्रा ॥ द्युम्नायनाऽ२इषाइ । अथा ॥ ईन्द्रा ॥ द्युम्नायनाऽ२इषाइ । इडा । एवाहिशक्रोरायेवाजायवाऽ१ज्रीऽ३वाः । शविष्ठवज्रिन्नाऽ३ । जासाइ ॥ मंःहिष्ठवज्रिन्नाऽ२३हो ॥ जासाऽ३१उवाऽ२३ ॥ इट्(स्थि)इडाऽ२३४५ ॥ आया ॥ हिपिबमाऽ२त्सुवा ॥ इडाऽ२३४५ ॥

(दी. २२ । प. ३६ । मा.२०)१(चौ । १)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२)

एऽ२ । विदारायेसुवीरियाम् ॥ भुवोवाजानाम्पतिर्वशाऽ२ः । अनुआऽ३१उवाऽ२३ ।
ईऽ३४डा ॥ एऽ२ । मंःहिष्ठवज्रिन्नृञ्जसाइ । यःशविष्ठःशूराऽ२ । णाऽ३१-
उवाऽ२३ । ईऽ३४डा ॥ योमंःहिष्ठोमघोऽ२ । नाऽ३१उवाऽ२३ । ईऽ३४डा ॥
अंःशुर्नशोचाऽ२इः । हाऽ३१उवाऽ२३ । ईऽ३४डा । चाइ । कित्वोअभिनोनया ॥
ईन्द्रो ॥ विदेतमूऽ२स्तुहाइ । इडा ॥ ईन्द्रो ॥ विदेतमूऽ२स्तुहाइ । अथा ॥
इन्द्रो । विदेतमूऽ२स्तुहाइ । इडा । ईशेहिशक्रसतमूतयेहवाऽ१माऽ३हाइ ।
जेतारमपराऽ३ । जाइताम् ॥ सनःस्वर्षदताऽ२३होइ ॥ द्वाइषाऽ३१उवाऽ२३ ॥
इट्(स्थि)इडाऽ२३४५ ॥ क्रातूः ॥ छन्दऋताऽ२म्बृहात् ॥ इडाऽ२३४५ ॥

(दी.२३ । प. ३५ । मा.२४)२(टी । २)

(३)

एऽ२ । इन्द्रन्धनस्यसातयाइ ॥ हवामहेजेतारमपराऽ२ । जितमाऽ३१उवाऽ२३ ।
ईऽ३४डा ॥ एऽ२ । सनःस्वर्षदतिद्विषाः ॥ सानःस्वर्षदताऽ२इ ।
द्विषआऽ३१उवाऽ२३ । ईऽ३४डा । पूर्वस्ययत्तआऽ२ । द्रिवआऽ३१उवाऽ२३ ।
ईऽ३४डा । अंःशुर्मदायाऽ२ । हाऽ३१उवाऽ२३ । ईऽ३४डा । सू । म्नआधेहि-
नोवसाउ ॥ पूर्तीः ॥ शविष्ठशाऽ२स्यताइ । इडा ॥ पूर्तीः ॥शविष्ठशाऽ२स्यताइ ।
अथा । पूर्त्तिः । शविष्ठशाऽ२स्यताइ । इडा ॥ वशीहिशक्रोनूनन्तन्नव्यंःसाऽ१-
न्याऽ३साइ । प्रभोजनस्यवाऽ३ । त्राहान् ॥ समर्येषुब्रवाऽ२३होइ ॥
वाहाऽ३१उवाऽ२३ ॥ इट्(स्थि)इडाऽ२३४५ ॥ शूरो ॥ योगोषुगाऽ२च्छताइ ॥
इडा ॥ साखा ॥ सुशेवोऽ२द्वयूः ॥ इडाऽ२३४५ ॥

(दी. १८ । प.३९ । मा.२५)३(द्वु । ३)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(४) ॥ अथ पञ्च पुरीषपदानि ॥ गायत्री ॥ पदपंक्तिः । (पंक्तिर्वा) इन्द्रः ॥

१ २ र १ १ १ १ १ २र २ ५
आइवा ॥ हियेवाऽ२३४५ । होइ ॥ हो । वाहाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

१ २ १ १ १ १ १ २र २ ५
आइवा ॥ हियग्राऽ२३४५इ । होइ ॥ हो । वाहाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

१ २ १ १ १ १ १ २र २ ५
आइवा ॥ हिइन्द्राऽ२३४५ । होइ ॥ हो । वाहाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

१ २ र १ १ १ १ १ २र २ ५
आइवा ॥ हिपूषाऽ२३४५न् । होइ ॥ हो । वाहाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

१ २ र १ १ १ १ २र २ ५
आइवा ॥ हिदेवाऽ२३४५ः । होइ ॥ हो । वाहाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

(दी. ८ । प. ३० । मा. १९)४(णो । ४)

॥ इति पञ्च पुरीषपदानि ॥

(१) ॥ उद्वयामेकम् साम ॥ (शंयादपत्यः) ॥

५ ५ २ १ अ — १र अ — १
उद्वयाऽ६मे ॥ तमऽ३सास्पराऽ२इ । ज्योतिᳵपश्यन्ताउत्ताराऽ२म् ॥ स्वᳵपश्यन्ता-

अ — र १ र र र ३ ५र र १ २ १र २ ३ २
उत्ताराऽ२म् ॥ देवंदेवत्रासूराऽ२्याऽ२३४औहोवा ॥ अगन्मज्योतिरुत्तमाऽ१म् ॥

(१) (दी. ८ । प. ६ । मा. ७)५(टे । ५)

१ र र र र — १र र २
× तत्सवितुर्वरेणियोम् ॥ भार्गोदेवस्यधीमाहीऽ२ । धियोयोनᳵप्रचोऽ१२१२ ॥

१ — १ २ १ १ १
हिम्(स्थि)आऽ२ । दायो ॥ आऽ३४५ ॥ ओम ॥

(दी. ६ । प. ६ । मा.२)६(का । ६)

× प्रकृति सप्त गानान्तर्भूतं गायत्र्याख्यं एतत् षष्ठं गानम् । ग्रामगेय गाने प्रथमं द्रष्टव्यम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अथ भारुण्डसाम ।।

हाउहाउहाउ । ऊऽ२वदः । (त्रिः) । वदोवदः । (त्रिः) । वदोनृम्णानिपुरायः ।
(त्रिः) । यमोहाउ । (त्रिः) । पितरोहाउ । भारुण्डोहाउ । (त्रिः) । इमाꣳस्तोमाम् ।
अर्हातेजा । तावेदसहोयेऽ३ । होयेहोये ।। हाउहाउहाउ । ऊऽ२वदः । (त्रिः) ।
वदोवदः । (त्रिः) । वदोनृम्णानिपुरायः । (त्रिः) । यमोहाउ । (त्रिः) ।
पितरोहाउ । (त्रिः) । भारुण्डोहाउ । (त्रिः) । रथामिवा । संमाहेमा ।
मानीषयहोयेऽ३ । होयेहोये ।। हाउहाउहाउ । ऊऽ२वदः। (त्रिः) वदोवदः ।
(त्रिः) । वदोनृम्णानिपुरायः । (त्रिः) यमोहाउ । (त्रिः) । पितरोहाउ । (त्रिः)।
भारुण्डोहाउ । (त्रिः) । भद्राहिनाः । प्रमातिरा । स्यासꣳसदहोयेऽ३ । होयेहोये ।।
हाउहाउहाउ । ऊऽ२वदः । (त्रिः) । वदोवदः । (त्रिः) । वदोनृम्णानिपुरायः ।
यमोहाउ । (त्रिः) । पितरोहाउ । (त्रिः) । भारुण्डोहाउ । (त्रिः) अग्नाइसख्याइ ।
माराइषामा । वायंतवहोयेऽ३ । होयेहोये ।। हाउहाउहाउ । ऊऽ२वदः ।
(त्रिः)। वदोवदः । (त्रिः)। वदोनृम्णानिपुरायः । (त्रिः)। यमोहाउ । (त्रिः) ।
पितरोहाउ । (त्रिः)। भारुण्डोहाउ । (द्विः) । भारुण्डोऽ३हाउ । वा ।। ए ।
वदोवदोनृम्णानिपुराययमोव४पितरोभारुण्डः । (द्वे-द्विः) । ए ।
वदोवदोनृम्णानिपुरायमोव४पितरोभारुण्डाऽ२३४५ः ।।

(दी.१५४ । प.११८ । मा.११३)७(दि । ७)

(आरण्यकगाने सामसंख्या २९०) "इत्यारण्यकगाने भारुण्डेनसह महानाम्नी सप्तमं गानं समाप्तम् ।"

।। इति आरण्यक गानं समाप्तम् ।।

अस्यसाम्नः पितृयज्ञादौव्यवहारो दृश्यते इति सत्यव्रतः । अत्रस्वर विषये सम्प्रतिपन्नं प्रमाणन्नोपलभ्यते । यथामातृकं स्वरनिर्दिष्टाः ।।

।। अथ भारुण्डस्य पाठान्तरम् ।।

उद्वयाम् । तमसस्पारीऽ२ । ज्योतिःपश्यन्ताउत्तराऽ२म् । स्वःपश्यन्तउत्त्राऽ२म् ।
देवन्देवत्राऽ२सूऽ२३४रीम । अगन्मज्योतिरुत्तमाऽ१म् । स्वसारः ।
आतोतुनआतोतुऽ३४ । औहोवा । ओऽ२वातः ।(त्रिः) । वातोवातः ।(द्विः) ।
वातोनृम्णानिपूऽ३याः । यमोहाउ ।(त्रिः) ।पितरोहाउ ।।(त्रिः) । भारण्डो-
हाउ।(त्रिः) । इमाꣳस्तोऽ२३४माम् । अर्हातेऽ२३४जा । तावेदसेऽ३ । होइ ।
होइयेऽ३ ।(त्रिः) । होइये ।(त्रिः) । उऽ२वातः । (त्रिः) । वातोवातः । (द्विः)।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वातोनृम्णानिपुराऽ३याः । यमोहाउ ।(त्रिः) ।पितरोहाउ ।।(त्रिः) । भारण्डोहाउ ।
(त्रिः) । रथामीऽ२३४वा । सम्माहेऽ२३४मा । मानीषया । (त्रिः) ।होइ ।
होइयेऽ३ ।(त्रिः) । होइये ।(त्रिः) । उऽ२वातः । (त्रिः) । वातोवातः । (द्विः)।
वातोनृम्णानिपुराऽ३याः ।यमोहाउ ।(त्रिः) ।पितरोहाउ ।।(त्रिः) । भारण्डोहाउ ।
(त्रिः) । भद्राहीऽ२३४नाः । प्रमातीऽ२३४रा । स्यासꣳसदेऽ३ । होइ ।
होइयेऽ३ ।(त्रिः) । होइये ।(त्रिः) । उऽ२वातः । (त्रिः) । वातोवातः । (द्विः)।
वातोनृम्णानिपुराऽ३याः ।यमोहाउ ।(त्रिः) ।पितरोहाउ ।।(त्रिः) । भारण्डोहाउ ।
(त्रिः) । अग्नाइसाऽ२३४ख्याइ । माराइषाऽ२३४मा । वायन्तवाऽ३ । होइ ।
होइयेऽ३ ।(त्रिः) । होइये ।(त्रिः) । उऽ२वातः । (त्रिः) । वातोवातः । (द्विः)।
वातोनृम्णानिपूराऽ३याः । यमोहाउ ।(त्रिः) ।पितरोहाउ ।।(त्रिः) । भारण्डोहाउ ।
(त्रिः) । भारण्डाऽ३४औहोवा । ए । वातोनृम्णानिपुरयद्य मःपितरोभारण्डः ।
(द्विः) । ए । वातोनृम्णारिपुरयद्यमःपितरोभारण्डाऽ२ । ई२३४५ ।।१।।

।। अथ शाखान्तरस्थं तवश्यावीयं साम ।।

ॐहुꣳ२३४५ । ओंभूः । ओंभूमिर्दिवमन्तरिक्षम् । ओंभुवः । ओंऋचोयजूꣳ
षिसामानि । ओंभार्गोदेवस्यधीमाहीऽ२३४५ । ओंस्वः । ओंप्राणोपाणो-
व्यानःसमानउदानः । ओंधियोयोनःप्रचोऽ२३४५ । ओंमहः । ओंजनः । ओंतपः ।
ओंसत्यम् । ओंपुरूषाः । ओंपरोरजोअमृतोम् । ओंह २३४५ । हुम् । आऽ२
दायो । आऽ२३४५ । ओंभुमिरन्तरिक्षन्द्यौः । ओंतत्सवितुर्वरेणियोम् । ओंऊऽ२र्क ।
हाउहाउहाउ । होऽ३वाक् । ओंबह्वोओयजोअमृतोम् । । ओंऊऽ२र्क । हाउहाउहाउ ।
होऽ३वाक् ।(त्रिः) । ओंप्राणोपानौव्यानोसमानउदानः । धियोयोनःप्रचोऽ२३४५ ।।
ओंऊऽ२र्क । हाउहाउहाउ । होऽ३वाक् ।(त्रिः)। धर्मोऽ२धर्मः ।(त्रिः)। धर्मविधर्म ।
(त्रिः)। सत्यंङ्गायं ।(त्रिः)। ऋतंवदं ।(त्रिः)। हꣳवंव२म् वंव२म् वंम् ।(त्रिः)।।१।।

।। इति तवश्यावीयं साम समाप्तम् ।।

(आरण्यकगाने सामसंख्या २९०)

।। इत्यारण्यकगाने भारुण्डेनसह महानाम्नीतिसप्तमं गानं समाप्तम् ।।

।। इति अरण्येगेयगानम् समाप्तम् ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामवेद-संहिता पूर्वार्चिकः

।। अथ आग्नेयं काण्डम् ।।

अथ प्रथमोऽध्यायः

प्रथमप्रपाठकस्य प्रथमोऽर्धः प्रथमा दशतिः

ऋषिः- १, २, ४, ७, ९ भारद्वाजः, ३ मेघातिथिः; ५ उशनाः, ६ सुदीतिपुरुमीढौ वांगिरसौ तियोर्वान्यतरः; ८ वत्सः, १० वामदेवः ।। देवता - अग्निः ।। छन्दः - गायत्री; २ शङ्कुमती पिपीलिकामध्यागायत्री; ५ विराङ्गायत्री ।। स्वरः - षड्जः ।।

२३ १ २ ३१२ ३ २ ३ १ २ १ २र ३ १ २
१. अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ।।१।।
१ २ ३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
२. त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने ।।२।।
३ २ ३१ २ ३ १ २ ३१२ ३ २ ३ १ २ ३ १ २
३. अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ।।३।।
३ २ ३ १ २ ३ १ ३ १ २ १ २ ३ १ २र
४. अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ।।४।।
१ २ ३ १ २ ३ २ ३ १ २ ३ २ २ ३ २ ३ १ २र
५. प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम् । अग्ने रथं न वेद्यम् ।।५।।
१ २ ३ १ २ ३ १ २र ३ १ २ ३ २ ३ १ २र
६. त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ।।६।।
२ ३ १ २र ३ १ २ ३ १ २ ३ १ २ २ ३ २ ३ १ २
७. एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ।।७।।
१ २ ३ १ २र ३ १ २ ३ १ २ २ ३ १ २ ३ २
८. आ ते वत्सो मनो यमत् परमाच्चित् सधस्थात् । अग्ने त्वां कामये गिरा ।।८।।
१ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २र ३ १ २
९. त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ।।९।।
२ ३ १ २ ३ १ २ ३ १२३१२ ३२ ३ १ २र ३ २
१०. अग्ने विवस्वदा भरास्मभ्यमूतये महे । देवो ह्यसि नो दृशे ।।१०।।

इति प्रथमा दशतिः ।। १।। प्रथमः खण्डः ।।१।। (स्वरिताः ९। उ०ना०। धा०३७। वे ।।)

द्वितीया दशतिः

ऋषिः १ आयुङ्क्ष्वाहिः, २ वामदेवः, ३, ८, ९, प्रयोगः भार्गवः४ मधुच्छन्दाः; ५, ७ शुनःशेपः, ६ मेधातिथिः; १० वत्सः ।। देवता - अग्निः ।। छन्दः - गायत्री ।। स्वरः - षड्जः ।।

१ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २
११. नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ।।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१२. दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥२॥
१३. उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके अस्थिरन् ॥३॥
१४. उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥४॥
१५. जराबोध तद्विविड्ढि विशेविशे यज्ञियाय । स्तोमं रुद्राय दृशीकम् ॥५॥
१६. प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे । मरुद्भिरग्न आ गहि ॥६॥
१७. अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् ॥७॥
१८. और्वभृगुवच्छुचिमप्नवानवदा हुवे । अग्निं समुद्रवाससम् ॥८॥
१९. अग्निमिन्धानो मनसा धियं सचेत मर्त्यः । अग्निमिन्धे विवस्वभिः ॥९॥
२०. आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् । परो यदिध्यते दिवि ॥१०॥

इति द्वितीया दशतिः ॥२॥ द्वितीयः खण्डः ॥२॥ (स्व०६। उ०२। धा०५२। खा०॥)

तृतीया दशतिः

ऋषिः १ प्रयोगः; २,५ भरद्वाजः; ३, १० वामदेवः; ४,६ वसिष्ठः; ७ विरूपः; ८ शुनःशेपः; ९ गोपवनः; ११ प्रस्कण्वः; १२ मेधातिथिः; १३ सिन्धुद्वीप आम्बरीषः; त्रित आप्त्यो वा; १४ उशनाः ॥ देवता – अग्निः ॥ छन्दः – १ विराड्गायत्री; २-१४ गायत्री ॥ स्वरः-षड्जः ॥

२१. अग्निं वो वृधन्तमध्वराणां पुरुतमम् । अच्छा नप्त्रे सहस्वते ॥१॥
२२. अग्निस्तिग्मेन शोचिषा यंसद्विश्वं न्या३त्रिणम् । अग्निर्नो वंसते रयिम् ॥२॥
२३. अग्ने मृड महाँ अस्यय आ देवयुं जनम् । इयेथ बर्हिरासदम् ॥३॥
२४. अग्ने रक्षा णो अंहसः प्रति स्म देव रीषतः । तपिष्ठैरजरो दह ॥४॥
२५. अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥५॥
२६. नि त्वानक्ष्य विश्पते द्युमन्तं धीमहे वयम् । सुवीरमग्न आहुत ॥६॥
२७. अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥७॥
२८. इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम् । अग्ने देवेषु प्र वोचः ॥८॥
२९. तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः । स पावक श्रुधी हवम् ॥९॥
३०. परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥१०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२ ३ २ ३ १ २ ३१ २ ३ १ २ ३ १ २र३ १ २
३१. उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥११॥
३ २ ३ १ २र ३ १ २ ३ २ ३१ २ ३ १ २
३२. कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् ॥१२॥
१ २ ३ २३ १ २३ १ २ ३ १ २ २उ ३ १ २
३३. शं नो देवीरभिष्टये शं नो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥१३॥
१ २ ३१ २र ३ १ २ १ २ ३ १ २ ३ १ २
३४. कस्य नूनं परीणसि धियो जिन्वसि सत्पते । गोषाता यस्य ते गिरः ॥१४॥

इति तृतीया दशतिः ॥३॥ तृतीयः खण्डः ॥३॥ (स्व०९। उ०२। धा०५७। थे ॥)

चतुर्थी दशतिः

ऋषिः; १, ३ शंयुः; २, ५, ८, ९ भर्गः; ४ वसिष्ठः; ६ प्रस्कण्वः; ७ तृणपाणिः; १० सोभरिः ॥ देवता – अग्निः ॥ छन्दः-बृहती ॥ स्वरः–मध्यमः ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २
३५. यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २र
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥१॥
३ १ २ ३ १ २ ३ १ २ ३ १ २
३६. पाहि नो अग्न एकया पाह्यू३त द्वितीयया ।
३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥२॥
३ १ २ ३ १ २ ३ १ २ ३ १ २
३७. बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
३ १ २ ३ १ २ ३ १ २
भरद्वाजे समिधानो यविष्ठ्य रेवत् पावक दीदिहि ॥३॥
१ २ ३ १ २ ३ १ २
३८. त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
३ २ ३ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २
यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥४॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
३९. अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः ।
१ २ ३ १ २ ३ २ ३ १ २ ३ २
अप्रोषिवान् गृहपते महाँ असि दिवस्पायुर्दुरोणयुः ॥५॥
२ ३ १ २ ३ १ २ ३ १ २र
४०. अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य ।
२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥६॥
१ २ ३ २ ३ २उ ३ १ २
४१. त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।
३ २ ३ १ २र ३ १ २ ३ २ ३ २ ३ १ २र
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥७॥
२उ ३ १ २ ३ १ २ ३ २ ३ २
४२. त्वमित् सप्रथा अस्यग्ने त्रातर्ऋतः कविः ।
२र ३ १ २ ३ १ २
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४३. आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥९॥

४४. यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥१०॥

इति चतुर्थी दशतिः ॥४॥ चतुर्थः खण्डः ॥४॥ (स्व०९। उ०३। धा०८३। दी० ॥)

पञ्चमी दशतिः

ऋषिः-१ वसिष्ठः; २ भर्गः; ३, ७ सोभरिः; ४ मनुः; ५ सुदीतिपुरुमीढौ; ६ प्रस्कण्वः; ८ मेधातिथिर्मेध्यातिथिश्च; ९ विश्वामित्रः; १० कण्वः ॥ देवता-१-७, ९, १० अग्निः; ८ इन्द्रः ॥ छन्दः—बृहती ॥ स्वरः-मध्यमः ॥

४५. एना वो अग्निं नमसोर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥१॥

४६. शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते ।
अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि ॥२॥

४७. अदर्शि गातुवित्तमो यस्मिन् व्रतान्यादधुः ।
उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥३॥

४८. अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम् ॥४॥

४९. अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम् ।
अग्निं राये पुरुमीढ श्रुतं नरोऽग्निः सुदीतये छर्दिः ॥५॥

५०. श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥६॥

५१. प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना ।
अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥७॥

५२. अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २ ३ २उ ३ १ २र ३ २
५३. कायमानो वना त्वं यन्मातॄरजगन्नपः ।
१ २र ३ १२ ३१२३ २ ३२उ ३१२
न तत्ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्निहाभुवः ॥९॥
१ २र३ १ २ ३ २ ३ १ २ ३ १ २
५४. नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
३ २ ३ १ २ ३१२ ३ १ २र३ १ २ ३१२
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥१०॥

इति पञ्चमी दशतिः ॥५॥ पञ्चमः खण्डः ॥५॥ (स्व०उ०६। धा०७१। षा०॥)

इति प्रथमप्रपाठकस्य प्रथमोऽर्धः ॥

अथ प्रथमप्रपाठकस्य द्वितीयोऽर्धः

षष्ठी दशतिः

ऋषिः-१, ७ वसिष्ठः; २, ३, ५ कण्वः; ४ सोभरिः; ६ उत्कीलः; ८ विश्वामित्रः; ॥ देवता - १, ४-८, अग्निः; २ ब्रह्मणस्पतिः; ३ यूपः ॥ छन्दः–बृहती ॥ स्वरः-मध्यमः ॥

३ १ २ ३ २ ३ १ २ ३ १ २
५५. देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
१ २ ३ २ ३१२ ३ १ २र ३ १ २
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥१॥
२ ३ १२३ २३ २ ३क २र ३१२
५६. प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
१ २ ३ १ २र ३ १ २ ३ २ ३ १ २
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥२॥
३ २ ३ १ २ ३२३ १ २ ३ १ २र ३ २
५७. ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
३ १ २र ३ १ २ ३ २ ३ १ २ ३१२ ३ १ २
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥३॥
२उ ३ १ २र ३ २ ३ १ २ ३ १ २
५८. प्र यो राये निनीषति मर्तो यस्ते वसो दाशत् ।
२ ३ १ २ ३ २ ३ १ २ ३ १ २
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥४॥
१ २ ३ १ २ ३ २ ३ १ ३ ३ १ २
५९. प्र वो यह्वं पुरूणां विशां देवयतीनां ।
३ २ ३ २ ३ १ २ ३ २उ ३ २ ३ १ २
अग्निं सूक्तेभिर्वचोभिर्वृणीमहे यं समिदन्य इन्धते ॥५॥
३ २ ३ २ ३ २ ३ २ ३ १ २र
६०. अयमग्निः सुवीर्यस्येशे हि सौभगस्य ।
३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६१. त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥७॥

६२. सखायस्त्वा ववृमहे देवं मर्त्तास ऊतये ।
अपां नपातं सुभगं सुदंससं सुप्रतूर्तिमनेहसम् ॥८॥

इति षष्ठी दशति ॥६॥ षष्ठः खण्डः ॥६॥ (स्वा० ११। उ० २। धा० ५७। ख ॥)

सप्तमी दशतिः

ऋषिः-१, श्यावाश्ववामदेवौ; २ उपस्तुतो वार्ष्टिहव्यः ; ३ बृहदुक्थः; ४ कुत्सः; ५, ६ भरद्वाजः; ७ वामदेवः; ८, १० वसिष्ठः; ९ त्रिशिरास्त्वाष्ट्रः ॥ देवता —अग्निः ॥ छन्दः—१, ३, ५-९ त्रिष्टुप्; २, ४ जगती; १० त्रिपाद् विराड् गायत्री ॥ स्वरः—१,३, ५-९ धैवतः; २, ४ निषादः; १० षड्जः ॥

६३. आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
इडस्पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानाम् ॥१॥

६४. चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे ।
अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि दूत्यां३ चरन् ॥२॥

६५. इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशनस्तन्वे३ चारुरेधि प्रियो देवानां परमे जनित्रे ॥३॥

६६. इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥४॥

६७. मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥५॥

६८. वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः ।
तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वाः ॥६॥

६९. आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ २उ ३ २ ३ १ २र ३ २ ३ १ २ ३ १ २ ३ १ २
७०. इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
१ २ ३ १ २ ३ २ ३ १ २र३ १ २
नरो हव्येभिरीडते सबाध आग्निरग्रमुषसामशोचि ॥८॥
२ ३ १ २ ३ १ २ ३ १ २र ३ १ २
७१. प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
३२ ३ १ २ ३ १ २र ३ २ ३ १ २ ३ १ २
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥९॥
३ २उ ३ १ २ ३ २ ३ १ २ ३ २
७२. अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् ।
३ १ २ ३ १२ ३ २
दूरेदृशं गृहपतिमथव्युम् ॥१०॥

इति सप्तमी दशतिः ॥७॥ सप्तमः खण्डः ॥७॥ (स्व०१५। उ०८। धा०१०४। नी ॥)

अष्टमी दशतिः

ऋषिः–१, बुधगविष्ठिरौ; २, ५ वत्सप्रीः; ३ भरद्वाजः; ४, ७ विश्वामित्रः; ६ वसिष्ठः; ८ पायुः ॥ देवता–१, २, ४-८ अग्निः; ३ पूषा ॥ छन्दः –त्रिष्टुप् ॥ स्वरः धैवतः ॥

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
७३. अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
यह्वाइव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥१॥
२ ३ १२ ३ १ २ ३ २ ३ १ २र ३ २ ३ १ २
७४. प्र भूर्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्माणम् ।
१ २ ३ २ ३ १ २र ३ १ २ ३ १ २र ३ २
नयन्तं गीर्भिर्वना धियं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥२॥
३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २
७५. शुक्रं ते अन्यद्यजतं ते अन्यद् विषुरूपे अहनी द्यौरिवासि ।
२ ३ २ ३ १ २र ३ १ २ ३ २ ३ १ २
विश्वा हि माया अवसि स्वधवन्भद्रा ते पूषन्निह रातिरस्तु ॥३॥
१ २ ३ १ २ ३ १ २र ३ १ २र
७६. इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
१ २ ३ १ २र ३ २उ ३ १ २ ३ १ २ ३ २
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥४॥
१ २र ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
७७. प्र होता जातो महान्नभोविन्नृषद्मा सीददपां विवर्ते ।
२ ३ २ ३ २ ३ १ २र ३ १ २र ३ १ २ ३ २
दधद्यो धायी सुते वयांसि यन्ता वसूनि विधते तनूपाः ॥५॥
२ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
७८. प्र सम्राजमसुरस्य प्रशस्तं पुंसः कृष्टीनामनुमाद्यस्य ।
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥६॥
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २
७९. अरण्योर्निहितो जातवेदा गर्भइवेत् सुभृतो गर्भिणीभिः ।
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३क२र ३ २
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
८०. सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः ।
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
अनु दह सहमूरान् कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥८॥

इति अष्टमी दशति ॥८॥ अष्टमः खण्डः ॥८॥ (स्व०१३। उ०१। धा०६। टौ॥)

नवमी दशतिः

ऋषिः-१, गय आत्रेयः; २ वामदेवः; ३, ४ भारद्वाजः; ५ मृक्तवाहा द्वितः; ६ वसुयव आत्रेयः; ७, ९ गोपवनः; ८ पुरुरात्रेयः; १० वामदेवः; कश्यपो वा मरीचो मनुर्वा वैवस्वतः; उभौ वा ॥ देवता–अग्निः ॥ छन्दः –अनुष्टुप् ॥ स्वरः–गान्धारः ॥

२ ३ १ २ ३ १ २ ३ २ ३ १ २
८१. अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।
१ २ ३ १ २र ३ २ ३ १ २ ३ १ २
प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥१॥

१ २ ३ २उ ३ २ ३ १ २ ३ १ २
८२. यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः ।
३ १ २ ३ १ २ ३ १ २र ३ १ २
आजुह्वद्धव्यमानुषक् शर्म भक्षीत दैव्यम् ॥२॥

३ १ २ ३ १ २ ३ २उ ३ १ २र
८३. त्वेषस्ते धूम ऋण्वति दिवि संच्छुक्र आततः ।
२ ३ २उ ३ २उ ३ १ २ ३ १ २
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥३॥

१ २र ३ १ २र ३ १ २र
८४. त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
१ २ ३ २ ३ १ २ ३ १ २र
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥४॥

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
८५. प्रातरग्निः पुरुप्रियो विश स्तवेतातिथिः ।
२ ३ २ ३ १ २ ३ १ २र ३ १ २
विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते ॥५॥

१ २र ३ २ ३ १ २ ३ १ २
८६. यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
१ २ ३ २ ३२उ ३ १ २
महिषीव त्वद् रयिस्त्वद् वाजा उदीरते ॥६॥

३ १ २ ३ १ २ ३ १ २ ३ २
८७. विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥७॥

३२उ ३ २ ३ १ २र ३ २ ३ १ २
८८. बृहद् वयो हि भानवेऽर्चा देवायाग्नये ।
२ ३ १ २र ३ १ २ ३ २ ३ २
यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥८॥

१ २ ३ १ २ ३ १ २ ३ १ २र
८९. अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् ।
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
यःस्म श्रुतर्वन्नार्क्षे बृहदनीक इध्यते ॥९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ १ २र ३ १ २ ३ २ ३ १ २ ३ १ २
९०. जातः परेण धर्मणा यत् सवृद्भिः सहाभुवः ।
३ २उ ३ १ २ ३ २ ३ २ ३ १ २र ३ २
पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥१०॥

इति नवमी दशतिः ॥९॥ नवमः खण्डः ॥९॥ (स्व०१४। उ०७। धा०५१ । थ ॥)

दशमी दशतिः

ऋषिः-१, अग्निस्तापसः; २ वामदेवः; ३ काश्यपोऽसितो देवलो. वा; ४ सोमाहुतिर्भार्गवः; ५ पायुः; ६ प्रस्कण्वः; ॥ देवता—१ विश्वेदेवाः; २ अङ्गिराः; ३-६ अग्निः ॥ छन्दः —अनुष्टुप् ॥ स्वरः—गान्धारः ॥

२ ३ १ २ ३ १२ ३ २ ३ १२
९१. सोमं राजानं वरुणमग्निमन्वारभामहे ।
३ २उ ३ १२ ३ १ २ ३ २ ३ १ २
आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥१॥
३ २ ३ २ ३ १ २ ३ २ ३ १ २र
९२. इत एत उदारुहन् दिवः पृष्ठान्या रुहन् ।
२ ३ २ ३ १२ ३१ २र
प्र भूर्जयो यथा पथोद् द्यामङ्गिरसो ययुः ॥२॥
३ १ २ ३ २ ३ १ २ ३ १२
९३. राये अग्ने महे त्वा दानाय समिधीमहि ।
१ २ ३ २ ३१ २ ३ १ २ ३ १ २ ३ २
ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥३॥
३ २ ३ २ ३ २ ३ २ ३ २उ ३ २ ३ २
९४. दधन्वे वा यदीमनु वोचद् ब्रह्मेति वेरु तत् ।
२ ३ १ २ ३ १ २ ३ २ ३ १ २
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥४॥
१ २ ३ '१ २ ३ १२ ३ २ ३ २ ३ १ २
९५. प्रत्यग्ने हरसा हरः श्रृणाहि विश्वतस्परि ।
३ १ २ ३ २ ३ २ ३क २र ३कर२र
यातुधानस्य रक्षसो बलं न्युब्ज वीर्यम् ॥
१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २
९६. त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
१ २ ३ २उ ३ १ २ ३ १ २
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥६॥

इति दशमी दशतिः ॥१०॥ दशमः खण्डः ॥१०॥ (स्व०४। उ०३। धा०२०। दौ ॥)

इति प्रथमप्रपाठके द्वितीयोऽर्धः प्रथमः प्रपाठकश्च समाप्तः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ द्वितीयप्रपाठकस्य प्रथमोऽर्धः

एकादशी दशतिः

ऋषिः—१ दीर्घतमाः; २, ४ विश्वामित्रः; ३ गोतमः; ५ त्रितः; ६ इरिम्बिठिः; ७, ८, १० विश्वमना वैयश्वः; ९ ऋजिष्वा भारद्वाजः ॥ देवता—१-४, ७-१० अग्निः, ५ पवमानः; ६ अदितिः ॥ छन्दः—उष्णिक् ॥ स्वरः—ऋषभः ॥

३१ २ ३१ २३ २१३ १२ ३ २
९७. पुरु त्वा दाशिवाँ वोचे ऽरिरग्ने तव स्विदा ।
३१ २ ३२उ ३१२
तोदस्येव शरण आ महस्य ॥१॥

१ २र ३ २उ ३ १२ ३२
९८. प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् ।
३१ २र३ १ २३ २ ३१२
विपां ज्योतींषि बिभ्रते न वेधसे ॥२॥

२३ १२३ १२३ १२
९९. अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
३ १ २ ३ २३ १२
अस्मे देहि जातवेदो महि श्रवः ॥३॥

२३ १२ ३२ ३१ २ ३१२
१००. अग्ने यजिष्ठो अध्वरे देवां देवयते यज ।
१२ ३१ २र ३२३ १२
होता मन्द्रो वि राजस्यति स्रिधः ॥४॥

३ १ ३२ ३१२३१ २र ३२
१०१. जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये ।
३२ ३१ २३१ २ ३२
अयं ध्रुवो रयीणां चिकेतदा ॥५॥

३ २उ ३ १२ ३१ २र ३ १२
१०२. उत स्या नो दिवा मतिरदितिरूत्यागमत् ।
१ २र ३ १२ ३२३ १२
सा शन्ताता मयस्करदप स्रिधः ॥६॥

१२ ३ १ २३ २ १२ ३१२
१०३. ईडिष्वा हि प्रतीव्यां३ यजस्व जातवेदसम् ।
३ १२३१२
चरिष्णुधूममगृभीतशोचिषम् ॥७॥

१ २र ३१२ ३ २ ३१२ ३ १२
१०४. न तस्य मायया च न रिपुरीशीत मर्त्यः ।
२ ३१२ ३१२ ३१२
यो अग्नये ददाश हव्यदातये ॥८॥

२३ १ २ ३ २ ३ २ ३१२ ३क २र
१०५. अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।
१२ ३ २ ३२
दविष्ठमस्य सत्पते कृधी सुगम् ॥९॥

३क २र३ १२ ३ १२
१०६. श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
२ ३ २३ १२ ३१२
नि मायिनस्तपसा रक्षसो दह ॥१०॥

इति प्रथमा दशति ॥१॥ एकादशः खण्डः ॥११॥ (स्व०९। उ०३। धा०४२। दा ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वादशी दशतिः

ऋषिः—१ प्रयोगो भार्गवः; २, ३, ५-७ सोभरिः; ४ प्रयोगो भार्गवः; सोभरिः काण्वो वा; ८ विश्वमनाः ॥ देवताः—अग्निः ॥ छन्दः—ककुबुष्णिक् ॥ स्वरः—ऋषभः ॥

१ २र ३ १ २ ३२ ३ १ २
१०७. प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
३ १ २ ३ १ २
उपस्तुतासो अग्नये ॥१॥

१ २र३ २ ३ १ २ ३ १ २ ३ १ २
१०८. प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः ।
२ ३ २ ३ १ २र
यस्य त्वं सख्यमाविथ ॥२॥

१ २ ३क २र ३ १ २ ३१२३ १ २
१०९. तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे ।
३ २ ३ १२
देवत्रा हव्यमूहिषे ॥३॥

१ २ ३ १२ ३ १२३ १ २ ३ २३ २
११०. मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्तएषः ।
२ ३ १ २ ३२
यः सुहोता स्वध्वरः ॥४॥

३ १ २ ३ १ २र ३ २ ३ १ २ ३ १ २ ३ २
१११. भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
३ २ ३ १ २र
भद्रा उत प्रशस्तयः ॥५॥

१ २ ३ १ २ ३ १ २र ३ १ २
११२. यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
३ २ ३ १ २ ३ १ २
अस्य यज्ञस्य सुक्रतुम् ॥६॥

१ २ २ १ २र ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
११३. तदग्ने द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणम् ।
३ १ २र ३क २र
मन्युं जनस्य दूढ्यम् ॥७॥

१ २र ३ १ २ ३ १ २र ३ १ २ ३ २
११४. यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
२उ ३ २उ ३ १ २
विश्वेदग्निः प्रति रक्षांसि सेधति ॥८॥

इति द्वितीया दशतिः ॥२॥ द्वादशः खण्डः ॥१२॥ (स्व०१२। उ०२। धा०४४। छी ॥)

॥ इति प्रथमोऽध्यायः ॥

॥ इति सामवेदसंहितायामाग्नेयं काण्डम् ॥

आग्नेयकाण्डस्य मन्त्र संख्या - ११४

गायत्र्यः ३४, वृहत्यः २८, त्रिष्टुभः १८, अनुष्टुभः १६, उष्णिः १८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ ऐन्द्रं काण्डम्

अथ द्वितीयोऽध्यायः

प्रथमा दशतिः

ऋषिः—१ शंयुबर्हिस्पत्यः; २, ४, ५ श्रुतकक्षः; ३ हर्यतः प्रगाथः; ६ इन्द्रमातरो देवजामयः; ७, ८ गोषूक्त्यश्वसूक्तिनौ; ९, १० मेधातिथिराङ्गिरसः प्रियमेधः काण्वश्च ॥ देवता—इन्द्रः ॥ छन्दः-गायत्री ॥ स्वरः—षड्जः ॥

११५. तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥१॥
११६. यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः । तेन नूनं मदे मदेः ॥२॥
११७. गाव उप वदावटे मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥३॥
११८. अरमश्वाय गायत श्रुतकक्षारं गवे । अरमिन्द्रस्य धाम्ने ॥४॥
११९. तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ॥५॥
१२०. त्वमिन्द्र बलादधि सहसो जात ओजसः । त्वं सन्वृषन्वृषेदसि ॥६॥
१२१. यज्ञ इन्द्रमवर्धयद् यद्भूमिं व्यवर्तयत् । चक्राण ओपशं दिवि ॥७॥
१२२. यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोसखा स्यात् ॥८॥
१२३. पन्यंपन्यमित् सोतार आ धावत मद्याय । सोमं वीराय शूराय ॥९॥
१२४. इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयिन् ररिमा ते ॥१०॥

इति तृतीया दशतिः ॥३॥ प्रथमः खण्डः ॥१॥ (स्व०१०। उ०४। धा०४६। भू ॥)

द्वितीया दशतिः

ऋषिः—१, २ सुकक्षश्रुतकक्षौ; ३ भरद्वाजः; ४ श्रुतकक्षः; ५, ६ मधुच्छन्दाः; ७, ९, १० त्रिशोकः; ८ वसिष्ठः । देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

१२५. उद् घेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥१॥
१२६. यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ॥२॥
१२७. य आनयत् परावतः सुनीती तुर्वशं यदुम् । इन्द्रः स नो युवा सखा ॥३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २ ३ २ २ ३ १ २ ३ १ २र २ ३ १ २ ३ २
१२८. मा न इन्द्राभ्याऽऽ३दिशः सूरो अक्तुष्वा यमत् । त्वा युजा वनेम तत् ॥४॥
१ २ ३ २ ३ २ ३ १ २ ३ १ २ १२ ३ १ २
१२९. एन्द्र सानसिं रयिं सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥५॥
१ २ ३ १ २ ३२उ ३ १ २ १ २ ३ १ २ ३ १ २
१३०. इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणम् ॥६॥
१ २ ३ १ २ ३ १ २र ३ १ २ १ २ ३ १ २
१३१. अपिबत् कद्रुवः सुतमिन्द्रः सहस्रबाह्वे । तत्रादददिष्ट पौंस्यम् ॥७॥
३ १ २ ३ २ ३ १ २र ३ २ १ २
१३२. वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन् । विद्धी त्वा३स्य नो वसो ॥८॥
२ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २
१३३. आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
२ ३ २ ३ २ ३ १ २
येषामिन्द्रो युवा सखा ॥९॥
३ २उ ३ २ ३ २ ३ १ २ ३ १ २र
१३४. भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
१ २ ३ १ २र
वसु स्पार्हं तदा भर ॥१०॥

इति चतुर्थी दशतिः ॥४॥ द्वितीयः खण्डः ॥२॥ (स्व०८। उ०३। धा०३२। डा ॥)

तृतीया दशतिः

ऋषिः—१ कण्वो घौरः; २ त्रिशोकः; ३, ९ वत्सः काण्वः; ४ कुसीदी काण्वः; ५ मेधातिथिः; ६ श्रुतकक्षः; ७ श्यावाश्वः; ८ प्रगाथः काण्वः; १० इरिम्बिठिः ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः – षड्जः ॥

३ १ २ ३ २ ३ १ २ ३ १ २र १ २र ३ १ २
१३५. इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नि यामं चित्रमृञ्जते ॥१॥
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
१३६. इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥२॥
१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१३७. समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥३॥
३ २ ३ १ २र ३ १ २र ३ २ १ २ ३ १ २ ३ १ २
१३८. देवानामिदवो महत्तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥४॥
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
१३९. सोमानां स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥५॥
१ २ ३ १ २ ३ १ २र ३ १ २ ३ २ ३ १ २
१४०. बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः । शृणोतु शक्र आशिषम् ॥६॥
३ १ २ ३ १ ३ १ २ १२ ३ १ २
१४१. अद्य नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्न्यं सुव ॥७॥
२ १ २ ३ १ २र ३ २ ३ १ २ ३ १ २र
१४२. क्वा३स्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तं सपर्यति ॥८॥
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २र
१४३. उपह्वरे गिरीणां सङ्गमे च नदीनाम् । धिया विप्रो अजायत ॥९॥
२ ३ १ २ ३ १ २र ३ १ २ ३ २ १ २ ३ २ ३ १ २
१४४. प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः । नरं नृषाहं मंहिष्ठम् ॥१०॥

इति पञ्चमी दशतिः ॥५॥ तृतीयः खण्डः ॥३॥ (स्व०९। उ०ना। धा०४४। ली ॥)

इति द्वितीयः प्रपाठकस्य प्रथमोऽर्धः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ द्वितीयप्रपाठकस्य द्वितीयोऽर्धः

चतुर्थी दशतिः

ऋषिः—१ श्रुतकक्षः; २ मेधातिथिः; ३ गोतमः; ४ भरद्वाजः; ५ बिन्दुः पूतदक्षो वा; ६, ७ श्रुतकक्षः सुकक्षो वा; ८ वत्सः काण्वः; ९ शुनःशेपः; १० शुनःशेपो वामदेवो वा ॥ देवता—इन्द्रः; ५ मरुतः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

१४५. अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः । इन्दोरिन्द्रो यवाशिरः ॥१॥

१४६. इमा उ त्वा पुरूवसोऽभि प्र नोनुवुर्गिरः । गावो वत्सं न धेनवः ॥२॥

१४७. अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥३॥

१४८. यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषाभुवत् सचा ॥४॥

१४९. गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथानाम् ॥५॥

१५०. उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ॥६॥

१५१. इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे । अच्छावभृथमोजसा ॥७॥

१५२. अहमिद्धि पितुष्परि मेधामृतस्य जग्रह । अहं सूर्यइवाजनि ॥८॥

१५३. रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥९॥

१५४. सोमः पूषा च चेततुर्विश्वासां सुक्षितीनाम् । देवत्रा रथ्योर्हिता ॥१०॥

इति षष्ठी दशतिः ॥६॥ चतुर्थः खण्डः ॥४॥ (स्व०८। उ०५। धा० ४४। णी ॥)

पञ्चमी दशतिः

ऋषिः—१, ४ श्रुतकक्षः; २ वसिष्ठः; ३ मेधातिथिप्रियमेधौ; ५ इरिम्बिठिः; ६, १० मधुच्छन्दाः; ७ त्रिशोकः; ८ कुसीदी; ९ शुनःशेपः ॥ देवता—इन्द्रः; ६ प्रजापतिः ॥ छन्दः—१ अनुष्टुप्; गायत्री ॥ स्वरः—१ गान्धारः; षड्जः ॥

१५५. पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥१॥

१५६. प्र व इन्द्राय मादनं हर्यश्वाय गायत ।
सखायः सोमपान्वे ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१५७. वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते ॥३॥
१५८. इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः ॥४॥
१५९. अयं त इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ॥५॥
१६०. सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥६॥
१६१. अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदम् ॥७॥
१६२. य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः । पिबेदस्य त्वमीशिषे ॥८॥
१६३. योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥९॥
१६४. आ त्वेता नि षीदतेन्द्रमभि प्र गायत । सखायः स्तोमवाहसः ॥१०॥

इति सप्तमी दशतिः ॥७॥ पञ्चमः खण्डः ॥५॥ (स्व० ५। उ० २। धा० ३९। फो ॥)

षष्ठी दशतिः

ऋषिः—१ विश्वामित्रः; २ मधुच्छन्दाः; ३ कुसीदी काण्वः; ४ प्रियमेधः; ५, ८ वामदेवः; ६, ९ श्रुतकक्षः; ७ मेधातिथिः; १० बिन्दुः पूतदक्षो वा ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

१६५. इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्वा३स्य गिर्वणः ॥१॥
१६६. महाँ इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥२॥
१६७. आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥३॥
१६८. अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे । सूनुं सत्यस्य सत्पतिम् ॥४॥
१६९. कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥५॥
१७०. त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ॥६॥
१७१. सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥७॥
१७२. ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः । उत श्रोषन्तु नो भुवः ॥८॥
१७३. भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो । यदिन्द्र मृडयासि नः ॥९॥
१७४. अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः । उत स्वराजो अश्विना ॥१०॥

इति अष्टमी दशतिः ॥८॥ षष्ठः खण्डः ॥६॥ (स्व०१२। उ०१। धा०४०। चौ ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तमी दशतिः

ऋषिः—१ इन्द्रमातरो देवजामयः; २ गोधा; ३ दध्यङ्ङाथर्वणः; ४ प्रस्कण्वः; ५ गोतमः; ६ मधुच्छन्दाः; ७ वामदेवः; ८ वत्सः; ९ शुनःशेपः; १० वातायन उलः ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

१७५. ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते । वन्वानासः सुवीर्यम् ॥१॥

१७६. न कि देवा इनीमसि न क्या योपयामसि । मन्त्रश्रुत्यं चरामसि ॥२॥

१७७. दोषो आगाद् बृहद्गाय द्युमद्गामन्नाथर्वण । स्तुहि देवं सवितारम् ॥३॥

१७८. एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥४॥

१७९. इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥५॥

१८०. इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा ॥६॥

१८१. आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि । महान्महीभिरूतिभिः ॥७॥

१८२. ओजस्तदस्य तित्विष उभे यत् समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥८॥

१८३. अयमु ते समतसि कपोतइव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥९॥

१८४. वात आ वातु भेषजं शम्भु मयोभु नो हृदे । प्र न आयूँषि तारिषत् ॥१०॥

इति नवमी दशति ॥९॥ सप्तमः खण्डः ॥७॥ (स्व०१०। उ०२। धा०४५। फु ॥)

अष्टमी दशतिः

ऋषिः—१ कण्वः; २, ३, ९ वत्सः; ४ श्रुतकक्षः; ५ मधुच्छन्दाः; ६ वामदेवः; ७ इरिम्बिठिः; ८ वारुणिः सत्यधृतिः ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्ज ॥

१८५. यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । न किः स दभ्यते जनः ॥१॥

१८६. गव्यो षु णो यथा पुराश्वयोत रथया । वरिवस्या महोनाम् ॥२॥

१८७. इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥३॥

१८८. अया धिया च गव्यया पुरुणामन्पुरुष्टुत । यत् सोमेसोम आभुवः ॥४॥

१८९. पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥५॥

१९०. क इमं नाहुषीष्वा इन्द्रं सोमस्य तर्पयात् । स नो वसून्या भरात् ॥६॥

१९१. आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१९२. महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥८॥

१९३. त्वावतः पुरूवसो वयमिन्द्र प्रणेतः । स्मसि स्थातर्हरीणाम् ॥९॥

इति दशमी दशतिः ॥१०॥ अष्टमः खण्डः ॥८॥ (स्व०६। उ०४। धा०४५। घु ॥)

इति द्वितीयः प्रपाठकः समाप्तः ॥

अथ तृतीयप्रपाठकस्य प्रथमोऽर्धः

नवमी दशतिः

ऋषिः—१ प्रगाथः; २ विश्वामित्रः; ३, १० वामदेवः; ४, ६ श्रुतकक्षः; ५ मधुच्छन्दाः; ७ गृत्समदः; ८, ९ भरद्वाजः ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

१९४. उत्त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥१॥

१९५. गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इन्द्र त्वादातमिद्यशः ॥२॥

१९६. सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन् । न देवो वृतः शूर इन्द्रः ॥३॥

१९७. आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्राति रिच्यते ॥४॥

१९८. इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥५॥

१९९. इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम् । वाजी ददातु वाजिनम् ॥६॥

२००. इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् । स हि स्थिरो विचर्षणिः ॥७॥

२०१. इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः । गावो वत्सं न धेनवः ॥८॥

२०२. इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥९॥

२०३. न कि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन् । न क्येवं यथा त्वम् ॥१०॥

इति प्रथमा दशतिः ॥१॥ नवमः खण्डः ॥९॥ (स्व०८। उ०७। धा०३५। ठु ॥)

दशमी दशतिः

ऋषिः—१, ४ त्रिशोकः; २ मधुच्छन्दाः; ३ वत्सः; ५ सुकक्षः; ६, ९ वामदेवः; ७ विश्वामित्रः; ८ गोषूक्त्यश्वसूक्तिनौ; १० श्रुतकक्षः सुकक्षो वा ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२०४. तरणिं वो जनानां त्रदं वाजस्य गोमतः । समानमु प्र शंसिषम् ॥१॥

२०५. असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । सजोषा वृषभं पतिम् ॥२॥

२०६. सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा । मित्रास्पान्त्यद्रुहः ॥३॥

२०७. यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् । वसु स्पार्हं तदा भर ॥४॥

२०८. श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् । आशिषे राधसे महे ॥५॥

२०९. अरं त इन्द्र श्रवसे गमेम शूर त्वावतः । अरं शक्र परेमणि ॥६॥

२१०. धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः ॥७॥

२११. अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजय स्पृधः ॥८॥

२१२. इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः । तेषां मत्स्व प्रभूवसो ॥९॥

२१३. तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो । स्तोतृभ्य इन्द्र मृडय ॥१०॥

इति द्वितीया दशतिः ॥२॥ दशमः खण्डः ॥१०॥ (स्व०८। उ०२। धा०३३। ठि ॥)

एकादशी दशतिः

ऋषिः—१ शुनःशेपः; २ श्रुतकक्षः; ३ त्रिशोकः; ४, ९ मेधातिथिः; ५ गोतमः; ६ ब्रह्मातिथिः; ७ विश्वामित्रो जमदग्निर्वा; ८ प्रस्कण्वः ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

२१४. आ व इन्द्रं कृविं यथा वाजयन्तः शतक्रतुम् । मंहिष्ठं सिञ्च इन्दुभिः ॥१॥

२१५. अतश्चिदिन्द्र न उपा याहि शतवाजया । इषा सहस्रवाजया ॥२॥

२१६. आ बुन्दं वृत्रहा ददे जातः पृच्छाद्वि मातरम् । क उग्राः के ह शृण्विरे ॥३॥

२१७. बृबदुक्थं हवामहे सृप्रकरस्नमूतये । साधः कृण्वन्तमवसे ॥४॥

२१८. ऋजुनीती नो वरुणो मित्रो नयति विद्वान् । अर्यमा देवैः सजोषाः ॥५॥

२१९. दूरादिहेव यत्सतोऽ३रुणप्सुरशिश्वितत् । वि भानुं विश्वथातनत् ॥६॥

२२०. आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजांसि सुक्रतू ॥७॥

२२१. उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत । वाश्रा अभिज्ञु यातवे ॥८॥

२२२. इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पाँसुले ॥९॥

इति तृतीया दशतिः ॥३॥ एकादशः खण्डः ॥११॥ (स्व०६। उ०१। धा० ३९। को ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वादशी दशतिः

ऋषिः—१, ७, ८ मेधातिथिः; २ वामदेवः; ३, ५ मेधातिथिप्रियमेधौ; ४ विश्वामित्रः; ६ कौत्सो दुर्मित्रः सुमित्रो वा; ९ विश्वामित्रो गाथिनोऽभीपाद उदलो वा; १० श्रुतकक्षः ॥ देवता—इन्द्रः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

१ २ ३ १ २ ३ २ ३ १ २र ३ २ ३ २ ३ १ २
२२३. अतीहि मन्युषाविणं सुषुवांसमुपेरय । अस्य रातौ सुतं पिब ॥१॥
२ ३ १ २ ३ १ २र ३ १ २ १ २र ३ १ २
२२४. कदु प्रचेतसे महे वचो देवाय शस्यते । तदिद्ध्यस्य वर्धनम् ॥२॥
३ २ ३ २ ३ १ २ ३ १ २ ३ १ २र १ २ ३ २ ३ १ २
२२५. उक्थं च न शस्यमानं नागो रयिरा चिकेत । न गायत्रं गीयमानम् ॥३॥
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ २ ३ १ २
२२६. इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः । हरिवान्त्सुतानां सखा ॥४॥
२ ३ १ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २
२२७. आ याह्युप नः सुतं वाजेभिर्मा हृणीयथाः । महाँइव युवजानिः ॥५॥
३ १ २ ३ १ २र ३ १ २र ३ १ २ ३ २ ३ २ ३ २ ३ १ २
२२८. कदा वसो स्तोत्रं हर्यत आ अव श्मशा रुधद्वाः । दीर्घं सुतं वाताप्याय ॥६॥
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २र २ ३ २ ३ १ २र
२२९. ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु । तवेदं सख्यमस्तृतम् ॥७॥
३ १ २ ३ १ २ ३ १ २ १ २
२३०. वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो जिन्व सोमपाः ॥८॥
१ २ ३ १ २र ३ २ ३ १ २ १ २ ३ १ २
२३१. एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः । सत्राजिदुग्र पौंस्यम् ॥९॥
३ १ २र ३ २ ३ १ २र ३ २ ३ २ ३ २ ३ २ ३ १ २
२३२. एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः ॥१०॥

इति चतुर्थी दशतिः ॥४॥ द्वादशः खण्डः ॥१२॥ (स्व०१२। उ०ना। धा०३०। यौ ॥)

॥ इति द्वितीयोऽध्यायः ॥

॥ इत्येकसामि समाप्तम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ तृतीयोऽध्यायः

प्रथमा दशतिः

ऋषिः–१, ६, ९ वसिष्ठः; २ भरद्वाजः; ३ बालखिल्याः; ४ नोधाः; ५ कलिः प्रागाथः; ७ मेधातिथिः; ८ भर्गः; १० प्रगाथः काण्वः ॥ देवता–१-८, १० इन्द्रः; ९ मरुतः ॥ छन्दः–बृहती ॥ स्वरः– मध्यमः ॥

२३३. अभि त्वा शूर नोनुमोऽदुग्धाइव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥

२३४. त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥२॥

२३५. अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥३॥

२३६. तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वस्वरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥४॥

२३७. तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये ।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥५॥

२३८. तरणिरित् सिषासति वाजं पुरन्ध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥६॥

२३९. पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥७॥

२४०. त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ॥८॥

२४१. न हि वश्चरमं च न वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥९॥

२४२. मा चिदन्यद् वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१०॥

इति पञ्चमी दशतिः ॥५॥ प्रथमः खण्डः ॥१॥ (स्व० १२। उ०५। धा० ७३। ञि ॥)

॥ इति तृतीयप्रपाठकस्य प्रथमोऽर्धः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ तृतीयप्रपाठकस्य द्वितीयोऽर्धः

द्वितीया दशतिः

ऋषिः—१ आङ्गिरसः पुरुहन्मा; २, ३, ७-९ मेधातिथिर्मेध्यातिथिश्च; ४ विश्वामित्रः; ५ गोतमः; ६ नृमेधपुरुमेधौ; १० देवातिथिः काण्वः ।। देवता—इन्द्रः ।। छन्दः—बृहती ।। स्वरः— मध्यमः ।।

२४३. न किष्टं कर्मणा नशद् यश्चकार सदावृधम् ।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ।।१।।

२४४. य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ।।२।।

२४५. आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ।।३।।

२४६. आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ।।४।।

२४७. त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ।।५।।

२४८. त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः ।
त्वं वृत्राणि हंस्यप्रतीन्येक इत् पुर्वनुत्तश्चर्षणीधृतिः ।।६।।

२४९. इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ।।७।।

२५०. इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ।।८।।

२५१. उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथाइव ।।९।।

२५२. यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ।।१०।।

इति षष्ठी दशतिः ।।६।। द्वितीयः खण्डः ।।२।। (स्व०११। उ०७। धा०७२। खा ।।)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृतीया दशतिः

ऋषिः–१ भर्गः; २ रेभः काश्यपः; ३ जमदग्निः; ४, ९ मेधातिथिः; ५, ६ नृमेधपुरुमेधौ; ७ वसिष्ठः; ८ रेभः; १० भरद्वाजः ॥ देवता–१, २, ४-१० इन्द्रः; ३ आदित्याः ॥ छन्दः–बृहती ॥ स्वरः–मध्यमः ॥

२५३. शग्ध्यूऽ३षू शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥१॥

२५४. या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥२॥

२५५. प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ।
वरूथ्येऽ३ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥३॥

२५६. अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥४॥

२५७. प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥५॥

२५८. बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥६॥

२५९. इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥७॥

२६०. मा न इन्द्र परा वृणग्भवा नः सधमाद्ये ।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परावृणक् ॥८॥

२६१. वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥९॥

२६२. यदिन्द्र नाहुषीष्वा ओजो नृम्णं च कृष्टिषु ।
यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ॥१०॥

इति सप्तमी दशतिः ॥७॥ तृतीयः खण्डः ॥३॥ (स्व. १०। उ.१। धा.६२। पा ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्थी दशतिः

ऋषिः—१ मेधातिथिः; २ रेभः; ३ वत्सः; ४ भरद्वाजः; ५ नृमेधः; ६ पुरुहन्मा; ७ नृमेधपुरुमेधौ; ८ वसिष्ठः; ९ मेधातिथिर्मेध्यातिथिश्च; १० कलिः ॥ देवता—इन्द्रः ॥ छन्दः—बृहती ॥ स्वरः—मध्यमः ॥

२६३. सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता ।
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥१॥

२६४. यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥२॥

२६५. अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥३॥

२६६. इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तये ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥४॥

२६७. श्रायन्तइव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥५॥

२६८. न सीमदेव आप तदिषं दीर्घायो मर्त्यः ।
एतग्वा चिद्य एतशो युयोजत इन्द्रो हरी युयोजते ॥६॥

२६९. आ नो विश्वासु हव्यमिन्द्रं समत्सु भूषत ।
उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषम ॥७॥

२७०. तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते ॥८॥

२७१. क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
अलर्षि युध्म खजकृत् पुरन्दर प्र गायत्रा अगासिषुः ॥९॥

२७२. वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् ।
तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥१०॥

इति अष्टमी दशतिः ॥८॥ चतुर्थः खण्डः ॥४॥ (स्व.१४। उ०१। धा०७४। ती ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चमी दशतिः

ऋषिः–१, ६ पुरुहन्मा; २ भर्गः; ३ इरिम्बिठिः; ४ जमदग्निः; ५, ७ देवातिथिः; ८ वसिष्ठः; ९ भरद्वाजः; १० बालखिल्याः ॥ देवता–१-३, ५-८, १० इन्द्रः; ४ सूर्यः; इन्द्राग्नी ॥ छन्दः–बृहती ॥ स्वरः–मध्यमः ॥

१ २र ३ २उ ३ १ २ ३ १ २
२७३. यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
१ २ ३ १ २र ३ २ ३ १ २ ३ २ ३ २
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥१॥
१ २ ३ १ २ ३ १ २ ३ १ २
२७४. यत इन्द्र भयामहे ततो नो अभयं कृधि ।
१ २ ३ २उ ३ १ २ ३ २ ३ २उ ३ १ २र
मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥२॥
१ २ ३ १ २र ३ १ २
२७५. वास्तोष्पते ध्रुवा स्थूणां सत्रं सोम्यानाम् ।
३ २ ३ २ ३ १ २र ३ २ ३ १ २ ३ १ २
द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनां सखा ॥३॥
२ ३ १ २ ३ १ २ ३ १ २
२७६. बण्महाँ असि सूर्य बडादित्य महाँ असि ।
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि ॥४॥
३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २
२७७. अश्वी रथी सुरूप इद्गोमाँ यदिन्द्र ते सखा ।
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २र
श्वात्रभाजा वयसा सचते सदा चन्द्रैर्याति सभामुप ॥५॥
१ २र ३ २ ३ १ २र ३ २
२७८. यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥६॥
१ २ ३ २उ ३ २ ३क २र ३ २ ३ १ २
२७९. यदिन्द्र प्रागपागुदग्न्यग्वा हूयसे नृभिः ।
१ २ ३ १ २र ३ २ ३ १ २ ३ १ २
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥७॥
१ २र ३ १ २र
२८०. कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति ॥८॥
३ १ २र ३ १ २ ३ २ ३ १ २र
श्रद्धा हि ते मघवन् पार्ये दिवि वाजी वाजं सिषासति ॥८॥
१ २ ३ २ ३ १ २र ३ १ २
२८१. इन्द्राग्नी अपादियं पूर्वागात् पद्वतीभ्यः ।
३ १ २र ३ २ ३ १ २ ३ १२ ३ २ ३ १ २
हित्वा शिरो जिह्वया रारपच्चरत् त्रिंशत् पदा न्यक्रमीत् ॥९॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
२८२. इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
आ शन्तम शन्तमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥१०॥

इति नवमी दशतिः ॥९॥ पञ्चमः खण्डः ॥५॥ (स्व०१६। उ०५। धा०७२। ञा ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षष्ठी दशतिः

ऋषिः–१ नृमेधः; २, ३ वसिष्ठः; ४ भरद्वाजः; ५ पुरुच्छेपः; ६ वामदेवः; ७ मेध्यातिथिः; ८ भर्गः; ९, १० मेधातिथिर्मेध्यातिथिश्च ॥ देवता–१-४, ७-१० इन्द्रः; ५ अश्विनौ; ६ वरुणः ॥ छन्दः–बृहती ॥ स्वरः–मध्यमः ॥

२८३. इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतममतूर्तं तुग्रियावृधम् ॥१॥

२८४. मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ॥२॥

२८५. सुनोत सोमपान्वे सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित् पृणन्नित् पृणते मयः ॥३॥

२८६. यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम् ।
सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥४॥

२८७. शचीभिर्नः शचीवसू दिवानक्तं दिशस्यतम् ।
मा वां रातिरुप दसत्कदा च नास्मद्रातिः कदा च न ॥५॥

२८८. यदा कदा च मीढुषे स्तोता जरेत मर्त्यः ।
आदिद् वन्देतवरुणं विपा गिरा धर्तारं विव्रतानाम् ॥६॥

२८९. पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे ।
यः सम्मिश्लो हर्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥७॥

२९०. उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥८॥

२९१. महे च न त्वाद्रिवः परा शुल्काय दीयसे ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥९॥

२९२. वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥१०॥

इति दशमी दशतिः ॥१०॥ षष्ठः खण्डः ॥६॥ (स्व०१४। उ०४। धा०७६। भू ॥)

॥ इति तृतीय प्रपाठकः समाप्तः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ चतुर्थप्रापठकस्य प्रथमोऽर्धः

सप्तमी दशतिः

ऋषिः–१ वसिष्ठः; २, ६, ७ वामदेवः; ३ मेधातिथिमेध्यातिथी; विश्वामित्र इत्येके; ४ नोधाः; ५ मेधातिथिः; ८ बालखिल्याः; ९ मेध्यातिथिः; १० नृमेधः ॥ देवता–१-६, ८-१० इन्द्रः; ७ बहवः-(पर्जन्यब्रह्मणस्पत्यदितयो विश्वेदेवाः)॥ छन्दः–बृहती ॥ स्वरः–मध्यमः ॥

२९३. इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ।

२९४. इम इन्द्र मदाय ते सोमाश्चिकित्र उक्थिनः ।
मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥२॥

२९५. आ त्वा३ऽद्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरङ्कृतम् ॥३॥

२९६. न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः ।
यच्छिक्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते ॥४॥

२९७. क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥५॥

२९८. यदिन्द्र शासो अव्रतं च्यावया सदसस्परि ।
अस्माकमंशुं मघवन् पुरुस्पृहं वसव्ये अधि बर्हय ॥६॥

२९९. त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ॥७॥

३००. कदा च न स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥८॥

३०१. युङ्क्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥९॥

३०२. त्वामिदा ह्यो नरोऽपीप्यन् वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥१०॥

इति प्रथमा दशतिः ॥१॥ सप्तमः खण्डः ॥७॥ (स्व०१३। ड०२। धा०८२। ठि ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टमी दशतिः

ऋषिः—१, २, ७, ८ वसिष्ठः; ३ पौर आत्रेयः; ४ प्रस्कण्वः; ५ मेधातिथिमेध्यातिथी; ६ देवातिथिः; ९ नृमेधः; १० नोधाः ॥ देवता—१ उषा; २, ३ अश्विनौ; ४-१० इन्द्रः ॥ छन्दः—बृहती ॥ स्वरः—मध्यमः ॥

३०३. प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥१॥

३०४. इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥२॥

३०५. कुष्ठः को वामश्विना तपानो देवा मर्त्यः ।
घ्नता वामश्नया क्षपमाणोंऽशुनेत्थमु आद्वन्यथा ॥३॥

३०६. अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु ।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥४॥

३०७. आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥५॥

३०८. अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उपो नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥६॥

३०९. अभीषतस्तदा भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर्हि मघवन् बभूविथ भरेभरे च हव्यः ॥७॥

३१०. यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ॥८॥

३११. त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥९॥

३१२. प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमति विश्वं ववक्षिथ ॥१०॥

इति द्वितीया दशतिः ॥२॥ अष्टमः खण्डः ॥८॥ (स्व०१०। उ०३। धा०७७। वे ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नवमी दशतिः

ऋषिः–१, २, ६ वसिष्ठः; ३ गातुः; ४ पृथुर्वैन्यः; ५ सप्तगुः; ७ गौरिवीतिः; ८ वेनो भार्गवः; ९ बृहस्पतिर्नकुलो वा; १० सुहोत्रः ॥ देवता–इन्द्रः ॥ छन्दः–त्रिष्टुप् ॥ स्वरः-धैवतः ॥

१ २ ३ १ २र ३ २ ३क २र ३ १ २ ३ १ २
३१३. असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
१ २ ३ १ २र ३ २ ३ १ २ ३ १ २
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु ॥१॥
१ २ ३ १ २ ३ १ २र ३ १ २
३१४. योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
२ ३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
असो यथा नोऽविता वृधश्चिद्ददो वसूनि ममदश्च सोमैः ॥२॥
१ २ ३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
३१५. अदर्दरुत् समसृजो वि खानि त्वमर्णवान् बद्बधानाँ अरम्णाः ।
३ १ २ ३ १ २ ३ २उ ३ २उ ३ २ ३ १ २ ३ २
महान्तमिन्द्र पर्वतं वि यद्वः सृजद्धारा अव यद्दानवान् हन् ॥३॥
३ १ २ ३ १ २ ३ १ २ ३ १ २
३१६. सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् ।
१ २ ३ १ २र ३ २उ ३ १ २ ३ १ २
आ नो भर सुवितं यस्य कोना तना त्मना सह्याम त्वोताः ॥४॥
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
३१७. जगृह्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥५॥
२ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ २ ३ २
३१८. इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
२ ३ १ २ ३ १२ ३ २ ३ १ २र ३ १ २ ३ १ २
शूरो नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः ॥६॥
१ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २ ३ १ २
३१९. वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
१ २ ३ १ २ ३ २ ३ १ २र ३ २ २ ३ १ २ ३ २
अप ध्वान्तमूर्णुहि पूर्द्धि चक्षुर्मुमुग्ध्या३स्मान्निधयेव बद्धान् ॥७॥
१ २ ३२उ ३ १ २र ३ १ २र ३ १ २
३२०. नाके सुपर्णमुप यत् पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥८॥
१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
३२१. ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
२ ३क २र ३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥९॥
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
३२२. अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
विरप्शिने वज्रिणे शन्तमानि वचांस्यस्मै स्थविराय तक्षुः ॥१०॥

इति तृतीया दशतिः ॥३॥ नवमः खण्डः ॥९॥ (स्व०१३। उ०६। धा०९१। ट ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशमी दशतिः

ऋषिः—१, २, ४ द्युतानः; ३ बृहदुक्थः; ५ वामदेवः; ६, ८ वसिष्ठः; ७ विश्वामित्रः; ९ गौरिवीतिः ॥ देवता—इन्द्रः ॥ छन्दः—१-५, ७-९ त्रिष्टुप्; ६ त्रिपदा विराडनुष्टुप् ॥ स्वरः—१-५, ७-९ धैवतः; ६ गान्धारः ॥

१२ ३ १ २३१२ ३२ ३ २ ३१२ ३१२
३२३. अव द्रप्सो अंशुमतीमतिष्ठदीयानः कृष्णो दशभिः सहस्रैः ।
२ ३२उ ३ २ ३ १२३२३ १ २ ३१२ ३२
आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिं नृमणा अधद्राः ॥१॥

३१ २ ३२३१२ ३ १२ ३१ २ ३१ २र
३२४. वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
३१ २ ३१ २ ३ २३२उ ३ १२
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥२॥

३१ २३१ २र ३१ २र३ १२ ३१ २
३२५. विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
३१२ ३ १ २ ३ २उ ३२३ १ २र
देवस्य पश्य काव्यं महित्त्वाद्या ममार स ह्यः समान ॥३॥

२ ३ २ ३२३ १२ ३१२ ३ १२
३२६. त्वं ह त्यत् सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
३१ २र ३१ २र ३२ ३ १२ ३ १२
गूढे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥४॥

३१ २र ३१२ ३१२ ३ १२ ३२ ३१ २
३२७. मेडिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिरप्स्नुम् ।
३२उ ३ १२ ३१ २र ३ १ २३१२
करोष्यर्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं वृत्रहणं गृणीषे ॥५॥

१ २ ३१ २३१२ ३ १२ ३ १ २३१ २
३२८. प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
१२ ३१ २र
विशः पूर्वीः प्र चर चर्षणिप्राः ॥६॥

३१ २ ३१२३१२३२उ ३ १२३ १२
३२९. शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
३ १ २३२३१२ ३२ ३ १ २ ३१२ ३२३ १२
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानि ॥७॥

२३ १ २ ३ १२ ३१ २
३३०. उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
१ २र ३ १२ ३१२ ३ २ ३ १२३ १२
आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचांसि ॥८॥

३ १ २र ३ १ २र ३१ २र ३ १ २र
३३१. चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चवच्छद्यात् ।
३ १ २र ३ २उ ३ २ ३ १ २र३ १२
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥९॥

इति चतुर्थी दशतिः ॥४॥ दशमः खण्डः ॥१०॥ (स्व०१६। उ०६। धा०७३। कि ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकादशी दशतिः

ऋषिः—१ अरिष्टनेमितार्क्ष्यः; २ भरद्वाजः; ३ वसुक्रो विमदो वा; ४-६, ७ विश्वामित्रः; ८ रेणुः; ९ वामदेवः; १० गोतमः ॥ देवता—१ तार्क्ष्यः; २-६, ८-१० इन्द्रः; ७ इन्द्रापर्वतौ ॥ छन्दः—त्रिष्टुप् ॥ स्वरः—धैवतः ॥

३३२. त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥१॥

३३३. त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
हुवे न शक्रं पुरुहूतमिन्द्रमिदं हविर्मघवा वेत्विन्द्रः ॥२॥

३३४. यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यां३विव्रतानाम् ।
प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्वि सेनाभिर्भयमानो वि राधसा ॥३॥

३३५. सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥४॥

३३६. यो नो वनुष्यन्नभिदाति मर्त्त उगणा वा मन्यमानस्तुरो वा ।
क्षिधी युधा शवसा वा तमिन्द्राभी ष्याम वृषमणस्त्वोताः ॥५॥

३३७. यं वृत्रेषु क्षितयः स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
यं शूरसातौ यमपामुपज्मन् यं विप्रासो वाजयन्ते स इन्द्रः ॥६॥

३३८. इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिडया मदन्ता ॥७॥

३३९. इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत् सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥८॥

३४०. आ त्वा सखायः सख्या ववृत्युस्तिरः पुरू चिदर्णवां जगम्याः ।
पितुर्नपातमा दधीत वेधा अस्मिन् क्षये प्रतरां दीद्यानः ॥९॥

३४१. को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्नेषामप्सुवाहो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥१०॥

इति पञ्चमी दशतिः ॥५॥ एकादशः खण्डः ॥११॥ (स्व०१८। उ०४। धा०८६। दू ॥)

॥ इति चतुर्थप्रपाठकस्य प्रथमोऽर्धः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ चतुर्थप्रपाठकस्य द्वितीयोऽर्धः

द्वादशी दशतिः

ऋषिः—१ मधुच्छन्दाः; २ जेता माधुच्छन्दसः; ३, ६ गोतमः; ४ अत्रिः; ५, ८, ९ तिरश्चीः; ७ काण्वो नीपातिथिः; १० शंयुर्बार्हस्पत्यः ॥ देवता—इन्द्रः ॥ छन्दः—अनुष्टुप् ॥ स्वरः—गान्धारः ॥

३४२. गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥१॥

३४३. इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥२॥

३४४. इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
शुक्रस्य त्वाभ्यक्षरन् धारा ऋतस्य सादने ॥३॥

३४५. यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः ।
राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥४॥

३४६. श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥५॥

३४७. असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥६॥

३४८. एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥७॥

३४९. आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।
अभि त्वा समनूषत गावो वत्सं न धेनवः ॥८॥

३५०. एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान् ममत्तु ॥९॥

३५१. यो रयिं वो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥१०॥

इति षष्ठी दशतिः ॥६॥ द्वादश खण्डः ॥१२॥ (स्व०४। उ०४। धा०५४। घी ॥)

॥ इति तृतीयोऽध्यायः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ चतुर्थोऽध्यायः

प्रथमा दशतिः

ऋषिः–१ भरद्वाजः; २ वामदेवः शाकपूतो वा; ३ प्रियमेधः; ४ प्रगाथः; ५ श्यावाश्व आत्रेयः; ६ शंयुः; ७ वामदेवः; ८ जेता माधुच्छन्दसः ॥ देवता–१-४, ६, ८ इन्द्रः; ५ मरुतः; ७ दधिक्रावा अग्निः ॥ छन्दः–अनुष्टुप् ॥ स्वरः–गान्धारः ॥

३५२. प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
अरङ्गमाय जग्मयेऽपश्चादघ्वने नरः ॥१॥

३५३. आ नो वयो वयः शयं महान्तं गह्वरेष्ठाम् ।
महान्तं पूर्विनेष्ठामुग्रं वचो अपावधीः ॥२॥

३५४. आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिम् ॥३॥

३५५. स पूर्व्यो महोनां वेनः क्रतुभिरानजे ।
यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥४॥

३५६. यदी वहन्त्याशवो भ्राजमाना रथेष्वा ।
पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ॥५॥

३५७. त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
इन्द्रं विश्वासाहं नरं शचिष्ठं विश्ववेदसम् ॥६॥

३५८. दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र न आयूँषि तारिषत् ॥७॥

३५९. पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥८॥

इति सप्तमी दशतिः ॥७॥ प्रथमः खण्डः ॥१॥ (स्व०५। उ०२। धा०४५। पु ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितीया दशतिः

ऋषिः—१, ३, ५ प्रियमेधः; २, १० वामदेवः; ४ मधुच्छन्दाः; ६ भरद्वाजः; ७ अत्रिः; ८ प्रस्कण्वः; ९ आप्त्यस्त्रितः ॥ देवता—१-७ इन्द्रः; ८ उषाः; ९ विश्वेदेवाः; १० ऋक्सामौ । छन्दः—अनुष्टुप् ॥ स्वरः—गान्धारः ॥

१ २ ३ २३१२ ३ १ २३१ २
३६०. प्रप्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे ।
३ १ २ ३१ २ ३ २३ १ २
धिया वो मेधसातये पुरन्ध्या विवासति ॥१॥
३ १२ ३ २ ३ २ ३२ ३२३१२
३६१. कश्यपस्य स्वर्विदो यावाहुः सयुजाविति ।
२३ २ ३१२ ३ २ ३ १ २र ३ १ २
ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य ॥२॥
१ २३१ २ ३ १२ ३ १२
३६२. अर्चत प्रार्चता नरः प्रियमेधासो अर्चत ।
१ २ ३२ ३ २उ ३ २ ३क २र
अर्चन्तु पुत्रका उत पुरमिद् धृष्णवर्चत ॥३॥
३ १ २र३ २ ३ १२ ३ १ २
३६३. उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
३ १ २र ३ १ २ ३१ २ ३ १२
शक्रो यथा सुतेषु नो रारणत् सख्येषु च ॥४॥
३ १ २ ३ २ ३१ २ ३ १२
३६४. विश्वानरस्य वस्पतिमनानतस्य शवसः ।
१ २ ३२३ १ २ ३ १ २
एवैश्च चर्षणीनामूती हुवे रथानाम् ॥५॥
२ ३ १ २ ३ १ २र ३ १ २र ३ १ २
३६५. स घा यस्ते दिवो नरो धिया मर्तस्य शमतः ।
३ १ २र ३ २ ३ २ ३ २उ ३ १ २
ऊती स बृहतो दिवो द्विषो अंहो न तरति ॥६॥
३ १ २ ३ १२ ३ २ ३ १ २
३६६. विभोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
३ १ २
१ २
अथा नो विश्वचर्षणे द्युम्नं सुदत्र मंहय ॥७॥
१ २ ३ १ २ ३ १ २र
३६७. वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि ।
२३ १ २३ १ २र ३ १ २र ३ १ २
उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥८॥
३ १ २र ३ २ ३ ३ १ २ ३ २ ३ २
३६८. अमी ये देवा स्थन मध्य आ रोचने दिवः ।
१ २ ३ २उ ३ २ ३ २ ३ २ ३ १ २-
कद्ध ऋतं कदमृतं का प्रत्ना व आहुतिः ॥९॥
२ ३ १ २ ३ २ ३ १ २ ३ १ २
३६९. ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते ।
१ २र ३ २ ३ १ २
वि ते सदसि राजतो यज्ञं देवेषु वक्षतः ॥१०॥

इति अष्टमी दशतिः ॥८॥ द्वितीयः खण्डः ॥२॥ इत्यनुष्टुभः ॥ (स्व०७। उ०३। धा०५४। जी ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृतीया दशतिः

ऋषिः–१ रेभः; २ सुवेदाः शैलूषिः; ३ वामदेवः; ४, ७, ८ सव्य आङ्गिरसः; ५ विश्वामित्रः; ६ कृष्ण आङ्गिरसः; ९ भरद्वाजः; १० मेधातिथिः; ११ कुत्सः ॥ देवता–१-८, १०, ११ इन्द्रः; ९ द्यावापृथिवी ॥ छन्दः-१-९, ११ जगती; १० महापंक्तिः ॥ स्वरः-१-९, ११ निषादः; १० पञ्चमः ॥

३७०. विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥१॥

३७१. श्रत्ते दधामि प्रथमाय मन्यवेऽहन् यद् दस्युं नर्यं विवेरपः ।
उभे यत्त्वा रोदसी धावतामनु भ्यसात्ते शुष्मात् पृथिवी चिदद्रिवः ॥२॥

३७२. समेत विश्वा ओजसा पतिं दिवो य एक इद् भूरतिथिर्जनानाम् ।
स पूर्व्यो नूतनमाजिगीषं तं वर्त्तनीरनु वावृत एक इत् ॥३॥

३७३. इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति तद्धर्य नो वचः ॥४॥

३७४. चर्षणीधृतं मघवानमुक्थ्या३मिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥५॥

३७५. अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत ।
परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥६॥

३७६. अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।
यस्य द्यावो न विचरन्ति मानुषं भुजे मंहिष्ठमभि विप्रमर्चत ॥७॥

३७७. त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभुवः साकमीरते ।
अत्यं न वाजं हवनस्यदं रथमिन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥८॥

३७८. घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥९॥

३७९. उभे यदिन्द्र रोदसी आपप्राथोषाइव ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ १२ ३ १ २ ३ १ २ ३ २
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
३ १ २र ३ १ २र
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१०॥
२ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
३८०. प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हुवेमहि ॥११॥

इति नवम दशतिः ॥९॥ तृतीयः खण्डः ॥३॥ (स्व०१४। उ०७। धा०९३। थि ॥)

चतुर्थी दशतिः

ऋषिः—१ नारदः; २, ३ गोषूक्त्यश्वसूक्तिनौ; ४ पर्वतः; ५-७, १० विश्वमना वैयश्वः; ८ नृमेधः; ९ गोतमः ॥ देवता—इन्द्रः ॥ छन्दः—उष्णिक् ॥ स्वरः—ऋषभः ॥

१ २ ३ २ ३ १ २ ३ १ २ ३क २र
३८१. इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
३ २ ३ २ ३ १ २ ३ २
विदे वृधस्य दक्षस्य महाँ हि षः ॥१॥
१ २ ३ १ २र ३ १ २ ३ २
३८२. तमु अभि प्र गायत पुरुहूतं पुरुष्टुतम् ।
१ २ ३ १ २ ३ १ २र
इन्द्रं गीर्भिस्तविषमा विवासत ॥२॥
२ ३ १ २ ३ १ २ ३१ २ ३ २
३८३. तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
३ १ २ ३ १ २
उ लोककृत्नुमद्रिवो हरिश्रियम् ॥३॥
१ २र ३ १ २ ३ १ २ ३ २ ३ २
३८४. यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये ।
१ २ ३ २ ३ १ २ ३ १ २र
यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥४॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
३८५. एदु मधोर्मदिन्तरं सिञ्चाध्वर्यो अन्धसः ।
३ २उ ३ १ २र ३ १ २
एवा हि वीर स्तवते सदावृधः ॥५॥
२ ३ १ २ ३ १ २ ३ १ २र
३८६. एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
१ २र ३ २
प्र राधांसि चोदयते महित्वना ॥६॥
२ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
३८७. एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
३ १ २र ३ २उ ३ २
कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥७॥
१ २ ३ १ २ ३ १ २ ३ २ ३ २
३८८. इन्द्राय साम गायत विप्राय बृहते बृहत् ।
३ १ २ ३ १ २ ३ १ २
ब्रह्मकृते विपश्चिते पनस्यवे ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२उ ३ २ ३१२३ २३ १२ ३१२
३८९. य एक इद्विदयते वसु मर्ताय दाशुषे ।
१२ ३ १२ ३ १ २ ३ २
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥९॥
१ २ ३ १ २ ३ १ २र ३ १ २
३९०. सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
३ २ ३ २ ३ १ २ ३ १ २
स्तुष ऊ षु वो नृतमाय धृष्णवे ॥१०॥

इति दशमी दशतिः ॥१०॥ चतुर्थः खण्डः ॥४॥ (स्व०१०। उ०४। धा०६२। खा ॥)

॥ इति चतुर्थः प्रपाठकः समाप्तः ॥

अथ पञ्चमप्रपाठकस्य प्रथमोऽर्धः

पञ्चमी दशतिः

ऋषिः—१ प्रगाथः; २ भरद्वाजः; ३ नृमेधः; ४ पर्वतः; ५, ७ इरिम्बिठिः; ६ विश्वमनाः; ८ वसिष्ठः ॥ देवता—१-४, ६, ८ इन्द्रः; ५, ७ आदित्याः ॥ छन्दः—१-७ उष्णिक्; ८ त्रिपदा विराडनुष्टुप् ॥ स्वरः—१-७ ऋषभः; ८ गान्धारः ॥

३१ २र ३ १२ ३२ ३१२
३९१. गृणे तदिन्द्र ते शव उपमां देवतातये ।
१ २र ३१ २र
यद्धंसि वृत्रमोजसा शचीपते ॥१॥
२ ३ १ २र३ २३ १२ ३ १२
३९२. यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन् ।
३१ २र ३१ २र
अयं स सोम इन्द्र ते सुतः पिब ॥२॥
१ २ ३ १ २
३९३. एन्द्र नो गधि प्रिय सत्राजिदगोह्य ।
३ २उ ३१२ ३१ २र३ २
गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥३॥
१ २ ३१२ ३ १२ ३ १२
३९४. य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
२३ २ ३ २ २३ १२
येना हंसि न्या३त्रिणं तमीमहे ॥४॥
३१ २र३ २उ ३ १ २३ १२ ३१२
३९५. तुचे तुनाय तत्सु नो द्राघीय आयुर्जीवसे ।
१ २ ३ १२
आदित्यासः समहसः कृणोतन ॥५॥
२ ३ १ २र ३ १२ ३१२
३९६. वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
१२ ३ १ २ ३१२
अहरहः शुन्ध्युः परिपदामिव ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २र ३ १ २ ३ २ ३ १ २ ३ २
३९७. अपामीवामप स्रिधमप सेधत दुर्मतिम् ।
१ २ ३ १ २ ३ १ २
आदित्यासो युयोतना नो अंहसः ॥७॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
३९८. पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
३ २ ३ २ ३ १ २ ३ १ २
सोतुर्बाहुभ्यां सुयतो नार्वा ॥८॥

इति प्रथमा दशतिः ॥१॥ पञ्चमः खण्डः ॥५॥ इत्युष्णिहः ॥ (स्व०५। उ०२। धा०५१। फ ॥)

षष्ठी दशतिः

ऋषिः-१-६, ९, १० सोभरिः; ७, ८ नृमेधः ॥ देवता-१, २, ४, ५, ७-१० इन्द्रः; ३, ६ मरुतः ॥ छन्दः—ककुबुष्णिक् ॥ स्वरः—ऋषभः ॥

३ २ ३ १ २र ३ १ २ ३ १ २
३९९. अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
३ १ २ ३ १ २
युधेदापित्वमिच्छसे ॥१॥
१ २ ३ १ २ ३ १ २र ३ २ ३ १ २ १ २ ३ १ २ ३ १ २
४००. यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे सखाय इन्द्रमूतये ॥२॥
१ २ ३ १ २ ३ १ २ ३ १ २
४०१. आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः ।
३ १ २
दृळा चिद्यमयिष्णवः ॥३॥
१ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
४०२. आ याह्ययमिन्दवेऽश्वपते गोपत उर्वरापते ।
१ २
सोमं सोमपते पिब ॥४॥
१ २ ३ २ ३ १ २र २ १ २
४०३. त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
३ १ २र ३ १ २
संस्थे जनस्य गोमतः ॥५॥
१ २ ३क २र ३ २ ३ १ २
४०४. गावश्चिद्घा समन्यवः सजात्येन मरुतः सबन्धवः ।
३ १ २ ३ १ २ ३ २
रिहते ककुभो मिथः ॥६॥
१ २ ३ १ २ ३ १ २ ३ १ २
४०५. त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
२ ३ १ २ ३ १ २
आ वीरं पृतनासहम् ॥७॥
२ ३क २र ३ १ २ ३ १ २ ३ १ २ ३ १ २
४०६. अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
३ २ ३ १ २ ३ १ २
उदेव ग्मन्त उदभिः ॥८॥
१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
४०७. सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे ।
३ १ २र
अभि त्वामिन्द्र नोनुमः ॥९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४०८. वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
वज्रिञ्चित्रं हवामहे ॥१०॥

इति द्वितीया दशतिः ॥२॥ षष्ठः खण्डः ॥६॥ इति ककुभः ॥ (स्व०२। उ०२। धा०४१। छ ॥)

सप्तमी दशतिः

ऋषिः–१-८ गोतमः; ९ त्रितः; १० अवस्युः ॥ देवता–१-८ इन्द्रः; ९ विश्वेदेवाः; १० अश्विनौ ॥ छन्दः–पंक्तिः ॥ स्वरः–पञ्चमः ॥

४०९. स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥१॥

४१०. इत्था हि सोम इन्मदो ब्रह्म चकार वर्धनम् ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥२॥

४११. इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥३॥

४१२. इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन् वीर्यम् ।
यद्ध त्यं मायिनं मृगं तव त्यन्माययावधीरर्चन्ननु स्वराज्यम् ॥४॥

४१३. प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥५॥

४१४. यदुदीरत आजयो धृष्णवे धीयते धनम् ।
युङ्क्ष्वा मदच्युता हरी कंहनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥६॥

४१५. अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥७॥

४१६. उपो षु शृणुही गिरो मघवन्मातथाइव ।
कदा नः सूनृतावतः कर इदर्थयास इद्योजा न्विन्द्र ते हरी ॥८॥

४१७. चन्द्रमा अप्स्वा३ऽन्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१२ ३१२३ २३ १२ ३१२
४१८. प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
३ १ २ ३२३ १२ ३ २३ २ ३ १२ ३ १२
स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवम् ॥१०॥

इति तृतीया दशतिः ॥३॥ सप्तमः खण्डः ॥७॥ (स्व०१३। उ०५। धा०७५। णु ॥)

अष्टमी दशतिः

ऋषिः—१, ७ वसुश्रुतः; २, ४ विमदः; ३ सत्यश्रवाः; ५, ६ गोतमः;, ८ अंहोमुग्वामदेव्यः ॥ देवता—१, २, ७, अग्निः; , ३ उषाः; ४ सोमः; ५, ६ इन्द्रः; ८ विश्वेदेवाः ॥ छन्दः—१-७ पंक्तिः; ८ उपरिष्टाद् बृहती ॥ स्वरः—१-७ पञ्चमः; ८ मध्यमः ॥

१ २ ३१२ ३१२
४१९. आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
२३ २ ३ १२ ३२ ३१२३ १ २र ३२३ १ २
यद्ध स्या ते पनीयसी समिद् दीदयति द्यवीषँ स्तोतृभ्य आ भर ॥१॥
१ २र ३१ २
४२०. आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
३१ २३१ २ ३ २ ३ १२ ३१२ ३१२ ३ १२
शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं विवक्षसे ॥२॥
३१ २ ३१ २३१२ ३२ ३१२
४२१. महे नो अद्य बोधयोषो राये दिवित्मती ।
१ २ ३ १ २ ३१२ ३ १ २र३ १२
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३॥
३२ ३ १ २ ३ २३ १२३१ २र
४२२. भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
१ २ ३ १ २र ३ २ ३ २ ३ २ ३ २ ३ १ २र३ १२
अथा ते सख्ये अन्धसो वि वो मदे रणा गावो न यवसे विवक्षसे ॥४॥
१ २ ३१ २ ३२ ३१ २र ३ १२
४२३. क्रत्वा महाँ अनुष्वधं भीम आ वावृते शवः ।
३२ ३ १ २३२३२ ३ १ २र ३ १ २३१२ ३२
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवां दधे हस्तयोर्वज्रमायसम् ॥५॥
२ ३ १ २र३ २३१२ ३१२
४२४. स घा तं वृषणँ रथमधि तिष्ठाति गोविदम् ।
१ २र ३२ ३१२३ १२ ३ २३क २र ३ १ २
यः पात्रँ हारियोजनं पूर्णमिन्द्रा चिकेतति योजा न्विन्द्र ते हरी ॥६॥
३ १ २र ३ २उ ३२ ३ १ २र ३१२
४२५. अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
२ ३१२ ३२उ ३ १ २ ३ २३ १२ ३२३ १ २
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषँ स्तोतृभ्य आ भर ॥७॥
२उ ३ १ २३१ २र ३१२
४२६. न तमँहो न दुरितं देवासो अष्ट मर्त्यम् ।
३ १२ ३ १२३२ ३ १ २र ३ १२ ३ २ ३ १२
सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः ॥८॥

इति चतुर्थी दशतिः ॥४॥ अष्टमः खण्डः ॥८॥ (स्व०७। उ०३। धा०५७। जे ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नवमी दशतिः

ऋषिः-१, ३-५, १० धिष्ण्या ऐश्वरयोऽग्नयः; २, ६ त्र्यरुणत्रसदस्यू; ७ वसिष्ठः; ८, ९ वामदेवः ॥ देवता–१-६, १० पवमानः; ७ मरुतः; ८ अग्निः; ९ वाजिनां स्तुतिः ॥ छन्दः–१, ३, ४, ५, ७, १० द्विपदा पंक्तिः; २, ६ त्रिपदा पिपीलिकामध्यानुष्टुप्; ८ पदपंक्तिः; ९ पुरउष्णिक् ॥ स्वरः–१, ३-५, ७, ८, १० पञ्चमः; २, ६ गान्धारः; ९ ऋषभः ॥

२ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २र
४२७. परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥१॥
२ ३ १ २र ३ १ २ ३ १ २ ३ १ २ ३ १ २
४२८. पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
३ २ ३ १ २ ३ १ २
द्विषस्तरध्या ऋणया न ईरसे ॥२॥
१ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ ३ १ २र
४२९. पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥३॥
१ २ ३ २उ ३ २ ३ २ ३ २ ३ १ २र
४३०. पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥४॥
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २र
४३१. इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥५॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
४३२. अनु हि त्वा सुतँ सोम मदामसि महे समर्यराज्ये ।
१ २ ३ १ २ ३ १ २
वाजाँ अभि पवमान प्र गाहसे ॥६॥
२ ३क २र ३ २ ३ १ २ ३ २ ३ २ ३ २ ३ १ २
४३३. क ईं व्यक्ता नरः सनीडा रुद्रस्य मर्या अथा स्वश्वाः ॥७॥
२ ३ २ ३ २ ३ २उ ३ २ ३ २ ३ १ २ ३ १ २
४३४. अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् ।
३ १ २ ३ १ २
ऋध्यामा त ओहैः ॥८॥
३ १ २ ३ १ २र ३ १ २ ३ १ २ ३ २ ३ २
४३५. आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम् ।
३ १ २
स्वर्गाँ अर्वन्तो जयत ॥९॥
१ २ ३ १ २ ३ २ ३ १ २र ३ १ २ ३ २
४३६. पवस्य सोम द्युम्नि सुधारो महाँ अवीनामनुपूर्व्यः ॥१०॥

इति पञ्चमी दशतिः ॥५॥ नवमः खण्डः ॥९॥ (स्व०८। उ०२। धा०३५। ठु ॥)

॥ इति पञ्चमप्रपाठकस्य प्रथमोऽर्धः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ पञ्चमप्रपाठकस्य द्वितीयोऽर्धः

दशमी दशतिः

ऋषिः—१, २, ५, ६, ८-१० वामदेवः; ३, ४ अवस्युः; ७ संवर्त्तः ॥ देवता—१-५, ८-१० इन्द्रः; ६ विश्वेदेवाः; ७ उषाः ॥ छन्दः—द्विपदाविराट्पक्ति ॥ स्वरः—पञ्चमः ॥

१२ ३१२ ३ १ २३ २ ३ १२३१२
४३७. विश्वतोदावन् विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥१॥
३२ ३२उ ३ २ ३ २ ३ १२ ३२ ३२
४३८. एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥२॥
३२३ १ २ ३१२ ३१ २र ३१२३ २ ३ १ २
४३९. ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥३॥
१२ ३ २३१२ ३ २ ३ १२ ३१२
४४०. अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥४॥
२ ३२ ३१ २३२३१ २र ३१ २ ३ १ २ ३२
४४१. शं पदं मघं रयीषिणे न काममव्रतो हिनोति न स्पृशद्रयिम् ॥५॥
२ ३ २३ १२ ३१२ ३ १२ ३१ २३१२
४४२. सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥६॥
१ २ ३ १२ ३१ २र ३ १ २र
४४३. आ याहि वनसा सह गावः सचन्त वर्तनिं यदूधभिः ॥७॥
१२ ३१ २र ३२३ १२ ३२ ३१२
४४४. उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥८॥
१२ ३२ ३१२ ३१ २र ३२उ ३ १ २र
४४५. अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥९॥
२ ३ १ २ ३१२ ३ १२ ३१ २ ३ २ ३१२
४४६. प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥१०॥

इति षष्ठी दशतिः ॥६॥ दशमः खण्डः ॥१०॥ (स्व०७। उ०२। धा०४२। ष्ठा ॥)

एकादशी दशतिः

ऋषिः—१, ३, ४, ७, ९, १० वामदेवः; २ बन्धुः; ५ संवर्त्तः; ६ भुवन आप्त्यः; ८ भरद्वाजः ॥ देवता—१, २, ३ अग्निः; ४, ८, १० इन्द्रः; ५ उषाः; ६, ७, ९ विश्वेदेवाः ॥ छन्दः—१, ३, ४, ७ द्विपदा गायत्री; २, ५, ६ द्विपदा पक्तिः; ८, ९ द्विपदा त्रिष्टुप्; १० एकपदा गायत्री ॥ स्वरः—१, ३, ४, ७, १० षड्जः; २, ५, ६ पञ्चमः; ८, ९ धैवतः ॥

१२३१ २र ३२उ ३१२
४४७. अचेत्यग्निश्चिकितिर्हव्यवाड न सुमद्रथः ॥१॥
२३ २ ३ १२ ३२ ३२ ३१२ ३क २र
४४८. अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥२॥
२३ २ ३ २ ३२३२३ १२ ३ १२
४४९. भगो न चित्रो अग्निर्महोनां दधाति रत्नम् ॥३॥
१२३ १ २ ३२ ३ १ २र ३२ ३२
४५०. विश्वस्य प्र स्तोभ पुरो वा सन् यदि वेह नूनम् ॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ २उ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
४५१. उषा अप स्वसुष्टमः सं वर्तयति वर्तनिं सुजातता ॥५॥
३ २उ ३ १ २ ३ १ २ ३ १ २ ३ २
४५२. इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥६॥
२ ३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २
४५३. वि स्रुतयो यथा पथ इन्द्र त्वद्यन्तु रातयः ॥७॥
३ १ २र ३ १ २ ३ १ २ ३ १ २ ३ १ २
४५४. अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥८॥
३ २ ३ १ २र ३ २ ३ १ २ ३ १ २ ३ १ २
४५५. ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र ॥९॥
२ ३ १ २
४५६. इन्द्रो विश्वस्य राजति ॥१०॥

इति सप्तमी दशतिः ॥७॥ एकादशः खण्डः ॥११॥ (स्व०५। उ०४। धा०४१। भ ॥)

द्वादशी दशतिः

ऋषिः–१, १० गृत्समदः; २ गौराङ्गिरसः; ३, ५, ९ परुच्छेपः; ४ रेभः; ६ एवयामरुत्; ७ अनानतः पारुच्छेपिः; ८ नकुलः ॥ देवता–१, ३, ४, १० इन्द्रः; २ सूर्यः; ५ विश्वेदेवाः; ६ मरुतः; ७ पवमानः; ८ सविता; ९ अग्निः ॥ छन्दः–१, १० अष्टिः; २, ४, ६ जगती; ३, ५, ७, ९ अत्यष्टिः; ८, १० अतिशक्वरी ॥ स्वरः–१, १० मध्यमः; २, ४, ६ निषादः; ३, ५, ७, ९ गान्धारः; ८, १० पञ्चमः ॥

१ २ ३ १ २र ३ २ ३ १ २र ३
४५७. त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोमपिबद् -
१ २ ३ १ २ ३ २ १ २ ३ २ ३ २ ३ १ २
विष्णुना सुतं यथावशम् । स ईं ममाद महि कर्म कर्तवे -
३ २ ३ १ २र ३ २ ३ २ ३ १ २र ३ १ २र
महामुरुं सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम् ॥१॥
३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २उ ३ १ २
४५८. अयं सहस्रमानवो दृशः कवीनां मतिर्ज्योतिर्विधर्म - ।
३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २
ब्रध्नः समीचीरुषसः समैरयदरेपसः सचेतसः स्वसरे मन्युमन्तश्चिता गोः ॥२॥
१ २ ३ १ २ ३ २ ३ १ २र ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
४५९. एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्ता राजेव सत्पतिः ।
१ २ ३ १ २ ३ २उ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥३॥
१ २र ३ १ २ ३ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २
४६०. तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरि ।
१ २ ३ १ २र ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्त राये नो विश्वा सुपथा कृणोतु वज्री ॥४॥
२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २र
४६१. अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु त्यच्छर्द्धो
३ १ २ ३ १ २
दिव्यं वृणीमह इन्द्रवायू वृणीमहे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
यद्ध क्राणा विवस्वते नाभासन्दाय नव्यसे ।
२ ३ २ ३ १ २र ३ १ २ ३ २उ ३ २ ३ १ २
अध प्र नूनमुप यन्ति धीतयो देवाँ अच्छा न धीतयः ॥५॥
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
४६२. प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
१ २र ३ १ २र ३ १ २ ३ १ ३ १ २ ३ १ २ ३ १ २
प्र शर्धाय प्र यज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥६॥
३ २ ३ १ २र ३२उ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
४६३. अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।
१ २ ३ १ २ ३ १ २ ३ १ २र
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
२ ३ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २
विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥७॥
३ २उ ३ १ २ ३ १ २ ३क २र ३ १ २ ३ १ २ ३ १ २
४६४. अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं -
३ २ ३ २ ३ २ ३ २ ३ २उ ३ २ ३ १ २र ३
रत्नधामभि प्रियं मतिम् । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् -
१ २ ३ १ २ ३ १ २ ३ १ २
सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥८॥
३ १ २र ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ २ ३
४६५. अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं सहसो जातवेदसं विप्रं -
२ ३ १ २ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २
न जातवेदसम् । य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा - ।
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥९॥
२ ३ १ २र ३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ २
४६६. तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ २
यो देवस्य शवसा प्रारिणा असु रिणन्नपः ।
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २र
भुवो विश्वमभ्यदेवमोजसा विदेदूर्जं शतक्रतुर्विदेदिषम् ॥१०॥

इति अष्टमी दशतिः॥८॥ द्वादशः खण्डः॥१२॥ इत्यैन्द्रं पर्व काण्डं वा समाप्तम्॥ (स्व०३। उ०६। धा०१०। ट ॥)

॥ इति चतुर्थोऽध्यायः ॥

ऐन्द्रकाण्डे, गायत्र्यः - ११८, वृहत्यः - ८०, त्रिष्टुभः - २९, अनुष्टुभः - २८, जगत्यः - ११
उष्णिहः - १८, ककुभः - १०, पंक्तयः - १८, द्विपदाः - २९, अत्यष्टयः - ११
१५५ - अनुष्टुप्, ३२८ - त्रिपाद्विराट्, ३७९ - महापंक्तिः, ४२६ - बृहती, ५६६ - एकपदा

॥ इति सामवेदसंहितायामैन्द्रं काण्डम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अथ पवमानं काण्डम् ।।

अथ पञ्चमोऽध्यायः

प्रथमा दशतिः

ऋषिः—१, ४ अमहीयुः; २ मधुच्छन्दाः; ३ भृगुर्वारुणिः; ५ त्रितः; ६ कश्यपः; ७ जमदग्निः; ८ दृढच्युत आगस्त्यः; ९, १० काश्यपोऽसितः ।। देवता—पवमानः सोमः ।। छन्दः—गायत्री ।। स्वरः—षड्जः ।।

३ १ २ ३१ २र ३१ २र ३ २उ ३ २ ३ १२
४६७. उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । उग्रं शर्म महि श्रवः ।।१।।
१ २ ३ १ २ ३ १२ ३ १२ १ २३ १२ ३ २
४६८. स्वादिष्ठया मदिष्ठया पवस्य सोम धारया । इन्द्राय पातवे सुतः ।।२।।
१२ ३ १२ ३१ २ ३२ २ ३ १२३ १२
४६९. वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा ।।३।।
२ ३ २ ३ १२ ३ १२ ३ १ २ ३ १२ ३२
४७०. यस्ते मदो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशंसहा ।।४।।
३ २उ ३ १ २ ३ १ २ ३१२ १२ ३ १ २
४७१. तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ।।६।।
१ २ ३१ २ ३ १२ ३ १२ ३२ ३ १ २३१२
४७२. इन्द्रायेन्दो मरुत्वते पवस्य मधुमत्तमः । अर्कस्य योनिमासदम् ।।७।।
१ २ ३१ २र ३ १ २र ३ २ ३ २उ ३ १ २
४७३. असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः । श्येनो न योनिमासदत् ।।७।।
१२ ३ १२ ३१ २ ३१२ ३१ २ ३ २३ १२
४७४. पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः ।।८।।
१२ ३ १ २३ २ ३२ ३ १ २ १२ ३ १ २
४७५. परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् । मदेषु सर्वधा असि ।।९।।
१२ ३२ ३२ ३ १ २र ३क २र ३ २ ३ १ २ ३ १ २
४७६. परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः । स्वानैर्याति कविक्रतुः ।।१०।।

इति नवमी दशतिः ।।९।। प्रथमः खण्डः ।।१।। (स्व० ६। उ० ३। धा० ४२। गा ।।)

द्वितीया दशतिः

ऋषिः—१, श्यावाश्वः; २ त्रितः; ३, ८ अमहीयुः; ४ भृगुः; ५, ६ कश्यपः; ७ निध्रुविः काश्यपः; ९, १० काश्यपोऽसितः ।। देवता—पवमानः सोमः ।। छन्दः—गायत्री ।। स्वरः—षड्जः ।।

१ २र ३ २ ३ १२ ३ १ २ ३ २ ३ १ २
४७७. प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् । सुता विदथे अक्रमुः ।।१।।
१ २र ३ २ ३ १ २ ३ १ २ १ २ ३ १ २
४७८. प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः । वनानि महिषाइव ।।२।।
१२ ३ १ २ ३ २ ३ १ २ ३ २ ३ १२
४७९. पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
२ ३ २ ३ १ २
विश्वा अप द्विषो जहि ।।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४८०. वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
पवमान स्वर्दृशम् ॥४॥

४८१. इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः ।
सृजदश्वं रथीरिव ॥५॥

४८२. असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥६॥

४८३. पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः । वायुमा रोह धर्मणा ॥७॥

४८४. पवमानो अजीजनद् दिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥८॥

४८५. परि स्वानास इन्दवो मदाय बर्हणा गिरा । मधो अर्षन्ति धारया ॥९॥

४८६. परि प्रासिष्यदत् कविः सिन्धोरूर्मावधि श्रितः । कारुं बिभ्रत् पुरुस्पृहम् ॥१०॥

इति दशमी दशतिः ॥१०॥ द्वितीयः खण्डः ॥२॥ (स्व०११। उ०ना । धा०४९। हो ॥)

॥ इति पञ्चमः प्रपाठकः समाप्तः ॥

अथ षष्ठप्रपाठकस्य प्रथमोऽर्धः

तृतीया दशतिः

ऋषिः—१, ८, ९ अमहीयुः; २ बृहन्मतिराङ्गिरसः; ३ जमदग्निः; ४ प्रभूवसुः; ५ मेध्यातिथिः; ६, ७ निध्रुविः काश्यपः; १० उचथ्यः ॥ देवता—पवमानः सोमः ॥ छन्दः—गायत्री ॥ स्वरः—षड्जः ॥

४८७. उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् । इन्दुं देवा अयासिषुः ॥१॥

४८८. पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥२॥

४८९. आविशन् कलशं सुतो विश्वा अर्षन्नभि श्रियः । इन्दुरिन्द्राय धीयते ॥३॥

४९०. असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः । कार्ष्मन् वाजी न्यक्रमीत् ॥४॥

४९१. प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥५॥

४९२. अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः । नुदस्वादेवयुं जनम् ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४९३. अया पवस्व धारया यया सूर्यमरोचयः । हिन्वानो मानुषीरपः ॥७॥
४९४. स पवस्यव य आविथेन्द्रं वृत्राय हन्तवे । वव्रिवांसं महीरपः ॥८॥
४९५. अया वीती परि स्त्रव यस्त इन्दो मदेष्वा । अवाहन्नवतीर्नव ॥९॥
४९६. परि द्युक्षं सनद्रयिं भरद्वाजं नो अन्धसा । स्वानो अर्ष पवित्र आ ॥१०॥

इति प्रथमा दशतिः ॥१॥ तृतीयः खण्डः ॥३॥ (स्व०९। उ०६। धा०३५। तु ॥)

चतुर्थी दशतिः

ऋषिः–१ मेधातिथिः; २, ७ भृगुः; ३ उचथ्यः; ४ अवत्सारः; ५ निध्रुविः काश्यपः; ६, १० असितः; ८, ९ कश्यपो मारीचः; ११ कविः; १२ जमदग्निः; १३ अयास्य आङ्गिरसः; १४ अमहीयुः ॥ देवता–पवमानः सोमः ॥ छन्दः–गायत्री ॥ स्वरः–षड्जः ॥

४९७. अचिक्रदद् वृषा हरिर्महान् मित्रो न दर्शतः । सं सूर्येण दिद्युते ॥१॥
४९८. आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पान्तमा पुरुस्पृहम् ॥२॥
४९९. अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय । पुनाहीन्द्राय पातवे ॥३॥
५००. तरत् स मन्दी धावति धारा सुतस्यान्धसः । तरत् स मन्दी धावति ॥४॥
५०१. आ पवस्व सहस्त्रिणं रयिं सोम सुवीर्य्यम् । अस्मे श्रवांसि धारय ॥५॥
५०२. अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम् ॥६॥
५०३. अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् । सीदन् योनौ वनेष्वा ॥७॥
५०४. वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दध्रिषे ॥८॥
५०५. इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥९॥
५०६. मन्द्रया सोम धारया वृषा पवस्व देवयुः । अव्या वारेभिरस्मयुः ॥१०॥
५०७. अया सोम सुकृत्यया महान्त्सन्नभ्यवर्धथाः । मन्दान इद् वृषायसे ॥११॥
५०८. अयं विचर्षणिर्हितः पवमानः स चेतति । हिन्वान आप्यं बृहत् ॥१२॥
५०९. प्र न इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः ॥१३॥
५१०. अपघ्नन् पवते मृधोऽप सोमो अराव्णः । गच्छन्निन्द्रस्य निष्कृतम् ॥१४॥

इति द्वितीया दशतिः ॥२॥ चतुर्थः खण्डः ॥४॥ (स्व०१५। उ०२। धा०५७। फो ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चमी दशतिः

ऋषिः—भरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठः ॥ देवता—पवमानः सोमः ॥ छन्दः—बृहती ॥ स्वरः—मध्यमः ॥

५११. पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥१॥

५१२. परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ॥२॥

५१३. आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥३॥

५१४. प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥४॥

५१५. सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥५॥

५१६. तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि ॥६॥

५१७. मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥७॥

५१८. अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥८॥

५१९. पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥९॥

५२०. इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥१०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २ ३ १ २ ३ १ २र ३ १ २
५२१. पवस्व वाजसातमोऽभि विश्वानि वार्या ।
१ २ ३ १ २ ३ १ २र ३ १ २ ३ २
त्वं समुद्रः प्रथमे विधर्मं देवेभ्यः सोम मत्सरः ॥११॥
१ २ ३ २ ३ २ ३ १ २
५२२. पवमाना असृक्षत पवित्रमति धारया ।
३ १ २ ३ १ २ ३ १ २र ३ २ ३ १ २र
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥१२॥

इति तृतीया दशतिः ॥३॥ पञ्चमः खण्डः ॥५॥ इति बृहत्यः ॥ (स्व०१९। उ०३। धा०९१। द ॥)

षष्ठी दशतिः

ऋषिः—१, ९ उशनाः काव्यः; २ वृषगणो वासिष्ठः; ३, ७ पराशरः शाक्त्यः; ४, ६ वसिष्ठो मैत्रावरुणः; ५, १० प्रतर्दनो दैवोदासिः; ८ प्रस्कण्वः काण्वः ॥ देवता—पवमानः सोमः ॥ छन्दः—त्रिष्टुप् ॥ स्वरः—धैवतः ॥

१ २र ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २र
५२३. प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥
१ २र ३ १ २ ३ २ ३ २ ३ २ ३ १ २
५२४. प्र काव्यमुशनेवब्रुवाणो देवो देवानां जनिमा विवक्ति ।
१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३क २र ३ १ २
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥२॥
३ १ २र ३ १ २र ३ १ २ ३ १ २र ३ २
५२५. तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥३॥
३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
५२६. अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमन्ति होता ॥४॥
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
५२७. सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
३ १ २र ३ १ २र ३ १ २ ३ १ २र
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥५॥
३ १ २ ३ १ २र ३ १२ ३ १ २ ३ १ २
५२८. अभि त्रिपृष्ठं वृषणं वयोधामङ्गोषिणमवावशन्त वाणीः ।
२ ३ १ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥६॥
१ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २र ३ २
५२९. अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य गोपाः ।
१ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २र ३ १ २र
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥७॥
१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
५३०. कनिक्रन्ति हरिरा सृज्यमानः सीदन् वनस्य जठरे पुनानः ।
१ २ ३ १ २ ३ २ ३ १ २र ३ १ २ ३ १ २
नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ २उ ३ १२ ३ २ ३ २ ३ २ ३ १ २ ३ १ २
५३१. एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
३ १ २ ३ १ २ ३ १ २ ३ २ ३२उ ३क २र
सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥९॥
१ २ ३ १ २ ३ २ ३ १ २र ३ २ ३ २ ३ १ २
५३२. पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥१०॥

इति चतुर्थी दशतिः ॥४॥ षष्ठः खण्डः ॥६॥ (स्व०१८। उ०३। धा०८७। डे ॥)

सप्तमी दशतिः

ऋषिः—१ प्रतर्दनः; २, १० पराशरः शाक्त्यः; ३ इन्द्रप्रमतिर्वासिष्ठः; ४ वसिष्ठो मैत्रावरुणः; ५ मृडीको वासिष्ठः; ६ नोधा गोतमः; ७ कण्वो घौरः; ८ मन्युर्वासिष्ठः; ९ कुत्स आङ्गिरसः; ११ कश्यपो मारीचः; १२ प्रस्कण्वः काण्वः ॥ देवता—पवमानः सोमः ॥ छन्दः—त्रिष्टुप् ॥ स्वरः—धैवतः ॥

१ २ ३२उ ३ २३ १ २ ३ १२ ३ १ २ ३ १ २
५३३. प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
३ २ ३ १ २ ३ १ २र ३ २उ ३ १ २ ३ १ २
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥१॥
२ ३ २ ३ १ २ ३ २ ३ २ ३ २ ३ १ २र
५३४. प्र ते धारा मधुमतीरसृग्रन् वारं यत्पूतो अत्येष्यव्यम् ।
१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २
पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्कैः ॥२॥
१ २ ३क २र ३ १ २र ३ १ २र
५३५. प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय ।
३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २र
स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः ॥३॥
१ २ ३ १ २ ३ १ २र ३ २ ३ १ २र ३ १ २
५३६. प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत् ।
२ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥४॥
२ ३ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २र
५३७. तक्षद्यदी मनसो वेनतो वाग् ज्येष्ठस्य धर्मं द्युक्षोरनीके ।
१ २ ३ २ ३ १ २ ३ २उ ३ १ २ ३ २ ३ २ ३ १ २
आदीमायन् वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥५॥
३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
५३८. साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
२ ३ १ २ ३ १ २र ३ १ २ ३ २ ३ २ ३ २
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥६॥
२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २र
५३९. अधि यदस्मिन् वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १२ ३ १ २
अपो वृणानः पवते कवीयान् व्रजं न पशुवर्धनाय मन्म ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ ३ १ २
५४०. इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
२ ३ २ ३ १ २ ३ १ २र ३ १ २ ३ २ ३ १ २ ३ १ २
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन् वृजनस्य राजा ॥८॥
१ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २
५४१. अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।
३ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥९॥
३ १ २र ३ १ २ ३ १ २र ३ २
५४२. महत् तत् सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
१ २ ३ २ ३ १ २ ३ १ २र ३ २ ३ २ ३ १ २
अदधादिन्द्रे पवमान ओजोऽजनयत् सूर्ये ज्योतिरिन्दुः ॥१०॥
१ २ ३ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २
५४३. असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा ।
२ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निं सदनेष्वच्छ ॥११॥
३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
५४४. अपामिवेदूर्मयस्तर्त्तुराणाः प्र मनीषा ईरते सोममच्छ ।
३ २ ३ १ २ ३ २ ३ १ २र ३ २ ३ १ २
नमस्यन्तीरुप च यन्ति सं चाच विशन्त्युशतीरुशन्तम् ॥१२॥

इति पञ्चमी दशतिः ॥५॥ सप्तमः खण्डः ॥७॥ (स्व०१९। उ०३। धा०८२। दा ॥)

॥ इति षष्ठप्रपाठकस्य प्रथमोऽर्धः ॥

अथ षष्ठप्रपाठकस्य द्वितीयोऽर्धः

अष्टमी दशतिः

ऋषिः—१ अन्धीगुः श्यावाश्विः; २ नहुषो मानवः; ३ ययातिर्नाहुषः; ४ मनुः सांवरणः; ५, ८ ऋजिष्वाम्बरीषौ; ६, ७ रेभसूनू काश्यपौ; ९ प्रजापतिर्वाच्यो वा ॥ देवता—पवमानः सोमः ॥ छन्दः—१-६, ८, ९ अनुष्टुप्; ७ बृहती ॥ स्वरः—१-६, ८, ९ गान्धारः; ७ मध्यमः ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २
५४५. पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
२ ३ १ २ ३ १ २ ३क २र
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्वयम् ॥१॥
३ २ ३ २ ३ २उ ३ १ २ ३ १ २
५४६. अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
२ ३ १ २ ३ १ २ ३क २र ३ १ २ ३ २
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥२॥
३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
५४७. सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
३ १ २ ३ १ २ ३ १ २
पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २ ३ १ २ ३ १ २ ३ १ २
५४८. सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।
३ २ ३ १ २ ३ १ २ ३क २र ३ १ २
मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥४॥
३ १ २ ३ १ २ ३ १ २ ३ १ २
५४९. अभी नो वाजसातमं रयिमर्ष शतस्पृहम् ।
१ २ ३ १ २ ३१ २३ १ २
इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥५॥
३ १ २ ३ १२ ३१ २र ३ १ २
५५०. अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
३ २उ ३ १ २ ३ १ २ ३ १ २
वत्सं न पूर्वे आयुनि जातं रिहन्ति मातरः ॥६॥
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
५५१. आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौंस्यम् ।
३ २उ ३ १ २ ३ १ २ ३ १ २र ३ १ २
शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः ॥७॥
२ ३ १ २ ३ १ २र ३ १ २ ३ १ २
५५२. परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
२ ३ २उ ३ २उ ३ १ २ ३ १ २र
यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥८॥
१ २ ३ १ २र ३ २ ३ १ २ ३ १ २र
५५३. प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः ।
२ ३ १ २ ३ १ २ ३ २ ३ १ २र
अप श्वानमराधसं हता मखं न भृगवः ॥९॥

इति षष्ठी दशतिः ॥६॥ अष्टमः खण्डः ॥८॥ इत्यनुष्टुभः (एका बृहती) ॥ (स्व०१०। उ०५। धा०६१। म ॥)

नवमी दशतिः

ऋषिः—१-३, ५ कविर्भार्गवः; ४, ६ ऋषिगणः; ७ रेणुर्वैश्वामित्रः; ८ वेनो भार्गवः; ९ वसुर्भारद्वाजः; १० वत्सप्रीः; ११अत्रिर्भौमः; १२ पवित्र आङ्गिरसः ॥ देवता—पवमानः सोमः ॥ छन्दः—जगती ॥ स्वरः—निषादः ॥

३ २ ३ १ २ ३ १ २ ३ १ २ ३ २उ ३ २ ३ १ २
५५४. अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
१ २र ३ २ ३ २उ ३ २ ३ १ २ ३ २
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद् विचक्षणः ॥१॥
३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
५५५. अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद् देवेषु हरयः ।
१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ॥२॥
३ २उ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
५५६. एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।
३ २ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अभ्यृ३तस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥३॥
१ २ ३ २ ३ १ २ ३ २उ ३ २ ३ १ २र ३ १ २
५५७. प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति सङ्गिरम् ।
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
मर्यइव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ २ ३१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
५५८. धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
१ २ ३ २उ ३ १ २र ३ २ ३ १ २ ३ २
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ॥५॥
१ २ ३ १ २ ३ २उ ३ १ २ ३ १ २र ३ २
५५९. वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
३ १ २र ३ १ २ ३ १ २ ३ १ २ ३१ २ ३ १ २
प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥६॥
१ २ ३ २ ३१२ ३ २ ३ १ २ ३१ २
५६०. त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
३ २ ३ १ २र ३ २ ३ १ २ ३ २ ३१ २र
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥७॥
१ २ ३ १२ ३ १ २ ३ १ २र ३ १२ ३ २
५६१. इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
२ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥८॥
१ २ ३ १ २ ३ २उ ३ २ ३ १ २ ३ २ ३ १ २र
५६२. असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
३ २उ ३१ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥९॥
२ ३२उ ३ १ २ ३ २ ३ १ २ ३ २ ३ २उ ३ १ २
५६३. प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥१०॥
३ २ ३क २र ३ १ २ ३ १ २ ३ २ ३क २र
५६४. अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते ।
१ २ ३ २ ३१२ ३१२ ३ २ ३२३ १ २
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥११॥
३ १ २ ३ १ २ ३१ २र ३ १ २ ३ १ २
५६५. पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
१ २ ३ २उ ३ १ २ ३ २ ३ १ २र ३ १ २र
अतप्ततनूर्न तदामो अश्नुते शृतास इद् वहन्तः सं तदाशत ॥१२॥

इति सप्तमी दशतिः ॥७॥ नवमः खण्डः ॥९॥ इति जगत्यः ॥ (स्व०१५। उ०११। धा०१३७। पे ॥)

दशमी दशतिः

ऋषिः—१, ७, ११ अग्निश्चाक्षुषः; २ चक्षुर्मानवः; ३, ४, ९, १० पर्वतनारदौ; ५ त्रित आप्त्यः; ६ मनुराप्सवः; ८, १२ द्वित आप्त्यः ॥ देवता—इन्द्रः ॥ छन्दः—उष्णिक् ॥ स्वरः—ऋषभः ॥

२ ३१ २ ३२ ३१ २र ३ १२
५६६. इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।
३ २ ३ २ ३ १ २ ३१२
श्रुष्टे जातास इन्दवः स्वर्विदः ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २ ३ १ २३१ २ ३ १२
५६७. प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।
३२ ३ २ ३१ २ ३१२
द्युमन्तं शुष्ममा भर स्वर्विदम् ॥२॥

१ २ ३ १ २र ३२३ १ २
५६८. सखाय आ नि षीदत पुनानाय प्र गायत ।
२ ३ २ ३१ २र ३ २
शिशुं न यज्ञैः परि भूषत श्रिये ॥३॥

१ २ ३ १२ ३२३१ २
५६९. तं वः सखायो मदाय पुनानमभि गायत ।
२ ३ २ ३ १ २ ३ १ २
शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥४॥

३ १ २र ३ १ २ ३ २ ३ २ ३ १ २
५७०. प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम् ।
२ ३ १ २ ३ १ २३१२ ३ २
विश्वा परि प्रिया भुवदध द्विता ॥५॥

१२ ३ १ २ ३ २ ३ १ २ ३ १२
५७१. पवस्व देववीतय इन्दो धाराभिरोजसा ।
२ ३ २ ३ १२
आ कलशं मधुमान्त्सोम नः सदः ॥६॥

१२ ३ २ ३ २उ ३ २ ३ १ २
५७२. सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
१ २ ३ १ २र ३ १ २
अग्रे वाचः पवमानः कनिक्रदत् ॥७॥

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
५७३. प्र पुनानाय वेधसे सोमाय वच उच्यते ।
३ १ २र ३ १ २ ३ १ २
भृतिं न भरा मतिभिर्जुजोषते ॥८॥

१ २ ३ १२ ३ १ २
५७४. गोमन्न इन्दो अश्ववत् सुतः सुदक्ष धनिव ।
१ २ ३ २ ३ २ ३ १ २
शुचिं च वर्णमधि गोषु धारय ॥९॥

३ १ २ ३ १ २ ३ १ २र
५७५. अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।
१ २ ३ १ २ ३ १ २
गोभिष्टे वर्णमभि वासयामसि ॥१०॥

१ २ ३ २उ ३ २ ३ १ २ ३ १ २
५७६. पवते हर्यतो हरिरति ह्वरांसि रंह्या ।
३क २र ३ १ २ ३ २ ३ १ २
अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥११॥

२ ३ १ २ ३ २ ३ १ २ ३ १ २
५७७. परि कोशं मधुश्चुतं सोमः पुनानो अर्षति ।
३ २उ ३ १ २ ३ १ २
अभि वाणीर्ऋषीणां सप्ता नूषत ॥१२॥

इति अष्टमी दशतिः ॥८॥ दशमः खण्डः ॥१०॥ (स्व०८। उ०३। धा०४६। ठ ॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकादशी दशतिः

ऋषिः—१ गौरिवीतिः शाक्त्यः; २ ऊर्ध्वसद्मा आङ्गिरसः; ३ ऋजिश्वा भरद्वाजः; ४ कृतयशा आङ्गिरसः; ५ ऋणञ्चयः; ६ शक्तिर्वासिष्ठः; ७, ८ उरुराङ्गिरसः ॥ देवता—पवमानः सोमः ॥ छन्दः—१-४, ६ ककुबुष्णिक्; ५ यवमध्या गायत्री; ७, ८ काकुभः प्रगाथः (७ ककुबुष्णिक्; ८ सतोबृहती) ॥ स्वरः—१-४, ६ ऋषभः; ५ षड्जः; ७, ८ मध्यमः ॥

५७८. पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥१॥
५७९. अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम् ।
वि कोशं मध्यमं युव ॥२॥
५८०. आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम् ।
वनप्रक्षमुदप्रुतम् ॥३॥
५८१. एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवोदुहम् ।
विश्वा वसूनि बिभ्रतम् ॥४॥
५८२. स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।
सोमो यः सुक्षितीनाम् ॥५॥
५८३. त्वं ह्या३ङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयन् ॥६॥
५८४. एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः ।
क्रीडन्नूर्मिरपामिव ॥७॥
५८५. य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ।
ओ३म् वर्मीव धृष्णवा रुज । ओम् ॥ ॥८॥

इति नवमी दशतिः ॥९॥ एकादशः खण्डः ॥११॥ (स्व०७। उ०१। धा०४३। चि ।।) इत्युष्णिक्ककुभः ॥

इति षष्ठप्रपाठकस्य द्वितीयोऽर्धः

॥ इति पञ्चमोऽध्यायः इति पवमानं काण्डम् ॥

इति छन्दोग प्रकृति ऋक् समाप्ता । इति सौम्यं पावमानं काण्डं पर्व वा समाप्तम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अथ आरण्यं काण्डम् ।।

अथ षष्ठोऽध्यायः

अथ षष्ठप्रपाठकस्य तृतीयोऽर्धः

प्रथमा दशतिः

ऋषिः—१ भरद्वाजः; २ वसिष्ठः; ३, ६ वामदेवः; ४ शुनःशेपः; ५ गृत्समदः; ७, ८ अमहीयुः; ९ आत्मा ।। देवता—१-३ इन्द्रः; ४ वरुणः; ५, ७, ८ पवमानः सोमः; ६ विश्वेदेवाः; ९ अन्नम् ।। छन्दः—१ बृहती; २, ४, ५, ९ त्रिष्टुप्; ३, ७, ८ गायत्री; ६ एकपदा त्रिष्टुप् ।। स्वरः—१ मध्यमः; २, ४-६, ९ धैवतः; ३, ७, ८ षड्जः ।।

२ ३ १ २ ३ १ २३ १२ ३ १२३ १२
५८६. इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पुपुरि श्रवः ।
१ २र ३ १२३ १ २र
यद्दिधृक्षेम वज्रहस्त रोदसी ओभे सुशिप्र पप्राः ।।१।।

२ ३ २ ३ १२ ३१ २र३२ ३१२३ १२
५८७. इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य ।
१ २ ३२ ३ १२ ३२उ ३ १२ ३२
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक् ।।२।।

२ ३२३ २ ३१२ ३२उ ३ २३क २र १ २ ३ १ २ ३२
५८८. यस्येदमा रजोयुजस्तुजे जने वनं स्वः । इन्द्रस्य रन्त्यं बृहत् ।।३।।

१२३१ २ ३ १ २३ १ २र ३१ २ २र ३१ २
५८९. उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
१२ ३२ ३१ २र ३२ ३ १२
अथादित्य व्रत वयं तवानागसो अदितये स्याम ।।४।।

१ २ ३१ २र ३१२ ३१ २र ३ १२
५९०. त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
१ २ ३ १ २र ३१२३ १ २ ३ २ ३२
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धु पृथिवी उत द्यौः ।।५।।

३१ २र ३२उ ३ २
५९१. इमं वृषणं कृणुतैकमिन्माम् ।।६।।

२ ३ १ २ ३ १ २३ १२ ३१ २
५९२. स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
३ १ २र
वरिवोवित् परिस्रव ।।७।।

३१ २र ३ २उ ३ २ ३ १ २
५९३. एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।
१२
सिषासन्तो वनामहे ।।८।।

३१२ ३ २ ३ २ ३ १२३१ २ ३१२ ३ १२
५९४. अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
२ ३ १२३ २उ ३१२ ३२उ ३१२३१ २
यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ।।९।।

इति प्रथमा दशतिः ।।१।। प्रथमः खण्डः ।।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितीया दशतिः

ऋषिः—१ श्रुतकक्षः; २ पवित्रः; ३, ४ मधुच्छन्दा वैश्वामित्रः; ५ प्रथः; ६ गृत्समदः; ७ नृमेधपुरुमेधौ ॥ देवता—१, ३, ४, ७ इन्द्रः; २ पवमानः; ५ विश्वेदेवाः; ६ वायुः ॥ छन्दः—१, ३, ४, ६ गायत्री; २ जगती; ५ त्रिष्टुप्; ७ अनुष्टुप् ॥ स्वरः—१, ३, ४, ६ षड्जः; २ निषादः; ५ धैवतः; ७ गान्धारः ॥

५९५. त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत् पयः ॥१॥

५९६. अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥२॥

५९७. इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥३॥

५९८. इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥४॥

५९९. प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात् सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥५॥

६००. नियुत्वान् वायवा गह्ययं शुक्रो अयामि ते ।
गन्तासि सुन्वतो गृहम् ॥६॥

६०१. यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥७॥

इति द्वितीया दशतिः ॥२॥ द्वितीयः खण्डः ॥२॥

तृतीया दशतिः

ऋषिः—१, ५, ७, १० वामदेवः; २, ३ गोतमः; ४ मधुच्छन्दाः; ६ गृत्समदः; ८, ९ भरद्वाजो बार्हपत्यः; ११ हिरण्यस्तूपः; १२, १३ विश्वामित्रः ॥ देवता—१ प्रजापतिः; २, ३ पवमानः सोमः; ४-६, १३ अग्निः; ७ रात्रिः; ८ वैश्वानरः; ९ विश्वेदेवाः; १० लिङ्गोक्ताः; ११ इन्द्रः; १२ आत्मा । छन्दः—१, ७ अनुष्टुप्; २, ३, ५, ६, ९, ११-१३ त्रिष्टुप्; ४ गायत्री; ८ जगती; १० महापङ्क्तिः ॥ स्वरः—१, ७ गान्धारः; २, ३, ५, ६, ९, ११-१३ धैवतः; ४ षड्जः; ८ निषादः; १० पञ्चमः ॥

६०२. मयि वर्चो अथो यशोऽथो यज्ञस्य यत्पयः ।
परमेष्ठी प्रजापतिर्दिवि द्यामिव दृंहतु ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२ ३ १ २ ३ १ २ ३ २ ३ १ २र ३ १ २
६०३. सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
३ १ २ ३ १ २ ३ १ २र ३ १ २
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥२॥
२ ३ १ २र ३ २ ३ २ ३ १ २ ३ २
६०४. त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
१ २र ३ २ १ २ ३ १ २र ३ १ २र
त्वमातनोरुर्वा३न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥३॥
३ १ २ ३ १ २ ३ १ २ ३२३ १ २ १ २ ३ १ २
६०५. अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥४॥
१ २ ३२उ ३ २ ३ २ ३ १ २ ३ १ २र
६०६. ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जानन् ।
१ २ ३ २३क २र ३ २ ३ १ २ ३ १ २र ३ १ २
ता जानतीरभ्यनूषत क्षा आविर्भुवन्नरुणीर्यशसा गावः ॥५॥
२ ३ १ २र ३ १ २ ३ २ ३ २ ३क२र
६०७. समन्या यन्त्युपयन्त्यन्याः समानमूर्वं नद्यस्पृणन्ति ।
२ ३ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २
तमू शुचिं शुचयो दीदिवांसमपान्नपातमुप यन्त्यापः ॥६॥
१ २र ३ १ २ ३ १ २र ३ १ २र
६०८. आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति ।
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ॥७॥
३ २ ३ १ २ ३ २ ३ २उ ३ २ ३ १ २ ३ १ २ ३ १ २
६०९. प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नो वचो विदथा जातवेदसे ।
३ १ २ ३ १ २र ३ २ ३ १ २ ३ १ २ ३ १ २
वैश्वानराय मतिर्नव्यसे शुचिः सोमइव पवते चारुरग्नये ॥८॥
१ २ ३ १ २र ३ २ ३ १ २र ३ १ २र ३ १ २
६१०. विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
२ ३ १ २ ३ १ २ ३ २उ ३ १ २
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥९॥
१ २ ३ १ २ ३ १ २र ३ २
६११. यशो मा द्यावापृथिवी यशो मेन्द्रबृहस्पती ।
२ ३ १ २ ३ १ २ ३ १ २
यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम् ।
३ २ २ ३ २ ३ १ २ ३ १ २
यशस्व्या३स्याः संसदोऽहं प्रवदिता स्याम् ॥१०॥
१ २ ३ २ ३क २र ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
६१२. इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री ।
२ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥११॥
३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
६१३. अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
३ १ २ ३ १ २र ३ १ २र ३ १ २ ३ १ ३ १ २
त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम् ॥१२॥
२ ३ २ ३ १ २र ३ १ २र ३ १ २र ३ १ २
६१४. पात्यग्निर्विपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्य्यस्य ।
२ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २ ३ २
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥१३॥

इति तृतीया दशतिः ॥३॥ तृतीयः खण्डः ॥३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्थी दशतिः

ऋषिः—१, २, ८-१२ वामदेवः; ३-७ नारायणः ।। देवता—१ अग्निः; २ ऋतुः; ३-७ पुरुषः; ८ द्यावापृथिवी; ९, ११ इन्द्रः; १० आत्मन आशीः; १२ गौः ।। छन्दः—१, २ पंक्तिः; ३-७, ९, १० अनुष्टुप्; ८, ११, १२ त्रिष्टुप् ।। स्वरः—१, २ पञ्चमः; ३-७, ९, १० गान्धारः; ८, ११, १२ धैवतः ।।

६१५. भ्राजन्त्यग्ने समिधान दीदिवो जिह्वा चरत्यन्तरासनि ।
स त्वं नो अग्ने पयसा वसुविद्रयिं वर्चो दृशेऽदाः ।।१।।

६१६. वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः ।
वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ।।२।।

६१७. सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।।३।।

६१८. त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ।
तथा विष्वङ् व्यक्रामदशनानशने अभि ।।४।।

६१९. पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ।।५।।

६२०. तावानस्य महिमा ततो ज्यायाँश्च पूरुषः ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।६।।

६२१. ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।७।।

६२२. मन्ये वां द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनम् ।
द्यावापृथिवी भवतं स्योने ते नो मुञ्चतमंहसः ।।८।।

६२३. हरी त इन्द्र श्मश्रूण्युतो ते हरितौ हरी ।
तं त्वा स्तुवन्ति कवयः परुषासो वनर्गवः ।।९।।

६२४. यद्वर्च्चो हिरण्यस्य यद्वा वर्चो गवामुत ।
सत्यस्य ब्रह्मणो वर्चस्तेन मा सं सृजामसि ।।१०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२३ १२ ३ २ ३ २३क २र ३ १ २
६२५. सहस्तन्न इन्द्र दद्ध्योज ईशे ह्यस्य महतो विरप्शिन् ।
२ ३ २ ३ १ २र ३ १ २ ३ २ ३ १ २ ३ १ २
क्रतुं न नृम्णं स्थविरं च वाजं वृत्रेषु शत्रून्त्सुहना कृधी नः ॥११॥
३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
६२६. सहर्षभाः सहवत्सा उदेत विश्वा रूपाणि बिभ्रतीर्द्व्यूध्नीः ।
३ २ ३ २ ३ १ २ ३ २ ३ १ २र ३ २ ३ १ २
उरूः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ॥१२॥

इति चतुर्थी दशतिः ॥४॥ चतुर्थः खण्डः ॥४॥

पञ्चमी दशतिः

ऋषिः—१ शतं वैखानसाः; २ विभ्राट् सौर्यः; ३ कुत्सः; ४-६ सार्पराज्ञी; ७-१४ प्रस्कण्वः काण्वः ॥ देवता—१ अग्निः पवमानः; २-१४ सूर्यः ॥ छन्दः—१, ४-१४ गायत्री; २ जगती; ३ त्रिष्टुप् ॥ स्वरः—१, ४-१४ षड्जः; २ निषादः; ३ धैवतः ॥

२३ १२ ३ २३ २ ३ १ २ ३ १ २ ३ १ २
६२७. अग्न आयूँषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥१॥
३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
६२८. विभ्राड् बृहत् पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २र
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥२॥
३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २
६२९. चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥३॥
१ २र ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
६३०. आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥४॥
३ १ २ ३ २उ ३ १ २ ३ २ २र ३ १ २र
६३१. अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥५॥
३ २उ ३ १ २ ३ १ २ ३ १ २ २ ३ २ ३ २ ३ १ २
६३२. त्रिंशद्धाम वि राजति वाक् पतङ्गाय धीयते । प्रति वस्तोरह द्युभिः ॥६॥
२ ३ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २
६३३. अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः । सूराय विश्वचक्षसे ॥७॥
१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ १ २ ३ १ २
६३४. अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा ॥८॥
३ १ २ ३ १ २ ३ १ २ २ ३ १ २ ३ २
६३५. तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् ॥९॥
३ २ ३ २ ३ १ २ ३ १ २र ३ १ २
६३६. प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ।
३ २उ ३क २र ३ २
प्रत्यङ् विश्वं स्वर्दृशे ॥१०॥
१ २ ३ १ २ ३ २ ३ २ ३ १ २
६३७. येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
१ २ ३ १ २
त्वं वरुण पश्यसि ॥११॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६३८. उद् द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः ।
पश्यञ्जन्मानि सूर्य ॥१२॥

६३९. अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्र्यः ।
ताभिर्याति स्वयुक्तिभिः ॥१३॥

६४०. सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केशं विचक्षण ॥१४॥

इति पञ्चमी दशतिः ॥५॥ पञ्चमः खण्डः ॥५॥

॥ इत्यारण्यं काण्डम् ॥

इति षष्ठप्रपाठकः षष्ठोऽध्यायश्च समाप्तः

॥ इति सामवेद-संहितायां पूर्वार्चिकः ॥

अथ महानाम्न्यार्चिकः

ऋषिः–१-१० इन्द्रो वा प्रजापतिर्वा विष्णुर्वा विश्वामित्रो वा ॥ देवता–१-९ इन्द्रः; १० लिङ्गोक्ताः ॥ छन्दः–१-९ विराट्; १० पदपंक्तिः ॥ स्वरः–१-९ गान्धारः; १० पञ्चमः ॥

६४१. विदा मघवन् विदा गातुमनुशंसिषो दिशः ।
शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥१॥

६४२. आभिष्ट्वमभिष्टिभिः स्वा३ऽर्न्नांशुः ।
प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे ॥२॥

६४३. एवा हि शक्रो राये वाजाय वज्रिवः ।
शविष्ठ वज्रिन्नृञ्जसे मंहिष्ठ वज्रिन्नृञ्जस आ याहि पिब मत्स्व ॥३॥

६४४. विदा राये सुवीर्यं भुवो वाजानां पतिर्वशाँ अनु ।
मंहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम् ॥४॥

६४५. यो मंहिष्ठो मघोनामंशुर्न शोचिः ।
चिकित्वो अभि नो नयेन्द्रो विदे तमु स्तुहि ॥५॥

६४६. ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम् ।
स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
६४७. इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम् ।
१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २
स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः ॥७॥
१ २ ३ १ २ ३ १ २र
६४८. पूर्वस्य यत्ते अद्रिवोऽशुर्मदाय ।
३ १ २र ३ १ २
सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
३ २र ३ २ ३ १ २र ३ १ २
वशी हि शक्रो नूनं तन्नव्यं संन्यसे ॥८॥
३ १ २र ३ २ ३ १ २
६४९. प्रभो जनस्य वृत्रहन्त्समर्येषु ब्रवावहै ।
२ ३ २उ ३ १ २ ३ १ २ ३ २ ३ १ २
शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥९॥

॥ अथ पञ्च पुरीषपदानि ॥

३ २ १ ३ १ २ ३ १ २
६५०. एवाह्येऽ३व । एवा ह्यग्ने । एवा हीन्द्र ।
३ १ २र ३ १ २र १ ३ १ २र
एवा हि पूषन् । एवा हि देवाः । ओं एवा हि देवाः । ओम् ॥१०॥

॥ इति महानाम्न्यार्चिकः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीशिवाभ्यां नमः

ओं नमस्सामवेदाय

सामवेदपूर्वार्चिकपदपाठः

प्रथमः प्रपाठकः

(१)

१. ओं । अग्ने । आ । याहि । वीतये ॥ गृणानः । हव्यदातये । हव्य । दातये ॥
नि । होता । सत्सि । बर्हिषि ॥१॥

२. त्वं । अग्ने । यज्ञानां । होता ॥ विश्वेषां । हितः ॥ देवेभिः । मानुषे । जने ॥२॥

३. अग्निं । दूतम् । वृणीमहे ॥ होतारम् । विश्ववेदसम् । विश्व । वेदसम् ॥
अस्य । यज्ञस्य । सुक्रतुम् । सु । क्रतुम् ॥३॥

४. अग्निः । वृत्राणि । जङ्घनत् ॥ द्रविणस्युः । विपन्यया ॥
समिद्धः । सम् । इद्धः । शुक्रः । आहुतः । आ । हुतः ॥४॥

५. प्रेष्ठम् । वः । अतिथिम् ॥ स्तुषे । मित्रम् । मि । त्रम् । इव । प्रियम् ॥
अग्ने । रथम् । न । वेद्यम् ॥५॥

६. त्वम् । नः । अग्ने । महोभिः ॥ पाहि । विश्वस्याः । अरातेः । अ । रातेः ॥
उत । द्विषः । मर्त्यस्य ॥६॥

७. आ । इहि । उ । सु । ब्रवाणि । ते ॥ अग्ने । इत्था । इतराः । गिरः ॥
एभिः । वर्द्धासे । इन्दुभिः ॥७॥

८. आ । ते । वत्सः । मनः । यमत् ॥ परमात् । चित् । सधस्थात् । सध ।
स्थात् ॥, अग्ने । त्वाम् । कामये । गिरा ॥८॥

९. त्वाम् । अग्ने । पुष्करात् । अधि ॥ अथर्वा । निः । अमन्थत ॥
मूर्ध्नः। विश्वस्य । वाघतः ॥९॥

१०. अग्ने । विवस्वत् । वि । वस्वत् । आ । भर ॥ अस्मभ्यम् । ऊतये । महे ॥
देवः । हि । असि । नः । दृशे ॥१०॥

(आद्युदात्तः - ३३ अवग्रहः १ पदम् १२१) (ढ - दशती)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२)

११. नमः । ते । अग्ने । ओजसे ॥ गृणन्ति । देव । कृष्टयः ॥
अमैः । अमित्रम् । अ । मित्रम् । अर्दय ॥१॥

१२. दूतं । वः । विश्ववेदसम् । विश्व । वेदसम् ॥ हव्यवाहम् । हव्य । वाहम् ।
अमर्त्यं । अ । मर्त्यम् ॥ यजिष्ठम् । ऋञ्जसे । गिरा ॥२॥

१३. उप । त्वा । जामयः । गिरः ॥ देदिशतीः । हविष्कृतः । हविः । कृतः ॥
वायोः । अनीके । अस्थिरन् ॥३॥

१४. उप । त्वा । अग्ने । दिवेदिवे । दिवे । दिवे ॥ दोषावस्तः । दोषा । वस्तः ।
धिया । वयं ॥ नमः । भरन्तः । आ । इमसि ॥४॥

१५. जराबोध । जरा । बोध । तत् । विविड्ढि ॥ विशेविशे । विशे । विशे ।
यज्ञियाया ॥ स्तोमम् । रुद्राय । दृशीकम् ॥५॥

१६. प्रति । त्यम् । चारुम् । अध्वरम् ॥ गोपीथाय । प्र । हूयसे ॥
मरुद्भिः । अग्ने । आ । गहि ॥६॥

१७. अश्वम् । न । त्वा । वारवन्तम् ॥ वन्दध्यै । अग्निं । नमोभिः ॥
सम्राजन्तम् । सम् । राजन्तम् । अध्वराणाम् ॥७॥

१८. और्वभृगुवत् । और्व । भृगुवत् । शुचिम् ॥ अप्नवानवत् । आ । हुवे ॥
अग्निम् । समुद्रवाससम् । समुद्र । वाससम् ॥८॥

१९. अग्निम् । इन्धानः । मनसा ॥ धियम् । सचेत । मर्त्यः ॥
अग्निम् । इन्धे । विवस्वभिः । वि । वस्वभिः ॥९॥

२०. आत् । इत् । प्रत्नस्य । रेतसः ॥ ज्योतिः । पश्यन्ति । वासरम् ॥
परः । यत् । इध्यते । दिवि ॥१०॥

(आ-३३ अ-१३-प-११९-डो-द-२)

(३)

२१. अग्निम् । वः । वृधन्तम् ॥ अध्वराणाम् । पुरुतमम् ॥
अच्छ । नप्त्रे । सहस्वते ॥१॥

२२. अग्निः । तिग्मेन । शोचिषा ॥ यँसत् । विश्वम् । नि । अत्रिणम् ॥
अग्निः । नः । वँसते । रयिम् ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२३. अग्ने । मृड । महान् । असि ॥ अयः । आ । देवयुम् । जनम् ॥
इयेथ । बर्हिः । आसदम् । आ । सदम् ॥३॥

२४. अग्ने । रक्ष । नः । अँहसः ॥ प्रति । स्म । देव । रिषतः ॥
तपिष्ठैः । अजरः । अ । जरः । दह ॥४॥

२५. अग्ने । युँक्ष्व । हि । ये । तव ॥ अश्वासः । देव । साधवः ॥
अरम् । वहन्ति । आशवः ॥५॥

२६. नि । त्वा । नक्ष्य । विश्पते ॥ द्युमन्तम् । धीमहे । वयम् ॥
सुवीरम् । सु । वीरम् । अग्ने । आहुत । आ । हुत ॥६॥

२७. अग्निः । मूर्धा । दिवः । ककुत् ॥ पतिः । पृथिव्याः । अयम् ॥
अपाम् । रेताँसि । जिन्वति ॥७॥

२८. इमम् । उ । सु । त्वम् । अस्माकम् ॥ सनिं । गायत्रम् । नव्याँसम् ॥
अग्ने । देवेषु । प्र । वोचः ॥८॥

२९. तम् । त्वा । गोपवनः । गिरा ॥ जनिष्ठत् । अग्ने । अंगिरः ॥
सः । पावक । श्रुधि । हवम् ॥९॥

३० परि । वाजपतिः । वाज । पतिः । कविः ॥ अग्निः । हव्यानि । अक्रमीत् ॥
दधत् । रत्नानि । दाशुषे ॥१०॥

३१. उत् । उ । त्यम् । जातवेदसम् । जात । वेदसम् ॥ देवम् । वहन्ति । केतवः ॥
दृशे । विश्वाय । सूर्यम् ॥११॥

३२. कविम् । अग्निम् । उप । स्तुहि ॥ सत्यधर्माणम् । सत्य । धर्माणम् ।
अध्वरे ॥ देवम् । अमीवचातनम् । अमीव । चातनम् ॥१२॥

३३. शम् । नः । देवीः । अभिष्टये ॥ शम् । नः । भवन्तु । पीतये ॥
शम् । योः । अभि । स्रवन्तु । नः ॥१३॥

३४. कस्य । नूनम् । परीणसि । परि । नसि ॥ धियः । जिन्वसि । सत्पते । सत् ।
पते ॥ गोषाता । गो । साता । यस्य । ते । गिरः ॥१४॥

(आ-४३-अ११-प-१६७-टे-द-३)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४०

३५. यज्ञायज्ञा । यज्ञा । यज्ञा । वः । अग्नये ॥ गिरागिरा । गिरा । गिरा । च । दक्षसे ॥
प्रप्र । प्र । प्र । वयम् । अमृतम् । अ । मृतम् । जातवेदसम् । जात । वेदसम् ॥
प्रियम् । मित्रम् । मि । त्रम् । न । शँसिषम् ॥१॥
३६. पाहि । नः । अग्ने । एकया ॥ पाहि । उत । द्वितीयया ॥ पाहि । गीर्भिः । तिसृभिः ।
ऊर्जाम् । पते ॥ पाहि । चतसृभिः । वसो ॥२॥
३७. बृहद्भिः । अग्ने । अर्चिभिः ॥ शुक्रेण । देव । शोचिषा ॥ भरद्वाजे । भरत् । वाजे ।
समिधानः । सम् । इधानः । यविष्ठ्य ॥ रेवत् । पावक । दीदिहि ॥३॥
३८. त्वेइति । अग्ने । स्वाहुत । सु । आहुत ॥ प्रियासः । सन्तु । सूरयः ॥ यन्तारः ।
ये । मघवानः । जनानाम् ॥ ऊर्वम् । दयन्त । गोनाम् ॥४॥
३९. अग्ने । जरितः । विश्पतिः ॥ तपानः । देव । रक्षसः ॥ अप्रोषिवान् । अ ।
प्रोषिवान् । गृहपते । गृह । पते । महान् । असि ॥ दिवः । पायुः । दुरोणयुः । दुः ।
ओनयुः ॥५॥
४०. अग्ने । विवस्वत् । वि । वस्वत् । उषसः ॥ चित्रम् । राधः । अमर्त्य । अ । मर्त्य ॥
आ । दाशुषे । जातवेदः । जात । वेदः । वह । त्वम् ॥ अद्य । अ । द्य । देवान् ।
उषर्बुधः । उषः । बुधः ॥६॥
४१. त्वं । नः । चित्रः । ऊत्या ॥ वसो । राधाँसि । चोदय ॥ अस्य । रायः । त्वम् ।
अग्ने । रथीः । असि ॥ विदाः । गाधं । तुचे । तु । नः ॥७॥
४२. त्वम् । इत् । सप्रथाः । स । प्रथाः । असि ॥ अग्ने । त्रातः । ऋतः । कविः ॥ त्वां ।
विप्रासः । वि । प्रासः । समिधान । सम् । इधान । दीदिवः ॥ आ । विवासन्ति ।
वेधसः ॥८॥
४३. आ । नः । अग्ने । वयोवृधम् । वयः । वृधम् ॥ रयिं । पावक । शँस्यम् ॥ रास्व ।
च । नः । उपमाते । उप । माते । पुरुस्पृहम् । पुरु । स्पृहम् ॥ सुनीती । सु ।
नीती । सुयशस्तरम् । सु । यशस्तरम् ॥९॥
४४. यः । विश्वा । दयते । वसु ॥ होता । मन्द्रः । जनानाम् ॥ मधोः । न । पात्रा ।
प्रथमानि । अस्मै ॥ प्र । स्तोमाः । यन्तु । अग्नये ॥१०॥

(आ० ३३-अ० २५-प०-१९४णी)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(६)

४५. एना । वः । अग्निम् । नमसा ॥ ऊर्जः । नपातम् । आ । हुवे ॥ प्रियं । चेतिष्ठम् । अरतिं । स्वध्वरम् । सु । अध्वरम् ॥ विश्वस्य । दूतम् । अमृतम् । अ । मृतम् ॥१॥

४६. शेषे । वनेषु । मातृषु ॥ सं । त्वा । मर्तासः । इन्धते ॥ अतन्द्रः । अ । तन्द्रः । हव्यं । वहसि । हविष्कृतः । हविः । कृतः ॥ आत् । इत् । देवेषु । राजसि ॥२॥

४७. अदर्शि । गातुमित्तमः । गातु । वित्तमः ॥ यस्मिन् । व्रतानि । आदधुः । आ । दधुः ॥ उप । उ । सु । जातम् । आर्यस्य । वर्द्धनम् ॥ अग्निं । नक्षन्तु । नः । गिरः ॥३॥

४८. अग्निः । उक्थे । पुरोहितः । पुरः । हितः ॥ ग्रावाणः । बर्हिः । अध्वरे ॥ ऋचा । यामि । मरुतः । ब्रह्मणः । पते ॥ देवाः । अवः । वरेण्यम् ॥४॥

४९. अग्निम् । ईडिष्व । अवसे ॥ गाथाभिः । शीरशोचिषम् । शीर । शोचिषम् ॥ अग्निं । राये । पुरुमीढ । पुरु । मीढ । श्रुतं । नरः ॥ अग्निः । सुदीतये । सु । दीतये । छर्दिः ॥५॥

५०. श्रुधि । श्रुत्कर्ण । श्रुत् । कर्ण । वह्निभिः ॥ देवैः । अग्ने । सयावभिः । स । यावभिः ॥ आ । सीदतु । बर्हिषि । मित्रः । मि । त्रः । अर्यमा ॥ प्रातर्यावभिः । प्रातः । यावभिः । अध्वरे ॥६॥

५१. प्र । दैवोदासः । दैवः । दासः । अग्निः ॥ देवः । इन्द्रः । न । मज्मना ॥ अनु । मातरं । पृथिवीं । वि । वावृते ॥ तस्थौ । नाकस्य । शर्मणि ॥७॥

५२. अध । ज्मः । अध । वा । दिवः ॥ बृहतः । रोचनात् । अधि ॥ अया । वर्द्धस्व । तन्वा । गिरा । मम ॥ आ । जाता । सुक्रतो । सु । क्रतो । पृण ॥८॥

५३. कायमानः । वना । त्वम् ॥ यत् । मातृः । अजगन् । अपः ॥ न । तत् । ते । अग्ने । प्रमृषे । प्र । मृषे । निवर्तनम् । नि । वर्तनम् ॥ यत् । दूरे । दुः । ए । सन् । इह । अभुवः ॥९॥

५४. नि । त्वाम् । अग्ने । मनुः । दधे ॥ ज्योतिः । जनाय । शश्वते ॥ दीदेथ । कण्वे । ऋतजातः । ऋत । जातः । उक्षितः ॥ यं । नमस्यन्ति । कृष्टयः ॥

(अ - ४७, आ-२०, प-१९०,जै) दशति ॥५॥

॥ अर्धः प्रपाठक ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(६)

५५. देवः । वः । द्रविणोदाः । द्रविणः । दाः ॥ पूर्णाम् । विवष्टु । आसिचं । आ ।
सिचम् ॥ उत् । वा । सिञ्चध्वं । उप । वा । पृणध्वम् ॥ आत् । इत् । वः ।
देवः । ओहते ॥१॥

५६. प्र । एतु । ब्रह्मणः । पतिः ॥ प्र । देवी । एतु । सूनृता । सु । नृता ॥ अच्छा ।
वीरं । नर्यम् । पंक्तिराधसं । पंक्ति । राधसम् ॥ देवाः ।
यज्ञम् । नयन्तुः । नः ॥२॥

५७. ऊर्ध्वः । उ । सु । नः । ऊतये ॥ तिष्ठः । देवः । न । सविता ॥
ऊर्ध्वः । वाजस्य । सनिता । यत् । अञ्जिभिः ॥ वाघद्भिः । विह्वयामहे । वि ।
हवयामहे ॥३॥

५८. प्र । यः । राये । निनीषति ॥ मर्तः । यः । ते । वसो । दाशत् ॥
सः । वीरम् । धत्ते । अग्ने । उक्थशँसिनं । उक्थ । शँसिनम् ॥
त्मना । सहस्त्रपोषिणम् । सहस्त्र । पोषिणम् ॥४॥

५९. प्र । वः । यह्वम् । पुरुणाम् । विशां । दैवयतीनाम् ॥ अग्निं । सूक्तेभिः ।
सु । उक्तेभिः । वचोभिः । वृणीमहे ॥ यम् । सम् । इत् । अन्ये । अन् ।
ये । इन्धते ॥५॥

६०. अयम् । अग्निः । सुवीर्यस्य । सु । वीर्यस्य ॥ ईशे । हि । सौभगस्य । सौ ।
भगस्य ॥ रायः । ईशे । स्वपत्यस्य । सु । अपत्यस्य । गोमतः ॥ ईशे । हि ।
वृत्रहथानां । वृत्र । हथानाम् ॥६॥

६१. त्वम् । अग्ने । गृहपतिः । गृह । पतिः ॥ त्वम् । होता । नः । अध्वरे ॥
त्वम । पोता । विश्ववार । विश्व । वार । प्रचेताः । प्र । चेताः ॥ यक्षि । यासि ।
च । वार्यम् ॥७॥

६२. सखायः । स । खायः । त्वा । ववृमहे ॥ देवम् । मर्तासः । ऊतये ॥
अपाम् । नपातम् । सुभगं । सु । भगम् । सुदँससम् । सु । दँससम् ॥
सुप्रतूर्तिम् । सु । प्रतूर्तिम् । अनेहसम् । अन् । एहसम् ॥८॥

(आ-३४, अ-२१, प-१६१, त) दशति ॥ ६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(७)

६३. आ । जुहोता । हविषा । मर्जयध्वम् ॥ नि । होतारं । गृहपतिं । गृह । पतिं ।
दधिध्वम् ॥ इडः । पदे । नमसा । रातहव्यं । रात । हव्यं ॥ सपर्यत । यजतं ।
पस्त्यानाम् ॥१॥
६४. चित्रः । इत् । शिशोः । तरुणस्य । वक्षथः ॥ न । यः । मातरौ । अन्वेति । अनु ।
एति । धातवे ॥ अनूधाः । अन् । ऊधाः । यत् । अजीजनत् । अध । चित् । आ ॥
ववक्षत् । सद्यः । स । द्यः । महि । दूत्यं । चरन् ॥२॥
६५. इदं । ते । एकं । परः । उ । ते । एकम् ॥ तृतीयेन । ज्योतिषा । सं । विशस्व ॥
संवेशनः । सं । वेशनः । तन्वे । चारुः । एधि ॥ प्रियः । देवानां । परमे ।
जनित्रे ॥३॥
६६. इमम् । स्तोमं । अर्हते । जातवेदसे । जात । वेदसे ॥ रथं । इव । सं । महेम ।
मनीषया ॥ भद्रा । हि । नः । प्रमतिः । प्र । मतिः । अस्य । सँसदि । सम् । सदि ॥
अग्ने । सख्ये । स । ख्ये । मा । रिषाम । वयम् । तव ॥४॥
६७. मूर्धानं । दिवः । अरतिं । पृथिव्याः ॥ वैश्वानरं । वैश्व । नरं । ऋते । आ । जातं ।
अग्निम् ॥ कविं । सम्राजं । सं । राजं । अतिथिं । जनानाम् ॥ आसन् । नः । पात्रं ।
जनयन्त । देवाः ॥५॥
६८. वि । त्वत् । आपः । न । पर्वतस्य । पृष्ठात् ॥ उक्थेभिः । अग्ने । जनयन्त । देवाः ॥
तं । त्वा । गिरः । सुष्टुतयः । सु । स्तुतयः । वाजयन्ति ॥ आजिं । न । गिर्ववाहः ।
गिर्व । वाहः । जिग्युः । अश्वाः ॥६॥
६९. आ । वः । राजानं । अध्वरस्य । रुद्रम् ॥ होतारं । सत्ययजं । सत्य । यजं ।
रोदस्योः ॥ अग्निं । पुरा । तनयित्नोः । अचित्तात् । अ । चित्तात् ॥ हिरण्यरूपं ।
हिरण्य । रूपं । अवसे । कृणुध्वम् ॥७॥
७०. इन्धे । राजा । सं । अर्यः । नमोभिः ॥ यस्य । प्रतीकं । आहुतं । आ । हुतं ।
घृतेन ॥ नरः । हव्येभिः । ईडते । सबाधः । स । बाधः ॥ आ । अग्निः । अग्रं ।
उषसां । अशोचि ॥८॥
७१. प्र । केतुना । बृहता । याति । अग्निः ॥ आ । रोदसीइति । वृषभः । रोरवीति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिवः । चित् । अन्तात् । उपमां । उप । मां । उत् । आनट् ॥ अपां । उपस्थे ।
उप । स्थे । महिषः । ववर्ध ॥९॥

७२. अग्निं । नरः । दीधितिभिः । अरण्योः ॥ हस्तच्युत । हस्त । च्युतं । जनयत् ।
प्रशस्तम् । प्र । शस्तम् ॥ दूरेदृशं । दूरे । दृशं । गृहपतिं । गृह । पतिं । अथव्युं ।
अ । थव्युम् ॥१०॥

(आं - ५४, अ-२६, -प-२२८, तै) ॥ दशतिः ॥७॥

(८)

७३. अबोधि । अग्निः । समिधा । सं । इधा । जनानाम् ॥ प्रति । धेनुः । इव ।
आयतीं । आ । यतीं । उषासम् ॥ यह्वाः । इव । प्र । वयां । उज्जिहानाः । उत् ।
जिहानाः ॥ प्र । भानवः । सस्रते । नाकं । अच्छ ॥१॥

७४. प्र । भूः । जयन्तं । महां । विपोधां । विपः । धाम् ॥ मूरैः । अमूरं । अ । मूरं ।
पुरां । दर्माणम् ॥ नयन्तं । गीर्भिः । वना । धियं । धाः ॥ हरिश्मश्रुं । हरि । श्मश्रुं ।
न । वर्मणा । धनर्चिम् ॥२॥

७५. शुक्रं । ते । अन्यत् । अन् । यत् । यजतं । ते । अन्यत् । अन् । यत् ॥ विषुरुपे ।
विषु । रुपेइति । अहनी । अ । हनीइति । द्यौः । इव । असि ॥ विश्वाः । हि ।
मायाः । अवसि । स्वधावन् । स्व । धावन् ॥ भद्रा । ते । पूषन् । इह । रातिः ।
अस्तु ॥३॥

७६. इडां । अग्ने । पुरुदꣳसं । पुरु । दँसम् । सनिं । गोः । शश्वत्तमम् । हवमानाय ।
साध ॥ स्यात् । नः । सूनुः । तनयः । विजावा । वि । जावा ॥ अग्ने । सा ।
ते । सुमतिः । सु । मतिः । भूतु । अस्मेइति ॥४॥

७७. प्र । होता । जातः । महान् । नभोवित् । नभः । वित् ॥ नृषद्मा । नृ । सद्मा ।
सीदत् । अपां । विवर्ते । वि । वर्ते ॥ दधत् । यः । धायि । सुते । वयाꣳसि ॥ यन्ता ।
वसूनि । विधते । तनूपाः । तनू । पाः ॥५॥

७८. प्र । सम्राजं । सं । राजं । असुरस्य । अ । सुरस्य । प्रशस्तं । प्र । शस्तम् ॥ पुꣳसः ।
कृष्टीनां । अनुमाद्यस्य । अनु । माद्यस्य ॥ इन्द्रस्य । इव । प्र । तवसः । कृतानि ॥
वन्दद्वारा । वन्दमाना । विवष्टु ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७९. अरण्योः । निहितः । नि । हितः । जातवेदाः । जात । वेदाः ।। गर्भः । इव ।
इत् । सुभृतः । सु । भृतः । गर्भिणीभिः ।। दिवेदिवे । दिवे । दिवे । ईड्यः ।
जागृवद्भिः ।। हविष्मद्भिः । मनुष्येभिः । अग्निः ।।७।।

८०. सनात् । अग्ने । मृणसि । यातुधानान् । यातु । धानान् ।। न । त्वा । रक्षांःसि ।
पृतनासु । जिग्युः ।। अनु । दह । सहमूरान् । सह । मूरान् । कयादः । कया ।
अदः ।। मा । ते । हेत्याः । मुक्षत । दैव्यायाः ।।८।।

(आ-४५, अ-२९, प-२०१, भ) दशति ।।८।।

(९)

८१. अग्ने । ओजिष्ठं । आ । भर ।। द्युम्नं । अस्मभ्यं । अध्रिगो । अध्रि । गो ।। प्र ।
नः । राये । पनीयशे ।। रत्सि । वाजाय । पन्थाम् ।।१।।

८२. यदि । वीरः । अनु । स्यात् ।। अग्निं । इन्धीत । मर्त्यः ।। आजुह्वत् । आ । जुह्वत् ।
हव्यं । अनुषक् । अनु । सक् ।। शर्म । भक्षीत । दैव्यम् ।।२।।

८३. त्वेषः । ते । धूमः । ऋण्वति ।। दिवि । सन् । शुक्रः । आततः । आ । ततः ।।
सूरः । न । हि । द्युता । त्वम् ।। कृपा । पावक । रोचसे ।।३।।

८४. त्वं । हि । क्षैतवत् । यशः ।। अग्ने । मित्रः । मि । त्रः । न । पत्यसे ।। त्वं ।
विचर्षणे । वि । चर्षणे । श्रवः ।। वसो । पुष्टिं । न । पुष्यसि ।।४।।

८५. प्रातः । अग्निः । पुरुप्रियः । पुरु । प्रियः ।। विशः । स्तवेत । अतिथिः ।। विश्वे ।
यस्मिन् । अमर्त्ये । अ । मर्त्ये ।। हव्यं । मर्तासः । इन्धते ।।५।।

८६. यत् । वाहिष्ठं । तत् । अग्नये ।। वृहत् । अर्च । विभावसो । विभा । वसो ।।
महिषी । इव । त्वत् । रयिः ।। त्वत् । वाजाः । उत् । ईरते ।।६।।

८७. विशोविशः । विशः । विशः । वः । अतिथिम् ।। वाजयन्तः । पुरुप्रियं । पुरु ।
प्रियम् ।। अग्निं । वः । दुर्यं । दुः । यं । वचः ।। स्तुषे । शूषस्य । मन्मभिः ।।७।।

८८. बृहत् । वयः । हि । भानवे ।। अर्च । देवाय । अग्नये ।। यं । मित्रं । मि । त्रं ।
न । प्रशस्तये । प्र । शस्तये ।। मर्तासः । दधिरे । पुरः ।।८।।

८९. अगन्म । वृत्रहन्तमं । वृत्र । हन्तमम् ।। ज्येष्ठं । अग्निं । आनवम् ।। यः । स्म ।
श्रुतर्वन् । आर्क्षे ।। बृहदनीकः । बृहत् । अनीकः । इध्यते ।।९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

९०. जातः । परेण । धर्मणा ॥ यत् । सवृद्भिः । स । वृद्भिः । सह । अभुवः ॥ पिता ।
यत् । कश्यपस्य । अग्निः ॥ श्रद्धा । श्रत् । धा । माता । मनुः । कविः ॥१०॥

(आ०-४६, अ०-१८, प०-१७३ गिः) ॥ दशति ॥९॥

(१०)

९१. सोमं । राजानं । वरुणम् ॥ अग्निं । अन्वारभामहे । अनु । आऽरभामहे ॥
आदित्यं । आ । दित्यं । विष्णुं । सूर्यम् ॥ ब्रह्माणं । च । बृहः । पतिम् ॥१॥

९२. इतः । एते । उदारुहन् । उत् । आरुहन् ॥ दिवः । पृष्ठानि । आ । अरुहन् ॥ प्र ।
भूः । जयः । यथा । पथा ॥ उत् । द्यां । अंगिरसः । ययुः ॥२॥

९३. राये । अग्ने । महे । त्वा ॥ दानाय । सं । इधीमहि ॥ ईडिष्व । हि । महे ।
वृषन् ॥ द्यावा । होत्राय । पृथिवीइति ॥३॥

९४. दधन्वे । वा । यत् । ईं । अनु ॥ वोचत् । ब्रह्म । इति । वेः । उ । तत् ॥ परि ।
विश्वानि । काव्या ॥ नेमिः । चक्रं । इव । अभुवत् ॥४॥

९५. प्रति । अग्ने । हरसा । हरः ॥ शृणाहि । विश्वतः । परि ॥ यातुधानस्य ।
यातु । धानस्य । रक्षसः ॥ बलं । नि । उब्ज । वीर्यम् ॥५॥

९६. त्वं । अग्ने । वसून् । इह ॥ रुद्रान् । आदित्यान् । आ । दित्यान् । उत ॥
यज । स्वध्वरं । सु । अध्वरम् । जनम् ॥ मनुजातम् । मनु । जातं । घृतप्रुषं ।
घृत । प्रुषम् ॥६॥

(आ०-३४, अ०-८, प०-१०१, द) दशति १० ॥

॥ इति प्रथमः प्रपाठकः ॥

(१)

९७. पुरु । त्वा । दाशिवान् । वोचे ॥ अरिः । अग्ने । तव । स्वित् । आ ॥ तोदस्य ।
इव । शरणे । आ । महस्य ॥१॥

९८. प्र । होत्रे । पूर्व्यं । वचः ॥ अग्नये । भरत । बृहत् ॥ विपां । ज्योतींऽषि । बिभ्रते ।
न । बेधसे ॥२॥

९९. अग्ने । वाजस्य । गोमतः ॥ ईशानः । सहसः । यहो ॥ अस्मेइति । देहि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जातवेदः । जात । वेदः । महि । श्रवः ॥३॥

१००. अग्ने । यजिष्ठः । अध्वरे ॥ देवान् । देवयते । यज ॥ होता । मन्द्रः । वि । राजसि । अति । स्रिधः ॥४॥

१०१. जज्ञानः । सप्त । मातृभिः ॥ मेधां । आ । अशासत । श्रिये ॥ अयं । ध्रुवः । रयीणां । चिकेतत् । आ ॥५॥

१०२. उत । स्या । नः । दिवा । मतिः ॥ अदितिः । अ । दितिः । ऊत्या । आ । गमत् ॥ सा । शंताता । शं । ताता । मयः । करत् । अप । स्रिधः ॥६॥

१०३. ईडिष्व । हि । प्रतीव्यं । प्रति । व्यम् ॥ यजस्व । जातवेदसं । जात । वेदसम् ॥ चरिष्णुधूमं । चरिष्णु । धूमं । अगृभीतशोचिषं । अगृभीत । शोचिषम् ॥७॥

१०४. न । तस्य । मायया । च । न ॥ रिपुः । ईशीत । मर्त्यः ॥ यः । अग्नये । ददाश । हव्यदातये । हव्य । दातये ॥८॥

१०५. अप । त्यं । वृजिनं । रिपुम् ॥ स्तेनं । अग्ने । दुराध्यं । दुः । आध्यम् ॥ दविष्ठं । अस्य । सत्पते । सत् । पते । कृधि । सुगं । सु । गम् ॥९॥

१०६. श्रुष्टि । अग्ने । नवस्य । मे ॥ स्तोमस्य । वीर । विश्पते ॥ नि । मायिनः । तपसा । रक्षसः । दह ॥१०॥

(आ०-३३, अ०-११, प०-१४१, ट) दशति ॥ १ ॥

(२)

१०७. प्र । मंहिष्ठाय । गायत ॥ ऋताव्ने । बृहते । शुक्रशोचिषे । शुक्र । शोचिषे ॥ उपस्तुतासः । उप । स्तुतासः । अग्नये ॥१॥

१०८. प्र । सः । अग्ने । तव । ऊतिभिः ॥ सुवीराभिः । सु । वीराभिः । तरति । वाजकर्मभिः । वाज । कर्मभिः ॥ यस्य । त्वं सख्यं । स । ख्यं । आविथ ॥२॥

१०९. तं । गूर्धय । स्वर्णरं । स्वः । नरम् ॥ देवासः । देवं । अरतिं । दधन्विरे ॥ देवत्रा । हव्यं । ऊहिषे ॥३॥

११०. मा । नः । हृणीथाः । अतिथिम् ॥ वसुः । अग्निः । पुरुप्रशस्तः । पुरु । प्रशस्तः । एषः ॥ यः । सुहोता । सु । होता । स्वध्वरः । सु । अध्वरः ॥४॥

१११. भद्रः । नः । अग्निः । आहुतः । आ । हुतः ॥ भद्रा । रातिः । सुभग । सु । भग ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भद्रः । अध्वरः ॥ भद्राः । उत । प्रशस्तयः । प्र । शस्तयः ॥५॥

११२. यजिष्ठं । त्वा । ववृमहे ॥ देवं । देवत्रा । होतारं । अमर्त्यं । अ । मर्त्यम् ॥ अस्य । यज्ञस्य । सुक्रतुं । सु । क्रतुम् ॥६॥

११३. तत् । अग्ने । द्युम्नं । आ । भर ॥ यत् । सासाह । सदने । कं । चित् । अत्रिणम् ॥ मन्युं । जनस्य । दूढ्यम् ॥७॥

११४. यत् । वै । उ । विश्पतिः । शितः ॥ सुप्रीतः । सु । प्रीतः । मनुषः । विशे ॥ विश्वा । इत् । अग्निः । प्रति । रक्षांसि । सेधति ॥८॥

(आ०-२३, अ०-१५, प०-१२१, ण) दशति ॥२॥

// इति आग्नेयकाण्ड समाप्तम् ///

॥ अथ ऐन्द्रंकाण्डम् ॥

(३)

११५. तत् । वः । गाय । सुते । सचा ॥ पुरुहूताय । पुरु । हूताय । सत्वने ॥ शं । यत् । गवे । न । शाकिने ॥१॥

११६. यः । ते । नूनं । शतक्रतो । शत । क्रतो ॥ इन्द्र । द्युम्नितमः । मदः ॥ तेन । नूनं । मदे । मदेः ॥२॥

११७. गावः । उप। वद । अवटे ॥ महीइति । यज्ञस्य । रप्सुदा । रप्सु । दा ॥ उभा । कर्णा । हिरण्यया ॥३॥

११८. अरं । अश्वाय । गायत ॥ श्रुतकक्ष । श्रुत । कक्ष । अरं । गवे ॥ अरं । इन्द्रस्य । धाम्ने ॥४॥

११९. तं । इन्द्रं । वाजयामसि ॥ महे । वृत्राय । हन्तवे ॥ सः । वृषा । वृषभः । भुवत् ॥५॥

१२०. त्वं । इन्द्र । बलात् । अधि ॥ सहसः । जातः । ओजसः॥ त्वं । सन् । वृषन् । वृषा । इत् । असि ॥६॥

१२१. यज्ञः । इन्द्रं । अवर्धयत् ॥ यत् । भूमिं । व्यवर्तयत् । वि । अवर्तयत् ॥ चक्राणः । ओपशं । ओ । पशम् । दिवि ॥७॥

१२२. यत् । इन्द्र । अहं । यथा । त्वं ॥ ईशीय । वस्वः । एकः । इत् ॥ स्तोता । मे । गोसखा । गो । सखा । । स्यात् ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१२३. पन्यंपन्यं । पन्यं । पन्यं । इत् । सोतारः ॥ आ । धावत । मद्याय ॥ सोमं । वीराय ।
शूराय ॥९॥

१२४. इदं । वसो । सुतं । अन्धः । पिब । सुपूर्णं । सु । पूर्णं । उदरं । उ । दरम् ॥
अनाभयिन् । अन् । आभयिन् । ररिम । ते ॥१०॥

(आ०-४६, आ०-११, प०१२८, कै) दशति ॥३॥

(४)

१२५. उत् । घ । इत् । अभि । श्रुतामघं । श्रुत । मघम् ॥ वृषभं । नर्यापसं । नर्य ।
अपसम् ॥ अस्तारं । एषि । सूर्य ॥१॥

१२६. यत् । अद्य । अ । द्य । कत् । च । वृत्रहन् । वृत्र । हन् ॥ उदगाः । उत् । अगाः ।
अभि । सूर्य ॥ सर्वं । तत् । इन्द्र । ते । वशे ॥२॥

१२७. यः । आनयत् । आ । अनयत् । परावतः ॥ सुनीती । सु । नीती । तुर्वशं । यदुम् ॥
इन्द्रः । सः । नः । युवा । सखा । स । खा ॥३॥

१२८. मा । नः । इन्द्र । अभि । आदिशः । आ । दिशः ॥ सूरः ॥ अक्तुषु । आ । यमत् ॥
त्वा । युजा । वनेम । तत् ॥४॥

१२९. आ । इन्द्र । सानसिं । रयिम् ॥ सजित्वानं । स । जित्वानं । सदासहं । सदा ।
सहम् ॥ वर्षिष्ठं । ऊतये । भर ॥५॥

१३०. इन्द्रं । वयं । महाधने । महा । धने ॥ इन्द्रं । अर्भे । हवामहे ॥ युजं । वृत्रेषु ।
वज्रिणम् ॥६॥

१३१. अपिबत् । कद्रुवः । कत् । द्रुवः । सुतम् ॥ इन्द्रः । सहस्रबाह्वे । सहस्र । बाह्वे ॥
तत्र । अददिष्ट । पौंस्यम् ॥७॥

१३२. वयं । इन्द्र । त्वायवः ॥ अभि । प्र । नोनुमः । वृषन् ॥ विद्धि । तु । अस्य । नः ।
वसो ॥८॥

१३३. आ । घ । ये । अग्निं । इन्धते ॥ स्तृणन्ति । बर्हिः । अनुषक् । अनु । सक् ॥ येषां ।
इन्द्रः । युवा । सखा । स । खा ॥९॥

१३४. भिन्धि । विश्वाः । अप । द्विषः । परि ॥ बाधः । जहि । मृधः ॥ वसु ।
स्पार्हम् । तत् । आ । भर ॥१०॥

(आ०-३८, अ०-१६, प०-१४२, ट) दशति ॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५)

१३५. इह । इव । शृण्वे । एषाम् ॥ कशाः । हस्तेषु । यत् । वदान् ॥ नि । यामन् । चित्रं । ऋंजते ॥१॥

१३६. इमे । उ । त्वा । वि । चक्षते ॥ सखायः । स । खायः । इन्द्र । सोमिनः ॥ पुष्टावन्तः । यथा । पशुम् ॥२॥

१३७. सं । अस्य । मन्यवे । विशः ॥ विश्वा । नमन्त । कृष्टयः ॥ समुद्राय । सं । उद्राय । इव । सिन्धवः ॥३॥

१३८. देवानां । इत् । अवः । महत् ॥ तत् । आ । वृणीमहे । वयम् ॥ वृष्णां । अस्मभ्यं । ऊतये ॥४॥

१३९. सोमानां । स्वरणम् ॥ कृणुहि । ब्रह्मणः । पते ॥ कक्षीवन्तं । यः । औशिजः ॥५॥

१४०. बोधन्मनाः । बोधत् । मनाः । इत् । अस्तु । नः ॥ वृत्रहा । वृत्र । हा । भूर्यासुतिः । भूरि । आसुतिः ॥ शृणोतु । शक्रः । आशिषं । आ । शिषम् ॥६॥

१४१. अद्य । अ । द्य । नः । देव । सवितरिति ॥ प्रजावत् । प्र । जावत् । सावीः । सौभगं । सौ । भगम् ॥ परा । दुःष्वप्न्यं । दुः । स्वप्न्यं । सुव ॥७॥

१४२. क्व । स्यः । वृषभः । युवा ॥ तुविग्रीवः । तुवि । ग्रीवः । अनानतः । अन् । आनतः ॥ ब्रह्मा । कः । तं । सपर्यति ॥८॥

१४३. उपह्वरे । उप । ह्वरे । गिरीणाम् ॥ सङ्गमे । सं । गमे । च । नदीनाम् ॥ धिया । विप्रः । वि । प्रः । अजायत ॥९॥

१४४. प्र । सम्राजं । सं । राजं । चर्षणीनाम् ॥ इन्द्रं । स्तोत । नव्यं । गीर्भिः ॥ नरं । नृषाहं । नृ । साहं । मंहिष्ठम् ॥१०॥

(आ०-३१, अ०-१७, प०-१३३, खि) दशति ॥५॥

॥ इति अर्धः प्रपाठकः ॥

(६)

१४५. अपात् । उ । शिप्री । अन्धसः ॥ सुदक्षस्य । सु । दक्षस्य । प्रहोषिणः । प्र । होषिणः ॥ इन्दोः । इन्द्रः । यवाशिर । यव । आशिरः ॥१॥

१४६. इमा । उ । त्वा । पूरुवसो । पुरु । वसो ॥ अभि । प्र । नोनवुः । गिरः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गावः । वत्सं । न । धेनवः ॥२॥

१४७. अत्र । अह । गोः । अमन्वत ॥ नाम । त्वष्टुः । अपीच्यम् ॥ इत्था । चन्द्रमसः ।
चन्द्र । मसः । गृहे ॥३॥

१४८. यत् । इन्द्रः । अनयत् । रितः ॥ महीः । अपः । वृषन्तमः ॥ तत्र । पूषा ।
अभुवन् । सचा ॥४॥

१४९. गौः । धयति । मरुताम् ॥ श्रवस्युः । माता । मघोनाम् ॥ युक्ता । वह्निः ।
रथानाम् ॥५॥

१५०. उप । नः । हरिभिः । सुतम् ॥ याहि । मदानां । पते ॥ उप । नः । हरिभिः ।
सुतम् ॥६॥

१५१. इष्टाः । होत्राः । असृक्षत ॥ इन्द्रं । वृधन्तः । अध्वरे ॥ अच्छ । अवभृथं । अव ।
भृथं । ओजसा ॥७॥

१५२. अहं । इत् । हि । पितुः । परि ॥ मेधां । ऋतस्य । जग्रह ॥ अहं । सूर्यः । इव ।
अजनि ॥८॥

१५३. रेवतीः । नः । सधमादे । सध । मादे ॥ इन्द्रे । सन्तु । तुविवाजाः । तुवि । वाजाः ॥
क्षुमन्तः । याभिः । मदेम ॥९॥

१५४. सोमः । पूषा । च । चेततुः ॥ विश्वासां । सुक्षितीनां । सु । क्षितीनाम् ॥ देवत्रा ।
रथ्योः । हिता ॥१०॥

(आ०-३७, अ०-९, प०-११९, झो) दशति-६॥

(७)

१५५. पान्तं । आ । वः । अन्धसः ॥ इन्द्रं । अभि । प्र । गायत ॥ विश्वासाहं । विश्वा ।
साहं । शतक्रतुं । शत । क्रतुम् ॥ मंहिष्ठं । चर्षणीनाम् ॥१॥

१५६. प्र । वः । इन्द्राय । मादनम् ॥ हर्यश्वाय । हरि । अश्वाय । गायत ॥ सखायः । स ।
खायः । सोमपाव्ने । सोम । पाव्ने ॥२॥

१५७. वयं । उ । त्वा । तदिदर्थाः । तदित् । अर्थाः ॥ इन्द्र । त्वायन्तः । सखायः । स ।
खायः ॥ कण्वाः । उक्थेभिः । जरन्ते ॥३॥

१५८. इन्द्राय । मद्वने । सुतम् ॥ परि । स्तोमन्तु । नः । गिरः ॥ अर्क । अर्चन्तु । कारवः ॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१५९. अयं । ते । इन्द्र । सोमः ॥ निपूतः । नि । पूतः । अधि । बर्हिषि ॥ आ । इहि । ईं । अस्य । द्रव । पिब ॥५॥

१६०. सुरूपकृत्नुं । सुरुप । कृत्नुं । ऊतये । सुदुघाम् । सु । दुघाम् । इव । गोदुहे । गो । दुहे ॥ जुहुमसि । द्यविद्यवि । द्यवि । द्यवि ॥६॥

१६१. अभि । त्वा । वृषभ । सुते ॥ सुतं । सृजामि । पीतये ॥ तृंप । वि । अश्नुहि । मदम् ॥७॥

१६२. यः । इन्द्र । चमसेषु । आ ॥ सोमः । चमूषु । ते । सुतः ॥ पिब । इत् । अस्य । त्वं । ईशिषे ॥८॥

१६३. योगेयोगे । योगे । योगे । तवस्तरम् ॥ वाजेवाजे । वाजे । वाजे । हवामहे ॥ सखायः । स । खायः । इन्द्रं । ऊतये ॥९॥

१६४. आ । तु । आ । इत । नि । सीदत ॥ इन्द्रं । अभि । प्र । गायत ॥ सखायः । स । खायः । स्तोमवाहसः । स्तोम । वाहसः ॥१० ॥

(आ०-४०, अ०-१७, प०-१३७, फे) दशति ॥७॥

(८)

१६५. इदं । हि । अनु । ओजसा ॥ सुतं । राधानां । पते ॥ पिब । तु । अस्य । गिर्वणः । गिः । वनः ॥१॥

१६६. महान् । इन्द्रः । पुरः । च । नः ॥ महित्वं । अस्तु । वज्रिणे ॥ द्यौः । नः । प्रथिना । शवः ॥२॥

१६७. आ । तु । नः । इन्द्र । क्षुमन्तम् ॥ चित्रं । ग्राभं । सं । गृभाय ॥ महाहस्ती । महा । हस्ती । दक्षिणेन ॥३॥

१६८. अभि । प्र । गोपतिं । गो । पतिं । गिरा ॥ इन्द्रं । अर्च । यथा । विदे ॥ सूनुं । सत्यस्य । सत्पतिं । सत् । पतिम् ॥४॥

१६९. कया । नः । चित्रः । आ । भुवत् ॥ ऊती । सदावृधः । सदा । वृधः । सखा । स । खा ॥ कया । शचिष्ठया । वृता ॥५॥

१७०. त्यं । उ । वः । सत्रासाहं । सत्रा । साहम् ॥ विश्वासु । गीर्षु । आयतं । आ । यतम् ॥ आ । च्यावयसि । ऊतये ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१७१. सदसः । पतिं । अद्भुतं । अत् । भुतम् ॥ प्रियं । इन्द्रस्य । काम्यम् ॥ सनिं ।
मेधां । अयासिषम् ॥७॥

१७२. ये । ते । पन्थाः । अधः । दिवः ॥ येभिः । व्यश्वं । वि । अश्वं । ऐरयः ॥ उत ।
श्रोषन्तु । नः । भुवः ॥८॥

१७३. भद्रंभद्रं । भद्रं । भद्रं । नः । आ । भर ॥ इषं । ऊर्जं । शतक्रतो । शत । क्रतो ॥
यत् । इन्द्र । मृडयासि । नः ॥९॥

१७४. अस्ति । सोमः । अयं । सुतः ॥ पिबन्ति । अस्य । मरुतः ॥ उत । स्वराजः ।
स्व । राजः । अश्विना ॥१०॥

आ०-३२, अ०-१३, प०-१३४, जी) दशति-८॥

(९)

१७५. ईंखयन्तीः । अपस्युवः ॥ इन्द्रं । जातं । उप । आसते ॥ वन्वानासः । सुवीर्यं ।
सु । वीर्यम् ॥१॥

१७६. न । कि । देवाः । इनीमसि ॥ न । कि । आ । योपयामसि ॥ मन्त्रश्रुत्यं । मन्त्र ।
श्रुत्यं । चरामसि ॥२॥

१७७. दोषा । उ । आ । अगात् । बृहत् । गाय ॥ द्युमद्गामन् । द्युमत् । गामन् ।
आथर्वण ॥ स्तुहि । देवं । सवितारम् ॥३॥

१७८. एषा । उ । उषाः । अपूर्व्या । अ । पूर्व्या ॥ वि । उच्छति । प्रिया । दिवः । स्तुषे ।
वां । अश्विना । बृहत् ॥४॥

१७९. इन्द्रः । दधीचः । अस्थभिः ॥ वृत्राणि । अप्रतिष्कुतः । अ । प्रतिष्कुतः ।
जघान । नवतीः । नव ॥५॥

१८०. इन्द्र । आ । इहि । मत्सि । अन्धसः ॥ विश्वेभिः । सोमपर्वभिः । सोम । पर्वभिः ॥
महान् । अभिष्टिः । ओजसा ॥६॥

१८१. आ । तु । नः । इन्द्र । वृत्रहन् । वृत्र । हन् ॥ अस्माकं । अर्धं । आ । गहि ॥
महान् । महीभिः । ऊतिभिः ॥७॥

१८२. ओजः । तत् । अस्य । तित्विषे ॥ उभेइति । यत् । समवर्तयत् । सं । अवर्तयत् ॥
इन्द्रः । चर्म । इव । रोदसीइति ॥ ८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१८३. अयं । उ । ते । सं । अतसि ॥ कपोतः । इव । गर्भधिं । गर्भ । धिम् ॥ वचः ।
तत् । चित् । नः । ओहसे ॥९॥

१८४. वातः । आ । वातु । भेषजम् ॥ शम्भु । शं । भु । मयोभु । मयः । भु । नः ।
हृदे ॥ प्र । नः । आयूंषि । तारिषत् ॥१०॥

(आ०-२५, अ०-११, प०-१२९, पो) दशति ॥९॥

(१०)

१८५. यं । रक्षन्ति । प्रचेतसः । प्र । चेतसः ॥ वरुणः । मित्रः । मि । त्रः । अर्यमा ॥
न । किः । सः । दभ्यते । जनः ॥१॥

१८६. गव्या । उ । सु । नः । यथा । पुरा ॥ अश्वया । उत । रथया ॥ वरिवस्या ।
महोनाम् ॥२॥

१८७. इमाः । ते । इन्द्र । पृश्नयः ॥ घृतं । दुहते । आशिरं । आ । शिरम् ॥ एनां ॥
ऋतस्य । पिप्युषीः ॥३॥

१८८. अया । धिया । च । गव्यया ॥ पुरुणामन् । पुरु । नामन् । पुरुष्टुत । पुरु ।
स्तुत ॥ यत् । सोमेसोमे । सोमे । सोमे । आभुवः । आ । अभुवः ॥४॥

१८९. पावका । नः । सरस्वती ॥ वाजेभिः । वाजिनीवती ॥ यज्ञं । वष्टु । धियावसुः ।
धिया । वसुः ॥५॥

१९०. कः । इमं । नाहुषीषु । आ ॥ इन्द्रं । सोमस्य । तर्पयात् ॥ सः । नः । वसूनि ।
आ । भरात् ॥६॥

१९१. आ । याहि । सुषुम । हि । ते ॥ इन्द्र । सोमं । पिब । इमम् ॥ आ । इदं ।
बर्हिः । सदः । मम ॥७॥

१९२. महि । त्रीणां । अवरिति । अस्तु ॥ द्युक्षं । द्यु । क्षं । मित्रस्य । मि । त्रस्य ।
अर्यम्णः ॥ दुराधर्षं । दुः । आधर्षं । वरुणस्य ॥९॥

१९३. त्वावतः । पुरूवसो । पुरु । वसो ॥ वयं । इन्द्र । प्रणेतः । प्र । नेतरिति ॥ स्मसि ।
स्थातः । हरीणाम् ॥९॥

(आ०-२९, अ०१३, प०-११८, दै) दशति ॥१०॥

॥ इति द्वितीयः प्रपाठकः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१)

१९४. उत् । त्वा । मन्दन्तु । सोमाः ॥ कृणुष्व । राधः । अद्रिवः । अ । द्रिवः ॥ अव ।
ब्रह्मद्विषः । ब्रह्म । द्विषः । जहि ॥१॥

१९५. गिर्वणः । गिः । वनः । पाहि । नः । सुतम् ॥ मधोः । धाराभिः । अज्यसे ॥
इन्द्र । त्वादातं । त्वा । दातं । इत् । यशः ॥२॥

१९६. सदा । वः । इन्द्रः । चर्कृषत् । आ ॥ उप । उ । नु । सः । सपर्यन् ॥ न ।
देवः । वृतः । शूरः । इन्द्रः ॥३॥

१९७. आ । त्वा । विशन्तु । इन्दवः ॥ समुद्रं । सं । उद्रं । इव । सिन्धवः ॥ न ।
त्वां । इन्द्र । अति । रिच्यते ॥४॥

१९८. इन्द्रं । इत् । गाथिनः । बृहत् ॥ इन्द्रं । अर्केभिः । अर्किणः ॥ इन्द्रं । वाणीः ।
अनूषत ॥५॥

१९९. इन्द्रः । इषे । ददातु । नः ॥ ऋभुक्षणं । ऋभु । क्षणं । ऋभुं । ऋ । भुं ।
रयिम् ॥ वाजी । ददातु । वाजिनम् ॥६॥

२००. इन्द्रः । अंग । महत् । भयम् ॥ अभि । सत् । अप । च्युच्यवत् ॥ सः । हि ।
स्थिरः । विचर्षणिः । वि । चर्षणिः ॥७॥

२०१. इमाः । उ । त्वा । सुतेसुते । सुते । सुते ॥ नक्षन्ते । गिर्वणः । गिः । वनः ।
गिरः ॥ गावः । वत्सं । न । धेनवः ॥८॥

२०२. इन्द्रा । नु । पूषणा । वयम् ॥ सख्याय । स । ख्याय । स्वस्तये । सु । अस्तये ॥
हुवेम । वाजसातये । वाज । सातये ॥९॥

२०३. न । किं । इन्द्र । त्वत् । उत्तरम् ॥ न । ज्यायः । अस्ति । वृत्रहन् । वृत्र । हन् ॥
न । किं । एवं । यथा । त्वम् ॥१०॥

(आ०-३८, अ०-१४, प०-१४१, ड) दशति ॥१॥

(२)

२०४. तरणिं । वः । जनानाम् ॥ त्रदं । वाजस्य । गोमतः ॥ समानं । सं । आनं । उ ।
प्र । शंसिवम् ॥१॥

२०५. असृग्रं । इन्द्र । ते । गिरः ॥ प्रति । त्वां । उत् । अहासत ॥ सजोषाः । स ।
जोषाः । वृषभं । पतिम् ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२०६. सुनीथः । सु । नीथः । घ । सः । मर्त्यः ॥ यं । मरुतः । यं । अर्यमा ॥ मित्राः । मि । त्राः । पान्ति । अद्रुहः । अ । द्रुहः ॥ ३ ॥

२०७. यत् । वीडौ । इन्द्र । यत् । स्थिरे ॥ यत् । पर्शाने । पराभृतं । परा । भृतम् ॥ वसु । स्पार्हं । तत् । आ । भर ॥४॥

२०८. श्रुतं । वः । वृत्रहन्तमं । वृत्र । हन्तमम् ॥ प्र । शर्धं । चर्षणीनाम् ॥ आशिषे । आ । शिषे । राधसे । महे ॥५॥

२०९. अरं । ते । इन्द्र । श्रवसे ॥ गमेम । शूर । त्वावतः ॥ अरं । शक्र । परेमणि ॥६॥

२१०. धानावन्तं । करंभिणम् ॥ अपूपवन्तं । उक्थिनम् ॥ इन्द्र । प्रातः । जुषस्व । नः ॥७॥

२११. अपां । फेनेन । नमुचेः । न । मुचेः ॥ शिरः । इन्द्र । उत् । अवर्तयः ॥ विश्वाः । यत् । अजयः । स्पृधः ॥८॥

२१२. इमे । ते । इन्द्र । सोमाः ॥ सुतासः । ये । च । सोत्वाः ॥ तेषां । मत्स्व । प्रभूवसो । प्रभु । वसो ॥९॥

२१३. तुभ्यं । सुतासः । सोमाः ॥ स्तीर्णं । बर्हिः । विभावसो । विभा । वसो ॥ स्तोतृभ्यः । इन्द्र । मृडय ॥१०॥

(आ० ३६, अ०-११, प०-१२५, कु) दशति ॥२॥

(३)

२१४. आ । वः । इन्द्रं । क्रिविं । यथा ॥ वाजयन्तः । शतक्रतुं । शत । क्रतुम् ॥ मंहिष्ठं । सिञ्चे । इन्दुभिः ॥१॥

२१५. अतः । चित् । इन्द्र । नः । उप ॥ आ । याहि । शतवाजया । शत । वाजया ॥ इषा । सहस्रवाजया । सहस्र । वाजया ॥२॥

२१६. आ । बुन्दं । वृत्रहा । वृत्र । हा । ददे ॥ जातः । पृच्छत् । वि । मातरम् ॥ के । उग्राः । के । हं । शृण्विरे ॥३॥

२१७. बृबदुक्थं । बृबत् । उक्थं । हवामहे ॥ सृप्रकरस्नं । सृप्र । करस्नं । ऊतये ॥ साधः । कृण्वन्तं । अवसे ॥४॥

२१८. ऋजुनीती । ऋजु । नीती । नः । वरुणः ॥ मित्रः । मि । त्रः । नयति । विद्वान् ॥ अर्यमा । देवैः । सजोषाः । स । जोषाः ॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२१९. दूरात् । दुः । आत् । इह । इव । यत् । सतः ॥ अरुणप्सुः । अशिश्वितत् ॥
वि । भानुं । विश्वथा । अतनत् ॥६॥

२२०. आ । नः । मित्रा । मि । त्रा । वरुणा ॥ घृतैः । गव्यूतिं । गो । यूतिं । उक्षतम् ॥
मध्वा । रजांःसि । सुक्रतू । सु । क्रतुइति ॥७॥

२२१. उत् । उ । त्ये । सूनवः । गिरः ॥ काष्ठाः । यज्ञेषु । अत्नत ॥ वाश्राः । अभिज्ञु ।
अभि । ज्ञु । यातवे ॥८॥

२२२. इदं । विष्णुः । वि । चक्रमे ॥ त्रेधा । नि । दधे । पदम् ॥ समूढं । सं । ऊढं ।
अस्य । पांःसुले ॥९॥

(आ०- २०, अ० १४, प०-१२२, मा) दशति ॥३॥

(४)

२२३. अति । इहि । मन्युषाविणं । मन्यु । साविनम् ॥ सुषुवाँसं । उप । आ । इरय ॥
अस्य । रातौ । सुतं । पिब ॥१॥

२२४. कत् । उ । प्रचेतसे । प्र । चेतसे । महे ॥ वचः । देवाय । शस्यते ॥ तत् ।
इत् । हि । अस्य । वर्धनम् ॥२॥

२२५. उक्थं । च । न । शस्यमानं ॥ न । अगोः । अ । गोः । रयिः । आ । चिकेत ॥
न । गायत्रं । गीयमानम् ॥३॥

२२६. इन्द्रः । उक्थेभिः । मन्दिष्ठः ॥ वाजानां । च । वाजपतिः । वाज । पतिः ॥
हरिवान् । सुतानां । सखा । स । खा ॥४॥

२२७. आ । याहि । उप । नः । सुतम् ॥ वाजेभिः । मा । हृणीयथाः ॥ महान् । इव ।
युवजानिः । युव । जानिः ॥५॥

२२८. कदा । वसो । स्तोत्रं । हर्यते । आ ॥ अव । श्मशा । रुधत् । वारिति ॥ दीर्घं ।
सुतं । वाताप्याय । वात । आप्याय ॥६॥

२२९. ब्राह्मणात् । इन्द्र । राधसः ॥ पिब । सोमं । ऋतुन् । अनु ॥ तव । इदं । सख्यं ।
स । ख्यं । अस्तृतं । अ । स्तृतम् ॥७॥

२३०. वयं । घ । ते । अपि । स्मसि ॥ स्तोतारः । इन्द्र । गिर्वणः । गि । वनः ॥ त्वं ।
नः । जिन्व । सोमपाः । सोम । पाः ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२३१. आ । इन्द्र । पृक्षु । कासु । चित् ॥ नृम्णं । तनूषु । धेहि । नः ॥ सत्राजित् ।
सत्रा । जित् । उग्र । पौंस्यम् ॥९॥

२३२. एव । हि । असि । वीरयुः ॥ एव । शूरः । उत । स्थिरः ॥ एव । ते । राध्यं । मनः ॥१०॥

(आ०-३६, अ०-१२, प०-१३८, खै) दशति ॥४॥

(६)

२३३. अभि । त्वा । शूर । नोनुमः ॥ अदुग्धाः । आ । दुग्धाः । इव । धेनवः ॥ ईशानं ।
अस्य । जगतः । स्वर्दृशं । स्वः । दृशम् ॥ ईशानं । इन्द्र । तस्थुषः ॥१॥

२३४. त्वां । इत् । हि । हवामहे ॥ सातौ । वाजस्य । कारवः ॥ त्वां । वृत्रेषु । इन्द्र ।
सत्पतिं । सत् । पतिं । नरः ॥ त्वां । काष्ठासु । अर्वतः ॥२॥

२३५. अभि । प्र । वः । सुराधसं । सु । राधसम् ॥ इन्द्रं । अर्च । यथा । विदे ॥ यः ।
जरितृभ्यः । मघवा । पुरुवसुः । पुरु । वसुः ॥ सहस्रेण । इव । शिक्षति ॥३॥

२३६. तं । वः । दस्मं । ऋतीषहं । ऋति । सहम् ॥ वसोः । मन्दानं । अन्धसः ॥ अभि ।
वत्सं । न । स्वसरेषु । धेनवः ॥ इन्द्रं । गीर्भिः । नवामहे ॥४॥

२३७. तरोभिः । वः । विदद्वसुं । विदत् । वसुम् ॥ इन्द्रं । सबाधः । स । बाधः । ऊतये ॥
बृहत् । गायन्तः । सुतसोमे । सुत । सोमे । अध्वरे ॥ हुवे । भरं । न । कारिणम् ॥५॥

२३८. तरणिः । इत् । सिषासति ॥ वाजं । पुरन्ध्या । पुरं । ध्या । युजा ॥ आ । वः । इन्द्रं ।
पुरुहूतं । पुरु । हूतं । नमे । गिरा ॥ नेमिं । तष्टा । इव । सुद्रुवं । सु । द्रुवम् ॥६॥

२३९. पिब । सुतस्य । रसिनः ॥ मत्स्व । नः । इन्द्र । गोमतः ॥ आपिः । नः ।
बोधि । सधमाद्ये । सध । माद्ये । वृधे ॥ अस्मान् । अवन्तु । ते । धियः ॥७॥

२४०. त्वं । हि । आ । इहि । चेरवे ॥ विदाः । भगं । वसुत्तये ॥ उत् । वावृषस्व ।
मघवन् । गविष्टये । गो । इष्टये ॥ उत् । इन्द्र । अश्वमिष्टये । अश्वं । इष्टये ॥८॥

२४१. न । हि । वः । चरमं । च । न ॥ वसिष्ठः । परिमँसते । परि । मँसते ॥ अस्माकं ।
अद्य । अ । द्य । मरुतः । सुते । सचा ॥ विश्वे । पिबन्तु । कामिनः ॥९॥

२४२. मा । चित् । अन्यत् । अन् । यत् । वि । शंसत् ॥ सखायः । स । खायः । मा । रिषण्यता ॥
इन्द्रं । इत् । स्तोत । वृषणं । सचा । सुते ॥ मुहुः । उक्था । च । शँसत ॥१०॥

(आ०- ५२, अ०-१९, प०-१९२, झ) दशति ॥५॥

॥ इति अर्धः प्रपाठकः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(६)

२४३. न । किः । तं । कर्मणा । नशत् ॥ यः । चकार । सदावृधं । सदा । वृधम् ॥ इन्द्रं ।
न । यज्ञैः । विश्वगूर्तं । विश्व । गूर्तं । ऋभ्वसम् ॥ अधृष्टं । अ । धृष्टं । धृष्णुं ।
ओजसा ॥१॥

२४४. यः । ऋते । चित् । अभिश्रिषः । अभि । श्रिषः ॥ पुरा । जत्रुभ्यः । आतृदः ।
आ । तृदः ॥ सन्धाता । सं । धाता । सन्धिं । सं । धिं । मघवा ॥ पुरुवसुः ।
पुरु । वसुः ॥ निष्कर्ता । निः । कर्ता । विह्रुतं । वि । ह्रुतं । पुनरिति ॥२॥

२४५. आ । त्वा । सहस्रं । आ । शतम् ॥ युक्ताः । रथे । हिरण्यये ॥ ब्रह्मयुजः । ब्रह्म ।
युजः । हरयः । इन्द्र । केशिनः ॥ वहन्तु । सोमपीतये । सोम । पीतये ॥३॥

२४६. आ । मन्द्रैः । इन्द्र । हरिभिः ॥ याहि । मयूररोमभिः । मयूर । रोमभिः ॥ मा ।
त्वा । के । चित् । नि । येमुः । इत् । न । पाशिनः ॥ अति । धन्व । इव । तान् ।
इहि ॥४॥

२४७. त्वं । अंग । प्र । शँसिषः ॥ देवः । शविष्ठ । मर्त्यम् ॥ न । त्वत् । अन्यः । अन् ।
यः । मघवन् । अस्ति । मर्डिता ॥ इन्द्र । ब्रवीमि । ते । वचः ॥५॥

२४८. त्वं । इन्द्र । यशाः । असि ॥ ऋजीषी । शवसः । पति ॥ त्वं । वृत्राणि । हँसि ।
अप्रतीनि । अ । प्रतीनि । एकः । इत् । पुरु ॥ अनुत्तः । अ । नुत्तः । चर्षणीधृतिः ।
चर्षणि । धृतिः ॥६॥

२४९. इन्द्रं । इत् । देवतातये ॥ इन्द्रं । प्रयति । प्र । यति । अध्वरे ॥ इन्द्रं । समीके ।
सं । ईके । वनिनः । हवामहे ॥ इन्द्रं । धनस्य । सातये ॥७॥

२५०. इमाः । उ । त्वा । पुरुवसो । पुरु । वसो ॥ गिरः । वर्धन्तु । याः । मम ॥
पावकवर्णाः । पावक । वर्णाः । शुचयः । विपश्चितः । विपः । चितः ॥ अभि ।
स्तोमैः । अनूषत ॥८॥

२५१. उत् । उ । त्ये । मधुमत्तमाः ॥ गिरः । स्तोमासः । इरते ॥ सत्राजितः । सत्रा । जितः ।
धनसाः । धन । साः । अक्षितोतयः । अक्षित । उतयः ॥ वाजयन्तः । रथा । इव ॥९॥

२५२. यथा । गौरः । अपा । कृतम् ॥ तृष्यन् । एति । अव । इरिणम् ॥ आपित्वे । नः ।
प्रपित्वे । तूयं । आ । गहि ॥ कण्वेषु । सु । सचा । पिब ॥१०॥

(आ०-५६, अ०-२५, प०-२०५) ड्ड दशति ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(७)

२५३. शग्धि । उ । सु । शचीपते । शची । पते ॥ इन्द्र । विश्वाभिः । ऊतिभिः ॥ भगं ।
न । हि । त्वा । यशसं । वसुविदं । वसु । विदम् ॥ अनु । शूर । चरामसि ॥१॥

२५४. याः । इन्द्र । भुजः । आभरः । आ । अभरः ॥ स्वर्वान् । असुरेभ्यः । अ ।
सुरेभ्यः ॥ स्तोतारं । इत् । मघवन् । अस्य । वर्धय ॥ ये । च । त्वेइति ।
वृक्तबर्हिषः । वृक्त । बर्हिषः ॥२॥

२५५. प्र । मित्राय । मि । त्राय । प्र । अर्यम्णे ॥ सचथ्यं । ऋतावसो । ऋत । वसो ॥
वरुथ्ये । वरुणे । छन्द्यं । वचः ॥ स्तोत्रं । राजसु । गायत ॥३॥

२५६. अभि । त्वा । पूर्वपीतये । पूर्व । पीतये ॥ इन्द्र । स्तोमेभिः । आयवः ॥
समीचीनासः । सं । ईचीनासः । ऋभवः । ऋ । भवः । सं । अस्वरन् ॥ रुद्राः ।
गृणन्त । पूर्व्यम् ॥४॥

२५७. प्र । वः । इन्द्राय । बृहते ॥ मरुतः । ब्रह्म । अर्चत ॥ वृत्रं । हनति । वृत्रहा । वृत्र ।
हा । शतक्रतुः । शत । क्रतुः ॥ वज्रेण । शतपर्वणा । शत । पर्वणा ॥५॥

२५८. बृहत् । इन्द्राय । गायत । मरुतः । वृत्रहन्तमं । वृत्र । हन्तमम् ॥ येन । ज्योतिः ।
अजनयन् । ऋतावृधः । ऋत । वृधः ॥ देवं । देवाय । जागृवि ॥६॥

२५९. इन्द्र । क्रतुं । नः । आ । भर ॥ पिता । पुत्रेभ्यः । पुत् । त्रेभ्यः । यथा ॥ शिक्ष ।
नः । अस्मिन् । पुरुहूत । पुरु । हूत । यामनि ॥ जीवाः । ज्योतिः । अशीमहि ॥७॥

२६०. मा । नः । इन्द्र । परा । वृणक् ॥ भव । नः । सधमाद्ये । सध । माद्ये ॥ त्वं । नः ।
ऊती । त्वं । इत् । नः । आप्यम् ॥ मा । नः । इन्द्र । परा । वृणक् ॥८॥

२६१. वयं । घ । त्वा । सुतावन्तः ॥ आपः । न । वृक्तबर्हिषः । वृक्त । बर्हिषः ॥
पवित्रस्य । प्रस्त्रवणेषु । प्र । स्त्रवणेषु । वृत्रहन् । वृत्र । हन् ॥ परि । स्तोतारः ।
आसते ॥९॥

२६२. यत् । इन्द्र । नाहुषीषु । आ ॥ ओजः । नृम्णं । च । कृष्टिषु ॥ यत् । वा । पञ्च ।
क्षितीनां । द्युम्नं । आ । भर ॥ सत्रा । विश्वानि । पौंस्या ॥१०॥

(आ०-५०, अ०-२१, प०-१९१, प) दशति ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(८)

२६३. सत्यं । इत्था । वृषा । इत् । असि ॥ वृषजूतिः । वृष । जूतिः । नः । अविता ॥
वृषा । हि । उग्र । शृण्विषे । परावति ॥ वृषा । उ । अर्वावति । श्रुतः ॥१॥
२६४. यत् । शक्र । असि । परावति ॥ यत् । अर्वावति । वृत्रहन् । वृत्र । हन् ॥ अतः ।
त्वा । गीर्भिः । द्युगत् । द्यु । गत् । इन्द्र । केशिभिः ॥ सुतावान् । आ ।
विवासति ॥२॥
२६५. अभि । वः । वीरं । अन्धसः । मदेषु । गाय ॥ गिरा । महा । विचेतसं । वि ।
चेतसम् ॥ इन्द्रं । नाम । श्रुत्यं । शाकिनं । वचः । यथा ॥३॥
२६६. इन्द्र । त्रिधातु । त्रि । धातु । शरणं ॥ त्रिवरुथं । त्रि । वरुथं । स्वस्तये । सु ।
अस्तये ॥ छर्दिः । यच्छ । मघवद्भ्यः । च । मह्यं । च ॥ यावय । दिद्युं ।
एभ्यः ॥४॥
२६७. श्रायन्तः । इव । सूर्यम् ॥ विश्वा । इत् । इन्द्रस्य । भक्षत ॥ वसूनि । जातः ।
जनिमानि । ओजसा ॥ प्रति । भागं । न । दीधिमः ॥५॥
२६८. न । सीं । अदेवः । अ । देवः । आप । तत् ॥ इषं । दीर्घायो । दीर्घ । आयो ।
मर्त्यः ॥ एतग्वा । एत । ग्वा । चित् । यः । एतशः । युयोजते ॥ इन्द्रः । हरीइति ।
युयोजते ॥६॥
२६९. आ । नः । विश्वासु । हव्यम् ॥ इन्द्रं । समत्सु । स । मत्सु । भूषत ॥ उप । ब्रह्माणि ।
सवनानि । वृत्रहन् । वृत्र । हन् ॥ परमज्याः । परम । ज्याः । ऋचीषमा ॥७॥
२७०. तव । इत् । इन्द्र । अवमम् । वसु ॥ त्वं । पुष्यसि । मध्यमम् ॥ सत्रा । विश्वस्य ।
परमस्य । राजसि ॥ न । किः । त्वा। गोषु । वृण्वते ॥८॥
२७१. क्व । इयथ । क्व । इत् । असि ॥ पुरुत्रा । चित् । हि । ते । मनः ॥ अलर्षि ।
युध्म । खजकृत् । खज । कृत् । पुरन्दर । पुरं । दर ॥ प्र । गायत्राः ।
अगासिषुः ॥९॥
२७२. वयं । एनं । इदा । ह्यः ॥ अपीपेम । इह । वज्रिणम् ॥ तस्मै । उ । अद्य ।
अ । द्य । सवने । सुतं । भर ॥ आ । नूनं । भूषत । श्रुते ॥१०॥

(आ० - ५६, आ०-१६, प०-१८९ को) दशति ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(९)

२७३. यः । राजा । चर्षणीनां ॥ याता । रथेभिः । अध्रिगुः । अध्रि । गुः ॥ विश्वासां । तरुता । पृतनानाम् ॥ ज्येष्ठं । यः । वृत्रहा । वृत्र । हा । गृणे ॥१॥

२७४. यतः । इन्द्र । भयामहे ॥ ततः । नः । अभयं । अ । भयं । कृधि ॥ मघवन् । शग्धि । तव । तत् । नः । ऊतये ॥ वि । द्विषः । वि । मृधः । जहि ॥२॥

२७५. वास्तोः । पते । ध्रुवा । स्थूणा ॥ अँसत्रं । सोम्यानाम् ॥ द्रप्सः । पुरां । भेत्ता । शश्वतीनाम् ॥ इन्द्रः । मुनीनां । सखा । स । खा ॥३॥

२७६. वट् । महान् । असि । सूर्य ॥ वट् । आदित्य । आ । दित्य । महान् । असि ॥ महः । ते । सतः । महिमा । पनिष्टमा ॥ मह्ना । देव । महान् । असि ॥४॥

२७७. अश्वी । रथी । सुरुपः । सु । रुपः । इत् ॥ गोमान् । यत् । इन्द्र । ते । सखा । स । खा ॥ श्वात्रभाजा । श्वात्र । भाजा । वयसा । सचते । सदा ॥ चन्द्रैः । याति । सभां । स । भां । उप ॥५॥

२७८. यत् । द्यावः । इन्द्र । ते । शतम् ॥ शतं । भूमीः । उत । स्युः ॥ न । त्वा । वज्रिन् । सहस्त्रं । सूर्याः । अनु ॥ न । जातं । अष्ट । रोदसीइति ॥६॥

२७९. यत् । इन्द्र । प्राक् । अपाक् । अप । अक् ॥ उदक् । उत् । अक् ॥ न्यक् । नि । अक् । वा । हूयसे । नृभिः ॥ सिम । पुरु । नृषूतः । नृ । सूतः । असि । आनवे ॥ असि । प्रशर्ध । प्र । शर्ध । तुर्वशे ॥७॥

२८०. कः । तं । इन्द्र । त्वावसो । त्वा । वसो ॥ आ । मर्त्यः । दधर्षति ॥ श्रद्धा । श्रत् । धा । हि । ते । मघवन् । पार्ये । दिवि ॥ वाजी । वाजं । सिषासति ॥८॥

२८१. इन्द्राग्नी । इन्द्र । अग्नीइति । अपात् । अ । पात् । इयम् ॥ पूर्वा । आ । अगात् । पद्वतीभ्यः ॥ हित्वा । शिरः । जिह्वया । रारपत् । चरत् ॥ त्रिँशत् । पदानि । अक्रमीत् ॥९॥

२८२. इन्द्र । नेदीयः । आ । इत् । इहि ॥ मितमेधाभिः । मित । मेधाभिः । ऊतिभिः ॥ आ । शन्तम । शन्तमाभिः । अभिष्टिभिः ॥ आ । स्वापे । सु । आपे । स्वापिभिः । सु । आपिभिः ॥१०॥

(आ०-५४, अ०-२१, प०-२०१, त) दशति ॥९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१०)

२८३. इतः । ऊती । वः । अजरं । अ । जरम् ॥ प्रहेतारं । प्र । हेतारं । अप्रहितं । अ ।
प्रहितम् ॥ आशुं । जेतारं । हेतारं । रथीतम् ॥ अतूर्तं । अ । तूर्तं । तुग्रियावृधं ।
तुग्रिय । वृधम् ॥१॥
२८४. मा । उ । सु । त्वा । वाघतः । च । न ॥ आरे । अस्मत् । नि । रीरमन् ॥ आरात्तात् ।
वा । सधमादं । सध । मादं । नः । आ । गहि ॥ इह । वा । सन् । उप । श्रुधि ॥२॥
२८५. सुनोत । सोमपाव्ने । सोम । पाव्ने ॥ सोमं । इन्द्राय । वज्रिणे ॥ पचत । पक्तीः ।
अवसे । कृणुध्वं । इत् ॥ पृणन् । इत् । पृणते । मयः ॥३॥
२८६. यः । सत्राहा । सत्रा । हा । विचर्षणिः । वि । चर्षणिः ॥ इन्द्रं । तं । हूमहे । वयम् ॥
सहस्रमन्यो । सहस्र । मन्यो । तुविनृम्ण । तुवि । नृम्ण । सत्पते । सत् । पते ॥ भव ।
समत्सु । स । मत्सु । नः । वृधे ॥४॥
२८७. शचीभिः । नः । शचीवसू । शची । वसूइति ॥ दिवा । नक्तं । दिशस्यतम् ॥ मा ।
वां । रातिः । उप । दसत् । कदा । च । न ॥ अस्मत् । रातिः । कदा । च । न ॥५॥
२८८. यदा । कदा । च । मीढुषे ॥ स्तोता । जरेत । मर्त्यः ॥ आत् । इत् ।
वन्देत । वरुणं । विपा । गिरा ॥ धर्तारं । विव्रतानां । वि । व्रतानाम् ॥६॥
२८९. पाहि । गाः । अन्धसः । मदे ॥ इन्द्राय । मेध्यातिथे । मेध्य । अतिथे ॥ यः ।
सम्मिश्लः । सं । मिश्लः । हर्योः । यः । हिरण्ययः ॥ इन्द्रः । वज्री ।
हिरण्ययः ॥७॥
२९०. उभयं । शृणवत् । च । नः ॥ इन्द्रः । अर्वाक् । इदं । वचः ॥ सत्राच्या । सत्रा ।
च्या । मघवान् । सोमपीतये । सोम । पीतये ॥ धिया । शविष्ठः । आ । गमत् ॥८॥
२९१. महे । च । न । त्वा । अद्रिवः । अ । द्रिवः ॥ परा । शुल्काय । दीयसे ॥ न ।
सहस्राय । न । अयुताय । अ । युताय । वज्रिवः ॥ न । शताय । शतामघ । शत ।
मघ ॥९॥
२९२. वस्यान् । इन्द्र । असि । मे । पितुः ॥ उत । भ्रातुः । अभुञ्जतः । अ । भुञ्जतः ॥
माता । च । मे । छदयथः । समा । स । मा । वसो ॥ वसुत्वनाय । राधसे ॥१०॥

(आ०-४४, अ०-२४, प०-२०५, धु) दशति १० ॥

॥ इति तृतीय प्रपाठकः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१)

२९३. इमे । इन्द्राय । सुन्विरे ॥ सोमासः । दध्याशिरः । दधि । आशिरः ॥ तान् । आ । मदाय । वज्रहस्त । वज्र । हस्त । पीतये ॥ हरिभ्यां । याहि । ओकः । आ ॥१॥

२९४. इमे । इन्द्र । मदाय । ते ॥ सोमाः । चिकित्रे । उक्थिनः ॥ मधोः । पपानः । उप । नः । गिरः । शृणु ॥ रास्व । स्तोत्राय । गिर्वणः । गिः । वनः ॥२॥

२९५. आ । तु । अद्य । अ । द्य । सबर्दुघाम् । सबः । दुघाम् ॥ हुवे । गायत्रवेपसं । गायत्र । वेपसम् ॥ इन्द्रं । धेनुं । सुदुघाम् । सु । दुघाम् । अन्यां । इषम् ॥ उरुधारां । उरु । धारां । अरंकृतं । अरं । कृतम् ॥३॥

२९६. न । त्वा । वृहन्तः । अद्रयः । अ । द्रयः ॥ वरंन्ते । इन्द्र । वीडवः ॥ यत् । शिक्षसि । स्तुवते । मावते । वसु ॥ न । किः । तत् । आ । मिनाति । ते ॥४॥

२९७. कः । ईं । वेद । सुते । सचा ॥ पिबन्तं । कत् । वयः । दधे ॥ अयं । यः । पुरः । विभिनत्ति । वि । भिनत्ति । ओजसा ॥ मन्दानः । शिप्री । अन्धसः ॥५॥

२९८. यत् । इन्द्र । शासः । अव्रतं । अ । व्रतम् ॥ च्यावय । सदसः । परि ॥ अस्माकं । अँशुं । मघवन् । पुरुस्पृहं । पुरु । स्पृहम् ॥ वसव्ये । अधि । वर्हय ॥६॥

२९९. त्वष्टा । नः । दैव्यं । वचः ॥ पर्जन्यः । ब्रह्मणः । पतिः ॥ पुत्रैः । पुत् । त्रैः । भ्रातृभिः । अदितिः। अ । दितिः । नु । पातु । नः ॥ दुष्टरं । दुः । तरं । त्रामणं । वचः ॥७॥

३००. कदा । च । न । स्तरीः । असि ॥ न । इन्द्र । सश्चसि । दाशुषे ॥ उपोप । उप । उप । इत् । नु । मघवन् । भूयः । इत् । नु । ते ॥ दानं । देवस्य । पृच्यते ॥८॥

३०१. युँक्ष्व । हि । वृत्रहन्तम । वृत्र । हन्तम ॥ हरीइति । इन्द्र । परावतः ॥ अर्वाचीनः । अर्व । अचीनः । मघवन् । सोमपीतये । सोम । पीतये ॥ उग्रः । ऋष्वेभिः । आ । गहि ॥९॥

३०२. त्वां । इदा । ह्यः । नरः ॥ अपीप्यन् । वज्रिन् । भूर्णयः ॥ सः । इन्द्र । स्तोमवाहसः । स्तोम । वाहसः । इह । श्रुधि ॥ उप । स्वसरं । आ । गहि ॥१०॥

(आ०-५९, अ०-२१, प०-१९९, तो) दशति ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२)

३०३. प्रति । उ । अदर्शि । आयती । आ । यती ॥ उच्छन्ती । दुहिता । दिवः ॥ अप । उ । मही । वृणुते । चक्षुषा । तमः ॥ ज्योतिः । कृणोति । सूनरी । सु । नरी ॥१॥

३०४. इमाः । उ । वां । दिविष्टयः ॥ उस्रा । उ । स्रा । हवन्ते । अश्विना ॥ अयं । वां । अह्वे । अवसे । शचीवसू । शची । वसूइति ॥ विशंविशं । विशं । विशं । हि । गच्छथः ॥२॥

३०५. कु । स्थः । कः । वां । अश्विना ॥ तपानः । देवा । मर्त्यः ॥ घ्नता । वां । अश्नया । क्षपमाणः । अँशुना ॥ इत्थं । उ । आत् । उ । अन्यथा । अन् । यथा ॥३॥

३०६. अयं । वां । मधुमत्तमः ॥ सुतः । सोमः । दिविष्टिषु ॥ तं । अश्विना । पिबतं । तिरोअह्नयम् । तिरः । अह्नयम् ॥ धत्तं । रत्नानि । दाशुषे ॥४॥

३०७. आ । त्वा । सोमस्य । गल्दया ॥ सदा । याचन् । अहं । ज्या ॥ भूर्णिं । मृगं । न । सवनेषु । चुक्रुधम् । कः । ईशानं । न । याचिषत् ॥५॥

३०८. अध्वर्यो । द्रावय । त्वम् ॥ सोमं । इन्द्रः । पिपासति ॥ उप । उ । नूनं । युयुजे । वृषणा । हरीइति ॥ आ । च । जगाम । वृत्रहा । वृत्र । हा ॥६॥

३०९. अभि । सतः । तत् । आ । भर ॥ इन्द्र । ज्यायः । कनीयसः ॥ पुरुवसुः । पुरु । वसुः । हि । मघवन् । बभूविथ ॥ भरेभरे । भरे । भरे । च । हव्यः ॥७॥

३१०. यत् । इन्द्र । यावतः । त्वम् ॥ एनावत् । अहं । ईशीय ॥ स्तोतारं । इत् । दधिषे । रदावसो । रद । वसो ॥ न । पापत्वाय । रँसिषम् ॥८॥

३११. त्वं । इन्द्र । प्रतूर्तिषु । प्र । तूर्तिषु ॥ अभि । विश्वाः । असि । स्पृधः ॥ अशस्तिहा । अशस्ति । हा । जनिता । वृत्रतूः । वृत्र । तूः । असि ॥ त्वं । तूर्य । तरुष्यतः ॥९॥

३१२. प्र । यः । रिरिक्षे । ओजसा ॥ दिवः । सदोभ्यः । परि ॥ न । त्वा । विव्याच । रजः । इन्द्र । पार्थिवम् ॥ अति । विश्वं । ववक्षिथ ॥१०॥

(आ०-५०, अ०-१४, प०-१८२, भा) दशति ॥२॥

(३)

३१३. असावि । देवं । गोऋजीकं । गो । ऋजीकं । अन्धः ॥ नि । अस्मिन् । इन्द्रः । जनुषा । ईं । उवोच ॥ बोधामसि । त्वा । हर्यश्व । हरि । अश्व । यज्ञैः ॥ बोध ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३ १२र १२र १२र
नः । स्तोमं । अन्धसः । मदेषु ॥१॥

१२र ३ १२र ३ . २ १२र ३
३१४. योनिः । ते । इन्द्र । सदने । अकारि ॥ तं । आ । नृभिः । पुरुहूत । पुरु । हूत ।
२ ३ १२र १२र ३ २ ३२ ३ १२र १२र ३१२
प्र । याहि ॥ असः । यथा । नः । अविता । वृधः । चित् ॥ ददः । वसूनि । ममदः ।
३ १२र
च । सोमैः ॥२॥

१२र १२र ३ १२र १२र ३ २ ३ २
३१५. अदर्दः । उत्सं । उत् । सं । असृजः । वि । खानि ॥ त्वं । अर्णवान् । बद्‌बधानान् ।
३ १ २ ३ १२र १ २ ३ २ १२र १२र
अरम्णाः ॥ महान्तं । इन्द्र । पर्वतं । वि । यत् । वरिति ॥ सृजत् । धाराः । अव ।
३ २ ३
यत् । दानवान् । हन् ॥३॥

३ १२ ३ .१२ ३ १२ ३
३१६. सुष्वाणासः । इन्द्र । स्तुमसि । त्वा ॥ सनिष्यन्तः । चित् । तुविनृम्ण । तुवि । नृम्ण ।
१२र .३ २ १२र ३२ १२र १२र ३
वाजम् ॥ आ । नः । भर । सुवितं । यस्य । कोना ॥ तना । त्मना । सह्याम ।
१२र ३
त्वोताः । त्वा । उताः ॥४॥

३ २ ३ १२र ३ १२र ३ १२ ३ १२र
३१७. जगृह्म । ते । दक्षिणं । इन्द्र । हस्तम् ॥ वसूयवः । वसुपते । वसु । पते । वसूनाम् ॥
३२ ३ १२र ३ १२र ३१२ ३२ १२र
विद्म । हि । त्वा । गोपतिं । गोः । पतिं । शूर । गोनाम् ॥ अस्मभ्यं । चित्रं । वृषणं ।
३२ ३
रयिं । दाः ॥५॥

१२र १२र ३१२ ३२ ३ २ १२र ३१२ १२र
३१८. इन्द्रं । नरः । नेमधिता । नेम । धिता । हवन्ते ॥ यत् । पार्याः । युनजते । धियः ।
१२र १२र ३ १२र ३ १२र ३२
ताः ॥ शूरः । नृषाता । नृ । साता । श्रवसः । च । कामे ॥ आ । गोमति । व्रजे ।
३ २ ३
भज । त्वं । नः ॥६॥

१२र ३ २ ३ २ १२र १२र ३१२ ३२ ३
३१९. वयः । सुपर्णाः । सु । पर्णाः । उप । सेदुः । इन्द्रम् ॥ प्रियमेधाः । प्रिय । मेधाः ।
१२र १२र १२र ३२ ३ २ ३२ १२र ३ २ ३ २
ऋषयः । नाधमानाः ॥ अप । ध्वान्तं । ऊर्णुहि । पूर्धि । चक्षुः ॥ मुमुग्धि । अस्मान् ।
३१२ ३ १२र ३ २
निधया । नि । धया । इव । बद्धान् ॥७॥

१२र ३ २ ३ २ १२र १२र ३ २ १२र ३१२
३२०. नाके । सुपर्णं । सु । पर्णं । उप । यत् । पतन्तम् ॥ हृदा । वेनन्तः । अभ्यचक्षत ।
३ १२र ३ १२र १२र ३ १२र ३२
अभि । अचक्षत । त्वा ॥ हिरण्यपक्षं । हिरण्य । पक्षं । वरुणस्य । दूतम् ॥
३१ २ १२र ३ २ ३ २
यमस्य । योनौ । शकुनं । भुरण्युम् ॥८॥

१२र ३ २ ३ २ ३१२ ३ २ ३१२ ३ १२र ३२
३२१. ब्रह्म । जज्ञानं । प्रथमं । पुरस्तात् ॥ वि । सीमतः । सुरुचः । सु । रुचः । वेनः ।
३ १ २ ३ *२ ३ २ ३ २ ३ २ ३ २
अवरिति ॥ सः । बुध्न्याः । उपमाः । उप । माः । अस्य । विष्ठाः । वि । स्थाः ॥
३२ ३ १२र १२र ३ २ ३१२
सतः । च । योनिं । असतः । अ । सतः । च । वि । वरिति ॥९॥

१२र ३ १२ ३ २ ३१२ ३१२ ३१२
३२२. अपूर्व्या । अ । पूर्व्या । पुरुतमानि । अस्मै ॥ महे । वीराय । तवसे । तुराय ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विरप्शिने । वि । रप्शिने । वज्रिणे । शन्तमानि ॥ वचांसि । अस्मै । स्थविराय । स्थ । विराय ॥ तक्षुः ॥१०॥

(आ०-६९, अ०-२३, प०-२३४, दी) दशति ॥३॥

(४)

३२३. अव । द्रप्सः । अँशुमतीं । अतिष्ठत् ॥ ईयानः । कृष्णः । दशभिः । सहस्रैः ॥ आवत् । तं । इन्द्रः । शच्या । धमन्तम् ॥ अप । स्नीहितिं । नृमणाः । नृ । मनाः । अधत् । राः ॥१॥

३२४. वृत्रस्य । त्वा । श्वसथात् । ईषमाणाः ॥ विश्वे । देवाः । अजहुः । ये । सखायः । स । खायः ॥ मरुद्भिः । इन्द्र । सख्यं । स । ख्यं । ते । अस्तु ॥ अथ । इमाः । विश्वाः । पृतनाः । जयासि ॥२॥

३२५. विधुं । वि । धुं । दद्राणं । समने । सं । अने । बहूनाम् ॥ युवानं । सन्तं । पलितः । जगार ॥ देवस्य । पश्य । काव्यं । महित्वा ॥ अद्य । अ । द्य । ममार । सः । ह्यः । सं । आन ॥३॥

३२६. त्वं । ह । त्यत् । सप्तभ्यः । जायमानः । अशत्रुभ्यः । अ । शत्रुभ्यः । अभवः । शत्रुः । इन्द्र ॥ गूढेइति । द्यावा । पृथिवीइति । अनु । अविन्दः ॥ विभुमद्भ्यः । वि । भुमद्भ्य । भुवनेभ्यः । रणं । धाः ॥४॥

३२७. मेडिं । न । त्वा । वज्रिणं । भृष्टिमन्तम् ॥ पुरुधस्मानं । पुरु । धस्मानं । वृषभं । स्थिरप्स्नुं । स्थिर । प्स्नुम् ॥ करोषि । अर्यः । तरुषी । दुवस्युः ॥ इन्द्र । द्युक्षं । द्यु । क्षं । वृत्रहणं । वृत्र । हनं । गृणीषे ॥५॥

३२८. प्र । वः । महे । महेवृधे । महे । वृधे । भरध्वं ॥ प्रचेतसे । प्र । चेतसे । प्र । सुमतिं । सु । मतिं । कृणुध्वम् ॥ विशः । पूर्वीः । प्र । चर । चर्षणिप्राः । चर्षणि । प्राः ॥६॥

३२९. शूनं । हुवेम । मघवानं । इन्द्रम् ॥ अस्मिन् । भरे । नृतमं । वाजसातौ । वाज । सातौ ॥ शृण्वन्तं । उग्रं । ऊतये । समत्सु । स । मत्सु ॥ घ्नन्तं । वृत्राणि । सञ्जितं । सं । जितं । धनानि ॥७॥

३३०. उत् । उ । ब्रह्मणि । ऐरत । श्रवस्या ॥ इन्द्रं । समर्ये । स । मर्ये । महय । वसिष्ठ ॥ आ । यः । विश्वानि । श्रवसा । ततान ॥ उपश्रोता । उप । श्रोता । मे । ईवतः । वचाँसि ॥८॥

३३१. चक्रं । यत् । अस्य । अप्सु । आ । निषत्तं । नि । सत्तम् ॥ उत । उ । तत् । अस्मै ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मधु । इत् । चच्छद्यात् ॥ पृथिव्यां । अतिषितं । अति । सितं । यत् । ऊधरिति ॥
पयः । गोषु । अदधाः । ओषधीषु । ओष । धीषु ॥९॥

(आ०-५६, अ०-२४, प०-२०६, घृ) दशति ॥४॥

(६)

३३२. त्वं । उ । सु । वाजिनं । देवजूतम् । देव । जूतम् ॥ सहोवानं । तरुतारं ।
रथानाम् ॥ अरिष्टनेमिं । अरिष्ट । नेमिं । पृतनाजं । आशूम् ॥ स्वस्तये । सु ।
अस्तये । तार्क्ष्यं । इह । हुवेम ॥१॥

३३३. त्रातारं । इन्द्रं । अवितारं । इन्द्रम् ॥ हवेहवे । हवे । हवे । सुहवं । सु । हवं ।
शूरं । इन्द्रम् ॥ हुवे । नु । शक्रं । पुरुहूतं । पुरु । हूतम् । इन्द्रम् ॥ इदं । हविः ।
मघवा । वेतु । इन्द्रः ॥२॥

३३४. यजामहे । इन्द्रं । वज्रदक्षिणं । वज्र । दक्षिणम् ॥ हरीणां । रथ्यं । विव्रतानां ।
वि । व्रतानाम् ॥ प्र । श्मश्रुभिः । दोधुवत् । ऊर्ध्वधा । भुवत् ॥ वि । सेनाभिः ।
भयमानः । वि । राधसा ॥३॥

३३५. सत्राहणं । सत्रा । हणं । दाधृषिं । तुम्रं । इन्द्रम् ॥ महां । अपारं । अ । पारं ।
वृषभं । सुवज्रं । सु । वज्रम् ॥ हन्ता । यः । वृत्रं । सनिता । उत । वाजम् ॥ दाता ।
मघानि । मघवा । सुराधाः । सु । राधाः ॥४॥

३३६. यः । नः । वनुष्यन् । अभिदाति । अभि । दाति । मर्तः ॥ उगणा । उ । गणा ।
वा । मन्यमानः । तुरः । वा ॥ क्षिधी । युधा । शवसा । वा । तं । इन्द्र ॥ अभि ।
स्याम । वृषमाणः । वृष । मनः । त्वोता । त्वा । उताः ॥५॥

३३७. यं । वृत्रेषु । क्षितयः । स्पर्धमानाः ॥ यं । युक्तेषु । तुरयन्तः । हवन्ते ॥ यं ।
शूरसातौ । शूर । सातौ । यं । अपां । उपज्मन् । उप । ज्मन् ॥ यं । विप्रासः ।
वि । प्रासः । वाजयन्ते । सः । इन्द्रः ॥६॥

३३८. इन्द्रापर्वता । वृहता । रथेन ॥ वामीः । इषः । आ । वहतं । सुवीराः । सु । वीराः ॥
वीतं । हव्यानि । अध्वरेषु । देवा ॥ वर्धेथां । गीर्भिः । इडया । मदन्ता ॥७॥

३३९. इन्द्राय । गिरः । अनिशितसर्गाः । अनिशित । सर्गाः ॥ अपः । प्र । ऐरयत् ।
सगरस्य । स । गरस्य । बुध्नात् ॥ यः । अक्षेण । इव । चक्रियौ । शचीभिः ॥
विष्वक् । वि । स्वक् । तस्तम्भ । पृथिवीं । उत् । द्याम् ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३४०. आ । त्वा । सखायः । स । खायः । सख्या । स । ख्या । ववृत्युः ॥ तिरः । पुरु ।
चित् । अर्णवान् । जगम्याः । पितुः । नपातं । आ । दधीत् । बेधाः ॥ अस्मिन् ।
क्षये । प्रतरां । दीद्यानः ॥९॥

३४१. कः । अद्य । अ । द्य । युङ्क्ते । धुरि । गाः । ऋतस्य ॥ शिमीवतः । भामिनः ।
दुर्हृणायून् । दुः । हृणायून् ॥ आसन् । एषां । अप्सुवाहः । अप्सु । वाहः । मयोभून् ।
मयः । भून् ॥ यः । एषां । भृत्यां । ऋणधत् । सः । जीवात् ॥१०॥

(आ०-७०, अ०-२९, प०-२३५, भु) दशति ॥५॥

॥ इति अर्धः प्रपाठकः ॥

(६)

३४२. गायन्ति । त्वा । गायत्रिणः ॥ अर्चन्ति । अर्कं । अर्किणः ॥ ब्रह्माणः । त्वा ।
शतक्रतो । शत । क्रतो ॥ उत् । वंशं । इव । येमिरे ॥१॥

३४३. इन्द्रं । विश्वाः । अवीवृधन् ॥ समुद्रव्यचसं । समुद्र । व्यचसं । गिरः ॥ रथीतमं ।
रथीनाम् ॥ वाजानां । सत्पतिं । सत् । पतिं । पतिम् ॥२॥

३४४. इमं । इन्द्र । सुतं । पिब ॥ ज्येष्ठं । अमर्त्यं । अ । मर्त्यं । मदम् ॥ शुक्रस्य । त्वा ।
अभि । अक्षरन् ॥ धाराः । ऋतस्य सादने ॥३॥

३४५. यत् । इन्द्र । चित्र । मे । इह । न ॥ अस्ति । त्वादातं । त्वा । दातं । अद्रिवः । अ ।
द्रिवः ॥ राधः । तत् । नः । विदद्वसो । विदत् । वसो ॥ उभयाहस्ती । आ । भर ॥४॥

३४६. श्रुधि । हवं । तिरश्च्याः । तिरः । च्याः ॥ इन्द्र । यः । त्वा । सपर्यति ॥ सुवीर्यस्य ।
सु । वीर्यस्य । गोमतः ॥ रायः । पूर्धि । महान् । असि ॥५॥

३४७. असावि । सोमः । इन्द्र । ते ॥ शविष्ठ । धृष्णो । आ । गहि ॥ आ । त्वा । पृणक्तु ।
इन्द्रियं ॥ रजः । सूर्यः । न । रश्मिभिः ॥६॥

३४८. आ । इन्द्र । याहि । हरिभिः ॥ उप । कण्वस्य । सुष्टुतिं । सु । स्तुतिं ॥ दिवः ।
अमुष्य । शासतः ॥ दिवं । यय । दिवावसो । दिव । वसो ॥७॥

३४९. आ । त्वा । गिरः । रथीः । इव ॥ अस्थुः । सुतेषु । गिर्वणः । गिः । वनः ॥ अभि ।
त्वा । सं । अनूषत ॥ गावः । वत्सं । न । धेनवः ॥८॥

३५०. आ । इत । उ । नु । इन्द्रं । स्तवाम ॥ शुद्धं । शुद्धेन । साम्ना ॥ शुद्धैः । उक्थैः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वावृध्वासं ॥ शुद्धैः । आशीर्वान् । आ । शीर्वान् । ममत्तु ॥९॥

३५१. यः । रयिं । वः । रयिन्तमः ॥ यः । द्युम्नैः । द्युम्नवत्तमः ॥ सोमः । सुतः । सः । इन्द्र । ते ॥ अस्ति । स्वधापते । स्वधा । पते मदः ॥१०॥

(आ०-४०, अ०-१४, प०-१६९, मो) दशति ॥६॥

(७)

३५२. प्रति । अस्मै । पिपीषते ॥ विश्वानि । विदुषे । भर ॥ अरंगमाय । अरं । गमाय । जग्मये ॥ अपश्चादघ्वने । अपश्चा । दघ्ने । नरः ॥१॥

३५३. आ । नः । वयोवयश्शयं । वयोवयः । शयम् ॥ महान्तं । गह्वरेष्ठां । गह्वरे । स्थां ॥ महान्तं । पूर्विनेष्ठां । पूर्विने । स्थां ॥ उग्रं । वचः । अप । अवधीः ॥२॥

३५४. आ । त्वा । रथं । यथा । ऊतये ॥ सुम्नाय । वर्त्तयामसि ॥ तुविकूर्मिं । तुवि । कूर्मिं । ऋतीषहं । ऋति । सहं ॥ इन्द्रं । शविष्ठ । सत्पतिं । सत् । पतिम् ॥३॥

३५५. सः । पूर्व्यः । महोनाम् ॥ वेनः । क्रतुभिः । आनजे ॥ यस्य । द्वारा । मनुः । पिता ॥ देवेषु । धियः । आनजे ॥४॥

३५६. यदि । वहन्ति । आशवः ॥ भ्राजमानाः । रथेषु । आ ॥ पिबन्तः । मदिरं । मधु ॥ तत्र । श्रवाँसि । कृण्वते ॥५॥

३५७. त्यं । उ । वः । अप्रहणं । अ । प्रहणम् ॥ गृणीषे । शवसः । पतिम् ॥ इन्द्रं । विश्वासाहं । विश्वा । साहं । नरं ॥ शचिष्ठं । विश्ववेदसं । विश्व । वेदसं ॥६॥

३५८. दधिक्राव्णः । दधि । क्राव्णः । अकारिषम् ॥ जिष्णोः । अश्वस्य । वाजिनः ॥ सुरभि । सु । रभि । नः । मुखा । मु । खा । करत् ॥ प्र । नः । आयूँषि । तारिषत् ॥७॥

३५९. पुरां । भिन्दुः । युवा । कविः ॥ अमितौजाः । अमित । ओजाः । अजायत् ॥ इन्द्रः । विश्वस्य । कर्मणः ॥ धर्ता । वज्री । पुरुष्टुतः । पुरु । स्तुतः ॥८॥

(आ०-४४, अ०-१६, प०-१२७, ते) दशति ॥७॥

(८)

३६०. प्रप्र । प्र । प्र । वः । त्रिष्टुभं । त्रि । स्तुभं । इषम् ॥ वन्दद्वीराय । वन्दत् । वीराय । इन्दवे ॥ धिया । वः । मेधसातये । मेध । सातये ॥ पुरन्ध्या । पुरं । ध्या । आ । विवासति ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३६१. कश्यपस्य । स्वर्विदः । स्वः । विदः ॥ यौ । आहुः । सयुजौ । स । युजौ । इति ॥
ययोः । विश्वं । अपि । व्रतं ॥ यज्ञं । धीराः । निचाय्य । नि । चाय्य ॥२॥

३६२. अर्चत । प्र । अर्चत । नरः ॥ प्रियमेधासः । प्रिय । मेधासः । अर्चत ॥
अर्चन्तु । पुत्रकाः । पुत् । त्रकाः । उत ॥ पुरं । इत् । धृष्णु । अर्चत ॥३॥

३६३. उक्थं । इन्द्राय । शंस्यं ॥ वर्धनं । पुरुनिष्षिधे । पुरु । निष्षिधे ॥ शक्रः । यथा ।
सुतेषु । नः ॥ रारणत् । सख्येषु । स । ख्येषु । च ॥४॥

३६४. विश्वानरस्य । विश्व । नरस्य । वः । पतिं ॥ अनानतस्य । अन् । आनतस्य ।
शवसः ॥ एवैः । च । चर्षणीनां ॥ ऊती । हुवे । रथानां ॥५॥

३६५. सः । घ । यः । ते । दिवः । नरः ॥ धिया । मर्तस्य । शमतः ॥ ऊती । सः । बृहतः ।
दिवः ॥ द्विषः । अंहः । न । तरति ॥६॥

३६६. विभोः । वि । भोः । ते । इन्द्र । राधसः ॥ विभ्वी । वि । भ्वी । रातिः । शतक्रतो ।
शत । क्रतो ॥ अथ । नः । विश्वचर्षणे । विश्व । चर्षणे ॥ द्युम्नं । सुदत्र । सु । द्रत्र ।
मँहय ॥७॥

३६७. वयः । चित् । ते । पतत्रिणः ॥ द्विपात् । द्वि । पात् । चतुष्पात् । चतुः । पात् ।
अर्जुनि ॥ उषः । प्र । आरन् । ऋतुन् । अनु ॥ दिवः । अन्तेभ्यः । परि ॥८॥

३६८. अमीइति । ये । देवाः । स्थन । स्थ । न ॥ मध्ये । आ । रोचने । दिवः ॥ कत् ।
वः । ऋतं । कत् । अमृतं । अ । मृतं ॥ का । प्रत्ना । वः । आहुतिः । आ । हुतिः ॥९॥

३६९. ऋचं । साम । यजामहे ॥ याभ्यां । कर्माणि । कृण्वते ॥ वि । तेइति । सदसि ।
राजतः ॥ यज्ञं । देवेषु । वक्षतः ॥१०॥

(आ०-५२, अ०-२४, प०-१८४, झी) दशति ॥८॥

(९)

३७०. विश्वाः । पृतनाः । अभिभूतरं । अभि । भूतरं । नरः ॥ सजूः । स । जूः । ततक्षुः ।
इन्द्रं । जजनुः । च । राजसे ॥ क्रत्वे । वरे। स्थेमनि । आमुरीं । आ । मुरीम् ॥
उत । उग्रं । ओजिष्ठं । तरसं । तरस्विनम् ॥१॥

३७१. श्रत् । ते दधामि । प्रथमाय । मन्यवे ॥ अहन् । यत् । दस्युं । नर्यं । विवेः । अपः ॥
उभेइति । यत् । त्वा । रोदसीइति । धावतां । अनु ॥ भ्यसात् । ते। शुष्मात् ।
पृथिवी । चित् । अद्रिवः । अ । द्रिवः ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३७२. समेत । सं । एत । विश्वाः । ओजसा । पतिं । दिवः ॥ यः । एकः । इत् । भूः ।
अतिथिः । जनानाम् ॥ सः । पूर्व्यः । नूतनं । आजिगीषन् । आ । जिगीषन् ॥ तं ।
वर्तनिः । अनु । वावृते । एकः । इत् ॥३॥

३७३. इमे । ते । इन्द्र । ते । वयं । पुरुष्टत । पुरु । स्तुत ॥ ये । त्वा । आरभ्य । आ ।
रभ्य । चरामसि । प्रभूवसो । प्रभु । वसो ॥ न । हि । त्वत् । अन्यः । अन् । यः ।
गिर्वणः । गिः । वनः । गिरः । सघत् । क्षोणीः । इव । प्रति । तत् । हर्य । नः ।
वचः ॥४॥

३७४. चर्षणीधृतं । चर्षणि । धृतं । मघवानं । उक्थ्यम् ॥ इन्द्रं । गिरः । बृहतीः । अभि ।
अनूषत ॥ वावृधानं । पुरुहूतं । पुरु । हूतं । सुवृक्तिभिः । सु । वृक्तिभिः ॥ अमर्त्यं ।
अ । मर्त्यं । जरमाणं । दिवेदिवे । दिवे । दिवे ॥५॥

३७५. अच्छ । वः । इन्द्रं । मतयः । स्वर्युवः ॥ सध्रीचीः । स । ध्रीचीः । विश्वाः । उशतीः ।
अनूषतः ॥ परि । स्वजन्त । जनयः । यथा । पतिम् ॥ मर्यं । न । शुन्ध्युं । मघवानं ।
ऊतये ॥६॥

३७६. अभि । त्वं । मेषं । पुरुहूतं । पुरु । हूतं । ऋग्मियम् ॥ इन्द्रं । गीर्भिः । मंदत ।
वस्वः । अर्णवम् ॥ यस्य । द्यावः । न । विचरन्ति । वि । चरन्ति । मानुषम् ॥ भुजे ।
मꣳहिष्ठं । अभि । विप्रं । वि । प्रं । अर्चत ॥७॥

३७७. त्यं । सु । मेषं । महय । स्वर्विदं । स्वः । विदम् ॥ शतं । यस्य । सुभुवः । सु ।
भुवः । साकं । इरते ॥ अत्यं । न । वाजं । हवनस्यदं । हवन । स्यदं । रथम् ॥
आ । इन्द्रं । ववृत्यां । अवसे । सुवृक्तिभिः । सु । वृक्तिभिः ॥८॥

३७८. घृतवतीइति । भुवनानां । अभिश्रिया । अभि । श्रिया ॥ उर्वीइति । पृथ्वीइति । मधुदुघे ।
मधु । दुघेइति । सुपेशसा । सु । पेशसा ॥ द्यावा । पृथिवीइति । वरुणस्य ।
धर्मणा ॥ विष्कभिते । वि । स्कभितेइति ॥ अजरे । अ । जरेइति । भूरिरेतसा ।
भूरि । रेतसा ॥९॥

३७९. उभेइति । यत् । इन्द्र । रोदसीइति ॥ आपप्राथ । आ । पप्राथ । उषाः । इव ॥
महान्तं । त्वा । महीनां ॥ सम्राजं । सं । राजं । चर्षणीनाम् ॥ देवी । जनित्री ।
अजीजनत् ॥ भद्रा । जनित्री । अजीजनत् ॥१०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३८०. प्र । मन्दिने । पितुमत् । अर्चत । वचः ॥ यः । कृष्णगर्भाः । कृष्ण । गर्भाः ।
निरहन् । निः । अहन् । ऋजिश्वना ॥ अवस्यवः । वृषणं । वज्रदक्षिणम् ।
वज्र । दक्षिणम् ॥ मरुत्वन्तं । सख्याय । स । ख्याय । हुवेमहि ॥११॥

(आ०-८७, अ०-३६, प०-२८०, औ) दशति ॥९॥

(१०)

३८१. इन्द्र । सुतेषु । सोमेषु ॥ क्रतुं । पुनीषे । उक्थ्यं ॥ विदे । वृधस्य । दक्षस्य ।
महान् । हि । सः ॥१॥

३८२. तं । उ । अभि । प्र । गायत ॥ पुरुहूतं । पुरु । हूतं । पुरुष्टुतं । पुरु । स्तुतम् ॥
इन्द्रं । गीर्भिः । तविषं । आ । विवासत ॥२॥

३८३. तं । ते । मदं । गृणीमसि ॥ वृषणं । पृक्षु । सासहिम् ॥ उ । लोककृत्नुं । लोक ।
कृत्नुं । अद्रिवः । अ । द्रिवः । हरिश्रियं । हरि । श्रियम् ॥३॥

३८४. यत् । सोमं । इन्द्र । विष्णवि ॥ यत् । वा । घ । त्रिते । आप्त्ये ॥ यत् ।
वा । मरुत्सु । मन्दसे । सं । इन्दुभिः ॥४॥

३८५. आ । इत् । उ । मधोः । मदिन्तरम् ॥ सिञ्च । अध्वर्यो । अन्धसः ॥ एव । हि ।
वीरः । स्तवते । सदावृधः । सदा । वृधः ॥५॥

३८६. आ । इन्दुं । इन्द्राय । सिञ्चता ॥ पिबाति । सोम्यं । मधु ॥ प्र । राधांऽसि ।
चोदयते । महित्वना ॥६॥

३८७. आ । इत । उ । नु । इन्द्रं । स्तवाम ॥ सखायः । स । खायः । स्तोम्यं । नरम् ॥
कृष्टीः । यः । विश्वाः । अभ्यस्ति । अभि । अस्ति । एकः । इत् ॥७॥

३८८. इन्द्राय । साम । गायत ॥ विप्राय । वि । प्राय । बृहते । बृहत् ॥ ब्रह्मकृते । ब्रह्म ।
कृते । विपश्चिते । विपः । चिते । पनस्यवे ॥८॥

३८९. यः । एकः । इत विदयते । वि । दयते ॥ वसु । मर्ताय । दाशुषे ॥ ईशानः ।
अप्रतिष्कुतः । अ । प्रतिष्कुतः । इन्द्रः । अंग ॥९॥

३९०. सखायः । स । खायः । आ । शिषामहे ॥ ब्रह्म । इन्द्राय । वज्रिणे ॥ स्तुषे । उ ।
सु । वः । नृतमाय । धृष्णवे ॥१०॥

(आ०- ४४ अ०- १४ प०-१४९घो) दशति ॥१०॥

॥ इति चतुर्थः प्रपाठकः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१)

३९१. गृणे । तत् । इन्द्र । ते । शवः ॥ उपमां । उप । मां । देवतातये ॥ यत् । हंसि । वृत्रं । ओजसा । शचीपते । शची । पते ॥१॥

३९२. यस्य । त्यत् । शम्बरं । शं । बरं । मदे ॥ दिवोदासाय । दिवः । दासाय । रंधयन् ॥ अयं । सः । सोमः । इन्द्र । ते । सुतः । पिब ॥२॥

३९३. आ । इन्द्र । नः । गधि । प्रिय ॥ सत्राजित् । सत्रा । जित् । अगोह्य । अ । गोह्य ॥ गिरिः । न । विश्वतः । पृथुः । पतिः । दिवः ॥३॥

३९४. यः । इन्द्र । सोमपातमः । सोम । पातमः । मदः । शविष्ठ । चेतति ॥ येन । हꣳसि । नि । अत्रिणं । तं । ईमहे ॥४॥

३९५. तुचे । तुनाय । तत् । सु । नः ॥ द्राघीयः । आयुः । जीवसे ॥ आदित्यासः । आ । दित्यासः । समहसः । स । महसः । कृणोतन । कृणोत । न ॥५॥

३९६. वेत्थ । हि । निर्ऋतीनां । निः । ऋतीनाम् ॥ वज्रहस्त । वज्र । हस्त । परिवृजं । परि । वृजम् ॥ अहरहः । अहः । अहः । शुन्ध्युः । परिपदां । परि । पदां । इव ॥६॥

३९७. अप । अमीवां । अप । स्त्रिघम् ॥ अप । सेधत । दुर्मतिं । दुः । मतिम् ॥ आदित्यासः ॥ आ । दित्यासः । युयोतन । युयोत । न । नः । अँहसः ॥७॥

३९८. पिब । सोमं । इन्द्र । मन्दतु । त्वा ॥ यं । ते । सुषाव । हर्यश्व । हरि । अश्व । अद्रिः । अ । द्रिः ॥ सोतुः । बाहुभ्यां । सुयतः । सु । यतः । न । अर्वा ॥८॥

(आ०-४३, अ०-२१, प०-१३८, टै) दशति ॥१॥

(२)

३९९. अभ्रातृव्यः । अ । भ्रातृव्यः । अना । त्वम् ॥ अनापिः । अन् । आपिः । इन्द्र । जनुषा । सनात् । असि ॥ युधा । इत् । आपित्वं । इच्छसे ॥१॥

४००. यः । नः । इदमिदं । इदं । इदं । पुरा ॥ प्र । वस्यः । आनिनाय । आ । निनाय । तं । उ । वः । स्तुषे ॥ सख्याय । स । खायः । इन्द्रं । ऊतये ॥२॥

४०१. आ । गन्त । मा । रिषण्यत ॥ प्रस्थाबानः । प्र । स्थावानः । मा । अप । स्थात । समन्यवः । स । मन्यवः ॥ दृढा । चित् । यमयिष्णवः ॥३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४०२. आ । याहि । अयं । इन्दवे ।। अश्वापते । अश्व । पते । गोपते । गो । पते ।
उर्वरापते। उर्वरा । पते ।। सोमं । सोमपते । सोम । पते । पिब ।।४।।

४०३. त्वाया । ह । स्वित् । युजा । वयम् ।। प्रति । श्वसन्तं । वृषभ । ब्रुवीमहि ।। सꣳस्थे ।
सं । स्थे । जनस्य । गोमतः ।।५।।

४०४. गावः । चित् । घ । समन्यवः । स । मन्यवः ।। सजात्येन । स । जात्येन । मरुतः ।
सबन्धवः । स । बन्धवः ।। रिहते । ककुभः । मिथः ।।६।।

४०५. त्वं । नः । इन्द्र । आ । भर ।। ओजः । नृम्णं । शतक्रतो । शत । क्रतो । विचर्षणे ।
वि । चर्षणे ।। आ । वीरं । पृतनासहं । पृतन । सहम् ।।७।।

४०६. अध । हि । इन्द्र । गिर्वणः । गिः । वनः ।। उप । त्वा । कामे । ईमहे । ससृग्महे ।।
उदा । इव । ग्मन्तः । उदभिः ।।८।।

४०७. सीदन्तः । ते । वयः । यथा ।। गोश्रीते । गो । श्रीते । मधौ । मदिरे । विवक्षणे ।।
अभि । त्वां । इन्द्र । नोनुमः ।।९।।

४०८. वयं । उ । त्वां । अपूर्व्य । अ । पूर्व्य ।। स्थूरं । न । कत् । चित् । भरन्तः ।
अवस्यवः ।। वज्रिन् । चित्रं । हवामहे ।।१०।।

(आ०-३२, अ०-२१, प०-१६२, चा) दशति ।।२।।

(३)

४०९. स्वादोः । इत्था । विषूवतः । वि । सूवतः ।। मधोः । पिबन्ति । गौर्यः ।। याः ।
इन्द्रेण । सयावरीः । स । यावरीः ।। वृष्णा । मदन्ति । शोभथा ।। वस्वीः । अनु ।
स्वराज्यं । स्व । राज्यम् ।।१।।

४१०. इत्था । हि । सोमः । इत् । मदः ।। ब्रह्म । चकार । वर्धनम् ।। शविष्ठ । वज्रिन् ।
ओजसा ।। पृथिव्याः । निः । शशाः । अहिम् ।। अर्च्चन् । अनु । स्वराज्यं । स्व ।
राज्यम् ।।२।।

४११. इन्द्रः । मदाय । वावृधे ।। शवसे । वृत्रहा । वृत्र । हा । नृभिः ।। तं । इत् । महत्सु ।
आजिषु ।। ऊतिं । अर्भे । हवामहे ।। सः । वाजेषु । प्र । नः । अविषत् ।।३।।

४१२. इन्द्र । तुभ्यं । इत् । अद्रिवः । अ । द्रिवः ।। अनुत्तं । अ । नुत्तं । वज्रिन् । वीर्यम् ।।
यत् । ह । त्यं । मायिनं । मृगम् ।। तव । त्यत् । मायया । अवधीः ।। अर्चन् । अनु ।
स्वराज्यं । स्व । राज्यम् ।।४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४१३. प्र । इहि । अभि । इहि । धृष्णुहि ॥ न । ते । वज्रः । नि । यँसते ॥ इन्द्र । नृम्णं । हि । ते । शवः ॥ हनः । वृत्रं । जयाः । अपः ॥ अर्चन् । अनु । स्वराज्यं । स्व । राज्यम् ॥५॥

४१४. यत् । उदीरते। उत् । ईरते। आजयः ॥ धृष्णवे । धीयते । धनम् ॥ युङ्क्ष्व । मदच्युता । मद । च्युता । हरीइति ॥ कं । हनः । कं । वसौ । दधः ॥ अस्मान् इन्द्र । वसौ । दधः ॥६॥

४१५. अक्षन् । अमीमदन्त । हि ॥ अव । प्रियाः अधूषत ॥ अस्तोषत । स्वभानवः । स्व । भानवः ॥ विप्राः । वि । प्राः । नविष्ठया । मती ॥ योज । नु । इन्द्र । ते । हरीइति ॥७॥

४१६. उप । उ । सु । श्रृणुहि । गिरः ॥ मघवन् । मा । अतथाः इव ॥ कदा । नः । सूनृतावतः सु । नृतावतः ॥ करः । इत् । अर्थयासे । इत् ॥ योज । नु । इन्द्र । ते । हरीइति ॥८॥

४१७. चन्द्रमाः । चन्द्र । माः । अप्सु । अन्तः । आ ॥ सुपर्णः । सु । पर्णः । धावते । दिवि ॥ न । वः । हिरण्यनेमयः । हिरण्य । नेमयः ॥ पदं । विन्दन्ति । विद्युतः । वि । द्युतः ॥ वित्तं । मे । अस्य । रोदसीइति ॥९॥

४१८. प्रति । प्रियतमं । रथम् ॥ वृषणं । वसुवाहनं । वसु । वाहनम् ॥ स्तोता । वां । अश्विनौ । ऋषिः ॥ स्तोमेभिः । भूषति । प्रति ॥ माध्वीइति । मम । श्रुतं । हवम् ॥१०॥

(आ०-७४, अ०-१९, प०-२१८, धै) दशति ॥३॥

(४)

४१९. आ । ते । अग्ने । इधीमहि ॥ द्युमन्तं । देव । अजरं । अ । जरम् ॥ यत् । ह । स्या । ते । पनीयसी ॥ समित् । सं । इत् । दीदयति । द्यवि ॥ इषं । स्तोतृभ्यः । आ । भर ॥१॥

४२०. आ । अग्निं । न । स्ववृक्तिभिः । स्व । वृक्तिभिः ॥ होतारं । त्वा । वृणीमहे ॥ शीरं । पावकशोचिषं । पावक । शोचिषम् । वि । वः । मदे ॥ यज्ञेषु । स्तीर्णवर्हिषं । स्तीर्ण । बर्हिशं । विवक्षसे ॥२॥

४२१. महे । नः । अद्य । अ । द्य । बोधया ॥ उषः । राये । दिवित्मती ॥ यथा । चित् । नः । अबोधयः ॥ सत्यश्रवसि । सत्य । श्रवसि । वाय्ये ॥ सुजाते । सु । जाते । अश्वसूनृते । अश्व । सूनृते ॥३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४२२. भद्रं । नः । अपि । वातय ॥ मनः । दक्षं । उत । क्रतुम् ॥ अथ । ते । सख्ये । स ।
ख्ये । अन्धसः । वि । वः । मदे ॥ रण । गावः । न । यवसे । विवक्षसे ॥४॥

४२३. क्रत्वा । महान् । अनुष्वधं । अनु । स्वधम् ॥ भीमः । आ । वावृते । शवः ॥ श्रिये ।
ऋष्वः । उपाकयोः ॥ नि । शिप्री । हरिवान् । दधे ॥ हस्तयोः । वज्रं ।
आयसम् ॥५॥

४२४. सः । घ । तं । वृषणं । रथम् ॥ अधि । तिष्ठति । गोविदं । गो विदम् ॥ यः ।
पात्रं । हारियोजनं । हारि । योजनं ॥ पूर्णं । इन्द्र । चिकेताति ॥ योज । नु । इन्द्र ।
ते । हरीइति ॥६॥

४२५. अग्निं । तं । मन्ये । यः । वसुः ॥ अस्तं । यं । यन्ति । धेनवः ॥ अस्तं । अर्वन्तः ।
आशवः ॥ अस्तं । नित्यासः । वाजिनः ॥ इषं । स्तोतृभ्यः । आ । भर ॥७॥

४२६. न । तं । अंहः । न । दुरितम् । दुः । इतम् ॥ देवासः । अष्ट । मर्त्यम् ॥
सजोषसः । स । जोषसः । यं । अर्यमा ॥ मित्रं । मि । त्रः । नयति । वरुणः ।
अति । द्विषः ॥८॥

(आ०-५४, अ०-१६, प०-१७२, ता) ॥ दशति ॥४॥

(५)

४२७. परि । प्र । धन्व । इन्द्राय । सोम ॥ स्वादुः । मित्राय । मि । त्राय । पूष्णे ।
भगाय ॥१॥

४२८. परि । उ । सु । प्र । धन्व । वाजसातये । वाज । सातये ॥ परि । वृत्राणि ।
सक्षणिः । स । क्षणिः ॥ द्विषः । तरध्यै । ऋणयाः । ऋण । याः । नः । ईरसे ॥२॥

४२९. पवस्व । सोम । महान् । समुद्रः । सं । उद्रः ॥ पिता । देवानां । विश्वा । अभि ।
धाम ॥३॥

४३०. पवस्व । सोम । महे । दक्षाय ॥ अश्वः । न । निक्तः । वाजी । धनाय ॥४॥

४३१. इन्दुः । पविष्ट । चारुः । मदाय ॥ अपां । उपस्थे । उप । स्थे । कविः ।
भगाय ॥५॥

४३२. अनु । हि । त्वा । सुतं । सोम । मदामसि ॥ महे । समर्यराज्ये । समर्य । राज्ये ॥
वाजान् । अभि । पवमान । प्र । गाहसे ॥६॥

४३३. के । ईम् । व्यक्ताः । वि । अक्ताः । नरः । सनीडाः । स । नीडाः ॥ रुद्रस्य ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ २र १ २र ३ १ २र
मर्याः । अथ । स्वश्वाः । सु । अश्वाः ॥७॥
१ २र ३ २ ३ २ १ २र १ २र १ २र ३ २ ३ १ २
४३४. अग्ने । तं । अद्य । अ । द्य ॥ अश्वं । न । स्तोमैः ॥ क्रतुं । न । भद्रम् ॥ हृदिस्पृशं ।
३ १२र ३ १ २ ३ १ २र
हृदि । स्पृशम् ॥ ऋध्याम । ते । ओहैः ॥८॥
३ २ ३ २ ३ २ १ २र ३ १ २ ३ १ २ ३ २
४३५. आविः । आ । विः । मर्याः । आ । वाजं । वाजिनः । अग्मन् ॥ देवस्य । सवितुः ।
३ २ ३ २ ३ २ ३
सवम् ॥ स्वर्गान् । स्व । गान् । अर्वन्तः । जयत ॥९॥
१ २र ३ २ ३ २ ३ २ ३ २ १ २र १ २र
४३६. पवस्य । सोम । द्युम्नी । सुधारः । सु । धारः ॥ महान् । अवीनां । अनु ।
३ २
पूर्व्यः ॥१०॥

(आ०-४०, अ०-१५, प०-१३४, मी) दशति ॥५॥

॥ इति अर्धः प्रपाठकः ॥

(६)

१ २र १ २र ३ १ २ ३ २ ३ २ ३ १ २र
४३७. विश्वतोदावन् । विश्वतः । दावन् । विश्वतः । नः । आ । भर ॥ यं । त्वा । शविष्ठं ।
१२र
ईमहे ॥१॥
३ २ ३ २ ३ १ २ १ २र १ २र ३ २ ३ २
४३८. एषः । ब्रह्मा । यः । ऋत्वियः ॥ इन्द्रः । नाम । श्रुतः । गृणे ॥२॥
३ १ २ १ २र ३ १ २ ३ २ १ २र १ २र ३ १ २ ३
४३९. ब्रह्माणः । इन्द्रं । महयन्तः । अर्कैः ॥ अवर्धयन् । अहये । हन्तवै । उ ॥३॥
१ २र ३ १ २र १ २र ३ १ २र १ २र ३
४४०. अनवः । ते । रथं । अश्वाय । तक्षुः ॥ त्वष्टा । वज्रं । पुरुहूत । पुरुहूत ।
१ २
द्युमन्तम् ॥४॥
२ ३ २ ३ २ ३ १ २ १ २र ३ २ ३ २ ३ २
४४१. शं । पदं । मघं । रयीषिणे ॥ न । कामं । अव्रतः । अ । व्रतः । हिनोति । न ।
३ २
स्पृशत् । रयिम् ॥५॥
१ २र ३ २ १ २र ३ १ २ ३ २ ३ १२र ३ २ ३ १ २
४४२. सदा । गावः । शुचयः । विश्वधायसः । विश्व । धायसः ॥ सदा । देवाः । अरेपसः ।
३ १ २
अ । रेपसः ॥६॥
२ ३ १२र ३ २ १ २र ३ २ १२र
४४३. आ । यहि । वनसा । सह ॥ गावः । सचन्त । वर्तनिं । यत् । ऊधभिः ॥७॥
१२र ३ २ ३ २ १२र ३ १ २ १ २र ३ २ ३१ २ ३
४४४. उप । प्रक्षे । प्र । क्षे । मधुमति । क्षियन्तः ॥ पुष्येम । रयिं । धीमहे । ते । इन्द्र ॥८॥
१२र ३ २ ३ १ २ ३ २ ३ २ ३ २ १२र
४४५. अर्चन्ति । अर्कं । मरुतः । स्वर्काः । सु । अर्काः ॥ आ । स्तोभति । श्रुतः । युवा ।
१ २र
सः । इन्द्रः ॥९॥
२ ३ १ २र ३ १ २ ३ १ २र १ २र ३ २
४४६. प्र । वः । इन्द्राय । वृत्रहन्तमाय । वृत्र । हन्तमाय ॥ विप्राय । वि । प्राय । गाथं ।
३ २ ३ १२
गायत । यं । जुजोषते ॥१०॥

(आ०-३१, अ०-९, प०-१०७, घे) दशति ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(७)

४४७. अचेति । अग्निः । चिकितिः ॥ हव्यवाट् । हव्य । वाट् । न । सुमद्रथः । सुमत् । रथः ॥१॥

४४८. अग्ने । त्वं । नः । अन्तमः ॥ उत । त्राता । शिवः । भुवः । वरुथ्यः ॥२॥

४४९. भगः । न । चित्रः । अग्निः । महोनाम् ॥ दधाति । रत्नं ॥३॥

४५०. विश्वस्य । प्र । स्तोभ ॥ पुरः । वा । सन् । यदि । वा । इह । नूनम् ॥४॥

४५१. उषाः । अप । स्वसुः । तमः ॥ सं । वर्तयति । वर्तनिं । सुजातता । सु ।जातता ॥५॥

४५२. इमा । नु । कं । भुवना । सीषधेम ॥ इन्द्रः । च । विश्वे । च । देवाः ॥६॥

४५३. वि । स्रुतयः । यथा । पथः ॥ इन्द्र । त्वत् । यन्तु । रातयः ॥७॥

४५४. अया । वाजं । देवहितं । देव । हितं । सनेम ॥ मदेम । शतहिमाः । शत । हिमाः । सुवीराः । सु । वीराः ॥८॥

४५५. ऊर्जो । मित्रः । मि । त्रः । वरुणः । पिन्वत । इडाः ॥ पीवरीं । इषं । कृणुहि । नः । इन्द्र ॥९॥

४५६. इन्द्रः । विश्वस्य । राजति ॥१०॥

(आ०-२६, अ०-७, प०९२, खा) दशति ॥७॥

(८)

४५७. त्रिकद्रुकेषु । त्रि । कद्रुकेषु । महिषः । यवाशिरं । यव । आशिरं । तुविशुष्मः । तुवि । शुष्मः ॥ तृंपत् । सोमं । अपिबत् । विष्णुना । सुतं । यथावशं । यथा । वशम् ॥ सः । ईं । ममाद । महि । कर्म । कर्तवे । महां । उरुम् ॥ सः । एनं । सश्चत् । देवः । देवं । सत्यः । इन्दुः । सत्यं । इन्द्रम् ॥१॥

